28 ^{a}) B$_4$ भद्रे (for भज). D$_4$ M$_1$ प्रीति- (for प्रीतिं). Ś$_1$ Ñ$_2$ V B D$_{6.10}$ च (for प्र-). D$_{2.11}$ भज प्रहर्षं प्रीतिं (D$_{11}$ शोकं) च. —^{b}) V$_2$ त्यज तां च (hypm.); D$_7$ त्यज्यतां; D$_{8.9}$ M$_1$ त्यज तां; G$_2$ त्यजैनां (for त्यजैतां). D$_{3.4}$ नित्यदीनतां. Ś$_1$ Ñ$_1$ B$_3$ D$_{10.11}$ त्यज त्वं (Ñ$_1$ B$_3$ D$_{11}$ तां) नित्यदीनतां; Ñ$_2$ V$_1$ B$_{1.2.4}$ D$_{1.2.5}$ त्यजैनां(Ñ$_2$ V$_1$ °जंती; B$_2$ °तां; D$_5$ °ज्यतां) नित्यदीनतां; D$_6$ T$_{1.3}$ त्यजैनां निज(D$_6$ दैन्य)दैन्यतां. —^{c}) Ś$_1$ Ñ$_1$ D$_{2.3.10.11}$ सा त्वं (for सीते). —^{d}) D$_3$ सक्रीडय (sic); D$_{7.9}$ G$_{1.2}$ Ct परिक्रीड; G$_3$ समाक्रीड; Cm as in text (for सह क्रीड). Ñ$_1$ रावणेन महात्मना. —After 28, Ñ$_1$ (partly illeg.) ins.:

565* ******** तपस्विषु यथासुखम्।

29 ^{a}) Ś$_1$ Ñ$_2$ V$_1$ B$_{1.3.4}$ जानासि च; V$_2$ D$_{6.10}$ जानामि च; D$_{1.3.11}$ जानामि हि; D$_{7.9}$ जानीमहे; G$_2$ जानामीह; Cm as in text (for °सि हि). —^{b}) Ñ$_2$ V$_1$ B$_{1.2.4}$ D$_6$ स्त्रिया (for स्त्रीणां). Ñ$_1$ योषितां यौवनं शुभं. —^{c}) B$_{3.4}$ न तद्; D$_{1.2.4}$ तन्न; D$_{11}$ न* (for न ते). D$_{11}$ व्यतिक्रांतं. Ś$_1$ Ñ$_2$ D$_{10}$ तन्न व्यतिक्रांतं(Ñ$_2$ °क्रामः); Ñ$_1$ V$_2$ न तद्व्यतिक्रांतं (V$_2$ °क्रम्य [sic]); B$_2$ न व्यतिचक्राम; D$_6$ न हृव्यति क्रामेत् (sic); D$_8$ T$_2$ नैतत्त्व(T$_2$ °द)तिक्रामेत् (for न ते व्यतिक्रामेत्). D$_3$ अतिक्रामति यावत्तत्. —^{d}) Ś$_1$ दुःखम् (sic); D$_{11}$ सर्वम् (for सुखम्).

30 ^{a}) Ś$_1$ D$_{10}$ सर्वाणि; Ñ$_1$ दिव्यानि (for रम्याणि). D$_{11}$ मंदिराणि च दिव्यानि. —D$_{10}$ om. 30^{cd}. —^{d}) Ś$_1$ भज; Ñ$_1$ D$_{2.8}$ रम (for चर). Ñ$_2$ V B D$_6$ भ्र(B$_2$ र)म त्वं मदिरोत्कटा.

31 D$_2$ om. 31–32. —^{a}) D$_{1.4}$ [अ]नेकानि; D$_{7.8}$ (before corr. as in text).$_9$ ते देवि; G$_1$ ते सुभ्रूर् (for ते सप्त). Ñ$_2$ D$_6$ स्त्रीणां सप्त सहस्राणि. —^{b}) Ñ$_2$ V B D$_{5.6}$ मैथिलि (for सुन्दरि). —D$_4$ om. 31^{cd}. —^{cd}) = 18^{ab}. —After 31, Ś$_1$ D$_{10.11}$ ins.:

566* स्त्रीदुःखं स्त्री विजानीते तेनार्थं प्रब्रवीमि ते ।
स्त्रीणां स्त्रियो गतिर्यस्मात्तेन त्वां प्रब्रवीम्यहम् ।

[(l. 1) D$_{11}$ विजानंति (sic). D$_{11}$ तेनात्यर्थं ब्रवीमि ते (for the post. half). —(l. 2) Ś$_1$ transp. स्त्रीणां and स्त्रियो. Ś$_1$ ह्यस्मात्; D$_{11}$ सीते (for यस्मात्). D$_{11}$ प्रार्थयामहे (for प्रब्रवीम्यहम्).];

while Ñ$_1$ ins. after 31:

567* न करिष्यसि चेदेवं वचनं मम पांशुले।

32 D$_2$ om. 32 (cf. v.l. 31). B$_3$ transp. 32^{ab} and 32^{cd}. —^{a}) B$_3$ बाहू; D$_{10}$ ते वा (by transp.); M$_1$ वा* (for वा ते). Ñ$_1$ हृदयं ते समुत्पाट्य. —^{b}) Ñ$_1$ ते स्वयं; V$_2$ [अ]हं स्वयं; D$_9$ च मैथिलि (hypm.). Ñ$_2$ V$_1$ B D$_6$ भक्षयिष्यामहे वयं. ❀ Cv.m.g: उत्पाट्य वा उत्पाट्यैव।; Cr: वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चय इति विश्वः. ❀ —^{c}) B$_3$ एतदुक्तं मया वाक्यं. —^{d}) Ś$_1$ Ñ$_2$ V B$_{1.2}$ D$_{3.6.10}$ यथावन्न (by transp.); B$_3$ यदि त्वं नः; B$_4$ त्वं वृथा न (for न यथावत्). —After 32, Ś$_1$ reads 34^{ab}; while Ñ$_1$ ins.:

568* दुर्विनीतां दुरारोहां भक्षयिष्याम्यसंशयम्।

33 ^{a}) Ś$_1$ शातोदरी; Ñ$_2$ V B$_{1.2.4}$ D$_6$ वज्रो°; B$_3$ वक्रो° (for चण्डो°). —^{b}) Ś$_1$ क्रूरदर्शनं; Ñ$_1$ क्रोधविह्वला; Ñ$_2$ V B D$_6$ T$_2$ घोरदर्शना; D$_2$ M$_2$ °निस्वना; D$_5$ T$_{1.3}$ G$_{2.3}$ M$_3$ क्रोधमूर्छिता; D$_{11}$ °कर्मणा (sic) (for क्रूरदर्शना). —^{c}) D$_{2.10}$ भ्रमयंती. Ś$_1$ D$_{1.4.10}$ महा- (for महच्-). —Ñ$_1$ illeg. for ^{d}. —^{d}) Ś$_1$ D$_{10}$ वचनं चेदमब्रवीत्. —After 33, Ñ$_1$ ins.:

569* उवाच वचनं चाग्रे भ्रामयन्ती दिशो दश।

34 Ś$_1$ reads 34^{ab} after 32. —^{a}) V$_2$ -नेत्राक्षीं; D$_{5.7.9}$ G$_3$ -शावाक्षीं (for -लोलाक्षीं). —^{b}) B D$_{1.4}$ T$_{1.3}$ G$_{2.3}$ M$_3$ त्रासोत्कंपि-; D$_3$ °त्कर्ष- (sic) (for °त्कम्प-). —B$_1$ reads 34^{c}–35 in marg. —^{c}) Ś$_1$ राक्षसेन. D$_{1.3}$ G$_{1.3}$ M$_2$ [आ]हृतां. —^{d}) Ś$_1$ Ñ$_1$ D$_{1-4.8.10.11}$ दोहदो; D$_5$

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

यकृत्प्लीहमथोत्पीडं हृदयं च सबन्धनम् ।
अन्त्राण्यपि तथा शीर्षं खादेयमिति मे मतिः ॥ ३५
ततस्तु प्रघसा नाम राक्षसी वाक्यमब्रवीत् ।
कण्ठमस्या नृशंसायाः पीडयामः किमास्यते ॥ ३६
निवेद्यतां ततो राज्ञे मानुषी सा मृतेति ह ।
नात्र कश्चन संदेहः खादतेति स वक्ष्यति ॥३७
ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत् ।
विशस्येमां ततः सर्वान्समान्कुरुत पीलुकान् ॥ ३८
विभजाम ततः सर्वा विवादो मे न रोचते ।
पेयमानीयतां क्षिप्रं माल्यं च विविधं बहु ॥ ३९

G. 5. 25. o
B. 5. 24. 3
L. 5. 19. 7

G2.3 दौह्रदो (for दौर्हृदो). D5.7.9 T1.3 G2 M2 अयं (for अभूत्). Ñ2 V B D6 ममाभूदादरो महान्.

35 B1 reads 35 in marg. (cf. v.l. 34). Ñ1 illeg. for 35 – 41. —[a]) D7–9 M1 Cm.t महत्क्रोडं; T2 अथोत्कृत्य; G2 M2 अथोत्क्रोडं; Cm*p*.g.k.t*p* as in text (for अथोत्पीडं). Ś1 D10 सकृच्चित्तं च हृदयं; Ñ2 D6 सकृत्पित्त (D6 °त्प्लीह)मथोत्क्रोडं; V B1–3 यकृत्पिं(V2 उत्कृत्य पिं [hypm.]; B3 पक्रपिं)डमथोत्क्रोडं; B4 उत्कृत्य पिंडं सक्रोधं; D1.4 यकृत्पिंडं(D4 यत्कालिजं [sic]) च क्रोडं च; D2 यद्यत्पिंडं तथा क्रोडं; D3 यत्त्वत्पिंडं च***; D5 यकृत्प्लीहामेदक्रोडं; D11 यत्क्लिन्नपिंडं क्रोचांच (corrupt). —[b]) Ś1 D10 रुचिरं (for हृदयं). V2 om. च (subm.). V2 *बंधनं; B3 रसायनं; D4 सकंधरं; D5 नि° (for सबन्धनम्). D8 (before corr.) नहृदयं स्नायुबंधनं. ❀ Cv: उत्क्रोडमिति च पाठः।; Cr.g: कारान्तस्य प्लीहनशब्दस्याकारान्तत्वमार्षम् (Cg उत्क्रोडमिति पाठ उत्क्रोडो हृदयस्य स्थानम्)।; so also Ck.t. ❀ —[c]) D7.9 गात्राणि; D8 S आंत्राणि. Ñ2 V B1.2 D6 च (for [अ]पि). V2 यथा (for तथा). Ś1 B4 D1–4.10.11 अंत्राण्यस्याः(D1 °णि च; D4 °पि) शिरश्चैव(B4 °श्चोरू); B3 स्तनौ सुरुचिरौ दृष्ट्वा. —[d]) B4 D3.8 M1 खादयामि (for खादेयम्).

36 Ñ1 illeg. for 36 (cf. v.l. 35). B3 om. 36 – 38[ab]. —[a]) D1 सा (for तु). D2 तपसा; D11 पट्टिसा (for प्रघसा). V B1.2.4 पुनर्वै(B4 °श्च) विकटा नाम. —[c]) Ñ2 B1.2 D6 निपीड्यैव(D6 °र्वं) (for नृशंसायाः). V कंठे अस्या निपीड्यैव (with hiatus). —[d]) G2 पीडयामि; T2 खाद°; Ct as in text (for पीडयामः). Ś1 B4 D1–4.10.11 पीड(Ś1 D10 पाट)यामि किमेतया; Ñ2 V D6 प्रसृ(Ñ2 °मृ)तेति निवेद्यतां; B1 मृतेति प्रतिवेद्यतां; B2 मृतेयं प्रतिपाद्यतां.

37 Ñ1 illeg.; B3 om. 37 (cf. v.l. 35 and 36). V2 om. 37[ab]. —[a]) Ś1 D10 निवेद्यते; D11 निवेद्येयं. D5 तथा (for ततो). —[b]) Ś1 B4 D2.10.11 [इ]यं; D1 च; Ct as in text (for सा). Ś1 B4 D2.10.11 हि; D1.3–5.7.9 च (for ह). —[c]) Ś1 V2 B4 D2.10.11 अत्र कश्चि(D11 क्वचि)न्न; D1.7.9 नात्र कश्चिच्च(D1 °न्न[sic]) (for नात्र कश्चन). —[d]) Ś1 B4 D3.4.10.11 [ए]व; T2 च; Ct as in text (for स). D11 कांक्षति (for वक्ष्यति). V2 खादयध्वं च वक्ष्यति; D1 स्वदतेत्येव वक्ष्यते; D2 खादंत्वित्येव वक्ष्यति. —For 37, Ñ2 V1 B1.2 D6 subst.; while Ś1 V2 B4 D1–4.10.11 ins. after 37:

570* दृष्ट्वा ह्येतां निरुच्छ्वासां वैवस्वतगतिं गताम् ।
भक्ष्यतामिति सुव्यक्तं रावणो ह्यभिधास्यति ।

[(l. 1) V1 B1 [ए]नां; D2 [ए]कां (for [ए]तां). D3 निरुत्साहां (for °च्छ्वासां). Ñ2 V B1.2.4 D3.6 -वशं (for -गतिं). —(l. 2) Ś1 D10 भजताम्; D6 विभक्ष्यताम् (hypm.). Ś1 D3.10 मन्वानो; D1.4 सर्वा नो; D11 ता: सर्वा (for सुव्यक्तं). Ñ2 V B1.2.4 D2.6 प्रभुराज्ञापयिष्यति (for the post. half).]

38 Ñ1 illeg. for 38 (cf. v.l. 35). B3 om. 38[ab] (cf. v.l. 36). V2 transp. [ab] and [cd]. —[a]) D4 च (for तु). Ś1 D1.3.10.11 [अ]योमुखी; D2.4 [अ]धो°; D5.6 [अ]ज° (for [अ]जा°). —[b]) Ñ2 V B1.2.4 D2.6 राक्षसी प्रत्युवाच तां. —Ś1 om. (hapl.) 38[c] – 40[b]. Ñ2 V1 B1.2.4 D6 om. 38[cd]. —[c]) D1 विभज्य; D11 °नाश्य (for °शस्य). V2 D3.4 [ए]नां; B3 D1.2.11 [ए]तां (for [इ]मां). V2 D2.5 G1.2 M1.3 सर्वाः (for सर्वान्). D10 निशम्येतां ततः सर्वाः. —[d]) B3 मांसं (sic) (for समान्). V2 भागशः; B3 वेलशः; D1 कीलशः; D2 सर्वशः; D3 लेशतः; D4 वालिशाः (sic); D5.7.9 T2.3 G2 Cr.m.k.t पिंड(Cr °डि)कान्; D11 भागतः; T1 M2 Cv पीलकान्; G3 ऐलकान्; Cg as in text (for पीलु°). D8 मांसांश्च कृतपिंडकान् (sic). ❀ Ck: अत्र श्लोकद्वयं क्वचित्प्रक्षिप्तम्। सुप्रक्षेपमिदं स्थलम्।; Ct: विशस्येमामिति। मध्ये 'कण्ठमस्या नृशं°; निवेद्यतां त°; नात्र कश्चिच्च सं°; ततस्त्वजामुखी नाम रा°' इति श्लोकद्वयं प्रक्षिप्तमिति कतकः. ❀

39 Ñ1 illeg. for 39 (cf. v.l. 35). Ś1 om. 39 (cf. v.l. 38). —[a]) D3 T3 G2.3 M1 विभजामस्; D5 विभज्यापि (for °जाम). D1 समान्कालान्; D10 हलशो न (sic); D11 ममत्वेन (for ततः सर्वा). Ñ2 V B1.2.4 D6 विभजामो(B2 °म) वयं सर्वा; B3 °जामः समान्वेलान्; D2 °जामः समावीणान् (sic); D4 °जामः समाष्टीलां. —[b]) D3 संवादो (for विवादो). D10 रुच्यते (sic); D11 गाधते (for रोचते). —D5 om. (hapl.) 39[c] – 40. Ñ2 V B D6 om. 39[cd]. —[c]) D3 पानम् (for पेयम्). D1.4 शीघ्रं (for क्षिप्रं). D11 मेध्यमादीयतां क्षिप्रं. —[d]) D3 अल्पत्वे; G1 लेह्यं च; M1 मद्यं च (for माल्यं च). T1.3 G2 M3 Cg लेह्यमुच्चावचं बहु.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 25. 50
B. 5. 24. 43
L. 5. 19. 48

ततः शूर्पणखा नाम राक्षसी वाक्यमब्रवीत् ।
अजामुख्या यदुक्तं हि तदेव मम रोचते ॥ ४०
सुरा चानीयतां क्षिप्रं सर्वशोकविनाशिनी ।
मानुषं मांसमासाद्य नृत्यामोऽथ निकुम्भिलाम् ॥ ४१
एवं संभर्त्स्यमाना सा सीता सुरसुतोपमा ।
राक्षसीभिः सुघोराभिर्धैर्यमुत्सृज्य रोदिति ॥ ४२

इति श्रीरामायणे सुन्दरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

---

40 Ñ1 illeg. for 40 (cf. v.l. 35). Ś1 om. 40^{ab} (cf. v.l. 38). D5 om. 40 (cf. v.l. 39). —^{a}) D7–9.11 T2.3 G1.3 शूर्पणखी. ❀ Cr: शूर्पणखा रावणस्वसुरन्या।; so also Ck.t. ❀ —^{cd}) D7–9 T3 वै (for हि). Ñ2 V B1–3 D6 यदेवोक्तं. B4 अमुया च यदेवोक्तं (for °). Ś1 D1–4.10.11 अयो(D2.4 °धो)मुख्या यदेवोक्तं ममा(D2.11 °या)प्येतद्विवक्षितं.

41 Ñ1 illeg. for 41 (cf. v.l. 35). —^{a}) B3 सर्वा; G2 शीघ्रं (for क्षिप्रं). Ś1 D10.11 सुरामानयत क्षिप्रं; D1 सुरामानय क्षिप्रं च; D2–4 T2 सुरामानी(D4 °न; T2 °रां चानी)यतां क्षिप्रं. —^{b}) M1 -रोग- (for -शोक-). Ś1 D1.3.10 T2 -विनाशिनीं. Ñ2 V B1–3 D6 मांस्यं च(D6 मांसं*) विविधं बहु; B4 मद्यं च विविधं कुरु. —^{c}) Ś1 D10 आदाय; B2.3 D6 T1 G M1.3 आस्वाद्य; D2.4 अक्षीमो (for आसाद्य). —^{d}) B4 निर्यामश्च (sic); D1.5 T2 M1 °मोद्य(D5 °त्र); D4 °मश्च (for नृत्यामोऽथ). Ś1 D10 यथासुखं (for निकुम्भिलाम्). Ñ2 V B1–3 D6 प्रनृत्याम(V2 °मो) निकुंभिले; D2.11 नृत्यामश्च(D11 °मोद्य) निकुंभिले. —After 41, Ś1 Ñ2 V B D2.3.6.10.11 ins.:

571* उच्यमानैवमस्माभिः करोति वचनं न यत् ।
तस्मादेनामवष्टभ्य खादामः सहिता वयम् ।

[Ś1 D2.3.10 om. l. 1.—(l. 1) D6 [इ]यम् (for [ए]वम्). V1 B1 चेत् (for यत्). D11 न करोति वचो यतः (for the post. half).—(l. 2) Ś1 D2.3.10.11 एताम्; D6 इमाम् (for एनाम्). V1 B1.2 अवप्लुत्य; D2 °ष्टब्धां; D3 असंबद्धां (for अवष्टभ्य). Ś1 D10 भक्ष्याम (metri causa); V B1 D6.11 खादाम. D3 सकलाः पराः (for सहिता वयम्).]

42 ^{a}) Ñ V B D6–9 निर्भर्त्स्यमाना; D1.4.11 संतर्ज्यमाना. D4 om. सा. D3 राक्षसीनां वचः श्रुत्वा. —^{c}) D4 सु***; D7.9 विरूपाभिर् (for सुघोरा°). —^{d}) Ś1 Ñ V B D1–4 (D4 om. up to रु).6.10.11 धैर्यं त्यक्त्वा रुरोद ह(B3 साः; B4 च). ❀ Cr.m.g.t: रोदित्यरुदत्।; Ck: रोदिति। "रुदादिभ्यः सार्वधातुके" इतीट्. ❀ —After 42, Ś1 Ñ1 D1–4.10.11 ins.:

572* इत्युत्कटाभिरसकृत्परिभर्त्स्यमाना
सा राक्षसीभिरसितोत्पलपल्लवाक्षी ।
निश्वासधूममकरोन्मृगलाञ्छनस्य
तुल्यं मुखं तदधिकं तत एव चाभूत् ।

[(l. 1) Ś1 D3.10 अत्युत्कटाभिर्.—(l. 3) Ś1 Ñ1 निश्वास-. D4 -धूम्रम् (for -धूमम्). D1 शशि- (for मृग-). D3 दृष्ट्वा तदा हनुमता रुदती च सीता.—(l. 4) D1 तुल्याधिकं. D2.4.11 यद् (for तद्). D1.4 चासीत् (for °भूत्). D3 तस्यापि कोपः प्रचुरो बभूव (subm.).]

Colophon: Ñ2 V B D6 om. —*Sarga name*: Ś1 D1.4.10 सीतातर्जनः(Ś1 D10 °नं); Ñ1 सीताविभीषिका; D2 राक्षसीगर्जनः; D3 सीताविभीषणिका; D11 सीताभीषणः. —*Sarga no.* (figures, words or both): Ñ1 D1.2.4.10.11 om.; Ś1 20; D3 26; D5.7–9 T G M1.3 24; M2 23.—After colophon, G concludes with श्रीरामाय नमः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

२३

तथा तासां वदन्तीनां परुषं दारुणं बहु ।
राक्षसीनामसौम्यानां रुरोद जनकात्मजा ॥ १
एवमुक्ता तु वैदेही राक्षसीभिर्मनस्विनी ।
उवाच परमत्रस्ता बाष्पगद्गदया गिरा ॥ २
न मानुषी राक्षसस्य भार्या भवितुमर्हति ।
कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ३
सा राक्षसीमध्यगता सीता सुरसुतोपमा ।
न शर्म लेभे दुःखार्ता रावणेन च तर्जिता ॥ ४
वेपते स्माधिकं सीता विशन्तीवाङ्गमात्मनः ।
वने यूथपरिभ्रष्टा मृगी कोकैरिवार्दिता ॥ ५
सा त्वशोकस्य विपुलां शाखामालम्ब्य पुष्पिताम् ।
चिन्तयामास शोकेन भर्तारं भग्नमानसा ॥ ६
सा स्रापयन्ती विपुलौ स्तनौ नेत्रजलस्रवैः ।
चिन्तयन्ती न शोकस्य तदान्तमधिगच्छति ॥ ७

G. 5. 25. 55
B. 5. 25. 7
L. 5. 20. 2

23

Ñ$_2$ V B D$_6$ continue the previous Sarga. M$_2$ begins with श्रीरामाय नमः. The sequence of st. in Cv is as in text. It adds एष साक्षात्पाठक्रमः । अन्यः कोशेषु लेखकप्रमादकृतः ।; while in Cr, it is as follows: 1–7, 11–13, 8, 9. एवं पाठक्रमः । केषुचित्कोशेषु व्युत्क्रमस्तु लेखकप्रमादकृतः.

1 ^{a}) D$_{7.9}$ T$_{2.3}$ M$_1$ Ck अथ; Cv.r.m.g.t as in text (for तथा). D$_5$ ब्रुवंतीनां. Ś$_1$ D$_{1-4.10.11}$ तथा(Ś$_1$ इति; D$_3$ अथ) तासु वदंतीषु. —^{b}) Ś$_1$ V$_2$ D$_{10}$ वचः (for बहु). —After 1^{ab}, Ñ$_1$ ins.:

573* तुल्यदृष्टिर्विशालाक्षी घोरासु विकृतासु च ।

—^{c}) Ś$_1$ D$_{3.10}$ राक्षसीष्वतिघोरासु; Ñ$_1$ अथासौम्यासु राक्षसी (sic); B$_3$ राक्षसीनां च तच्छ्रुत्वा; D$_{1.4}$ राक्षसीषु सुघोरासु; D$_{2.11}$ राक्षसीष्वत्यसौम्यासु. —After 1, T$_2$ reads 7–9; while M$_1$ reads 7^{ab}.

2 B$_1$ om. 2–5. The sequence of st. 2–14 in Ś$_1$ Ñ$_1$ D$_{1-4.10.11}$ is 7–9, 2–3 (D$_1$ om. 3), 10^{ab}, 11, 14^{ab}, 10^{cd} (D$_{1.4}$ 10, 11, 14^{ab}), 12–13, 4–6 and 14^{cd} (Ś$_1$ D$_{10}$ om. 6 and 14^{cd}); while the sequence in Ñ$_2$ V B$_{2-4}$ D$_{5.6}$ G$_1$ is 7–9, 2–3, 10, 12–13 (D$_5$ repeats 12–13 after 11), 4–6, 11 and 14. —^{a}) T$_{1.3}$ च (for तु). D$_{1.4}$ सैवं संतर्जिता सीता. —^{b}) Ñ$_1$ B$_2$ अभिद्रुता (for मनस्विनी). D$_3$ रामं तं मनसागमत्. —After 2^{ab}, Ś$_1$ D$_{2.10}$ ins. l. 1 of 578*. —^{c}) D$_3$ भयेन (for उवाच). B$_3$ वचनं (for परम-). —^{d}) Ñ$_1$ -विह्वलया (for -गद्गदया). D$_1$ निश्वसंती मुहुर्मुहुः; M$_1$ ** संदिग्धया गिरा. —After 2, T$_2$ G$_1$ ins.:

574* रावणस्य नृशंसस्य वचनं कर्तुमर्हथ ।

3 B$_1$ om. 3 (cf. v.l 2). For sequence in Ś$_1$ Ñ V B$_{2-4}$ D$_{1-6.10.11}$ G$_1$, cf. v.l. 2. —^{a}) D$_3$ किं (for न). —^{d}) D$_4$ करिष्यामि न (by transp.).

4 B$_1$ om. 4 (cf. v.l 2). For sequence in Ś$_1$ Ñ V B$_{2-4}$ D$_{1-6.10.11}$ G$_1$, cf. v.l. 2. —^{ab}) B$_3$ राक्षसीनां (for सा राक्षसी-). —^{c}) D$_5$ शर्म न (by transp.). D$_{1.4.5.7-9}$ G$_3$ M$_2$ शोकार्ता (for दुःखार्ता). Ñ$_2$ V$_2$ B$_{2.3}$ D$_6$ तत्रालभत (for लेभे दुःखार्ता). —^{d}) B(ed.) [ए]व (for च). D$_{7.9}$ भर्त्सिता. B$_2$ राघवेण विवर्जिता.

5 B$_1$ om. 5 (cf. v.l. 2). For sequence in Ś$_1$ Ñ V B$_{2-4}$ D$_{1-6.10.11}$ G$_1$, cf. v.l. 2.—For 5^{ab}, Ś$_1$ Ñ$_1$ D$_{1-4.10.11}$ subst.:

575* प्रावेपताधिकं सीता स्वगात्रमिव चाविशत् ।

[D$_{1.4}$ साध्वी (for सीता). D$_{1.2.4}$ वाविशत् (for चा°).]; while Ñ$_2$ V$_2$ B$_{2-4}$ D$_6$ subst. for 5^{ab}:

576* स्वगात्रं प्रविशन्तीव सा चावेपत मैथिली ।

[Ñ$_2$ D$_6$ प्रावेपत; B$_3$ [अ]वेपत च (by transp.); B$_4$ [अ]न्वेपत (for चावेपत). V$_2$ प्रावेपत च.]

—^{c}) D$_{1.4}$ मृगी; D$_{6.11}$ वन- (for वने). Ś$_1$ यथा (for यूथ-). —^{d}) D$_{1.4}$ वने; D$_{11}$ मृगैर् (sic) (for मृगी). Ñ$_2$ D$_6$ व्याधैर्; B$_4$ लोकैर्; D$_{1-4.10.11}$ T$_{2.3}$ G$_3$ M$_1$ काकैर्; G$_1$ व्याघ्रैर्; Cr.m.g.t as in text (for कोकैर्).

6 For sequence in Ś$_1$ Ñ V B$_{2-4}$ D$_{1-6.10.11}$ G$_1$, cf. v.l. 2. Ś$_1$ D$_{10}$ om. 6. B$_1$ transp. 6 and 7. —^{b}) D$_4$ आलिंग्य; D$_{11}$ -माल्यसु- (sic) (for आलम्ब्य). Ñ$_1$ दुःखिता (for पुष्पिताम्). —^{c}) Ñ$_2$ V$_2$ B D$_6$ शोकार्ता (for शोकेन). —^{d}) Ñ V$_2$ B D$_{1-4.6.11}$ गतमानसा.

7 For sequence in Ś$_1$ Ñ V B$_{2-4}$ D$_{1-6.10.11}$ G$_1$, cf. v.l. 2. T$_2$ reads 7–9, while M$_1$ reads 7^{ab} after 1. B$_1$ transp. 6 and 7. —^{a}) Ś$_1$ संस्रापयंती. D$_8$ विमलौ (for विपुलौ). V B D$_6$ विपुलौ स्रा(V$_1$ B$_{2.4}$ स्र)पयंती सा. —^{b}) B$_2$ बाष्प- (for नेत्र-). D$_{11}$ नेत्रौश्रवैर्जलैः (corrupt). —^{c}) Ś$_1$ Ñ$_2$ V B D$_{6.10}$ च (for न). —^{d}) D$_1$ पारं सम्-; D$_5$ सा परम् (for तदान्तम्). Ś$_1$ D$_{10}$ पारं चानधिगच्छतिः Ñ$_2$ V B D$_6$ तस्यांतं नाध्य(V$_2$ °व)गच्छतिः D$_3$ चांतं तस्य जगाम सा. —After 7, Ś$_1$ Ñ V B D$_{1-4.6.10.11}$ ins.:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 26. 1
B. 5. 25. 8
L. 5. 20. 4

सा वेपमाना पतिता प्रवाते कदली यथा ।
राक्षसीनां भयत्रस्ता विवर्णवदनाभवत् ॥ ८
तस्याः सा दीर्घविपुला वेपन्त्याः सीतया तदा ।
ददृशे कम्पिनी वेणी व्यालीव परिसर्पती ॥ ९
सा निःश्वसन्ती दुःखार्ता शोकोपहतचेतना ।
आर्ता व्यसृजदश्रूणि मैथिली विललाप ह ॥ १०
हा रामेति च दुःखार्ता पुनर्हा लक्ष्मणेति च ।
हा श्वश्रु मम कौसल्ये हा सुमित्रेति भामिनी ॥ ११
लोकप्रवादः सत्योऽयं पण्डितैः समुदाहृतः ।
अकाले दुर्लभो मृत्युः स्त्रिया वा पुरुषस्य वा ॥ १२

577* सर्वोपायैरुपक्रम्य सीतां तां रावणस्त्रियः ।
तूष्णीं बभूवुर्युगपत्कृत्वाज्ञां भर्तुरादृताः ।

[(l. 1) Ś1 B1.2 D2 उपा(B1 अप)क्रम्य; Ñ1 उपागम्य (for उपक्रम्य). B3 सर्वैरुपायैराक्रम्य (for the prior half). D1–4.10.11 ता; D6 om. (hapl.) (for तां). Ñ2 V B D6 रावणायताः; D3.10 राक्षस° (for रावणस्त्रियः). —(l. 2) V2 तां (for [आ]ज्ञां). Ñ1 D11 आर्दि(D11 °दृ)तां; V2 D1.4 आवृताः; D2 आर्दिताः (for आदृताः).]

—Ñ2 V B D6 cont., while Ś1 D2.10 ins. l. 1 only after 2^{ab}:

578* राक्षसीनां विरूपाणां श्रुत्वा वाचः सुदारुणाः ।
अब्रवीद्भयसंविग्ना सीता बाष्पोत्तरं वचः ।
नूनं शरीरं मम पापकर्मा
शस्त्रैः शितैः छेत्स्यति राक्षसेन्द्रः ।
तस्मिन्ननागच्छति लोकनाथे [5]
गर्भान्विनष्टानिव शल्यहर्ता ।

Colophon.

[(l. 1) B3 वाक्यं सुदारुणं (for वाचः सुदा°). —(l. 2) B3 भयविग्ना सा (for °संविग्ना). V2 om. सीता. —(l. 3) B3 बत पापकर्मणः (for मम पापकर्मा). —(l. 5) D6 न चागच्छति. —(l. 6) B2 गर्भान्हि नष्टान्. V2 D6 -कर्ता; B4 -हंता (for -हर्ता). —Colophon: *Sarga name*: Ñ2 V B1 D6 राक्षसीतर्जनं; B2.3 राक्षसीगर्जनं; B4 सीतातर्जनं. —*Sarga no.* (figures, words or both): Ñ2 D6 25; V1 B4 26; V2 16; B2.3 24.]

8 For sequence in Ś1 Ñ V B2–4 D1–6.10.11 G1, cf. v.l. 2. B1 om. 8–10. D8 reads 8–9 after 13. —^{a}) Ś1 D1–4.10.11 सततं; Ñ1 प्रसभं; M2 मथिता (for पतिता). Ñ2 V1 B3.4 D6 प्राप(B3 श्रुत्वा)तद्वेपमाना सा; V2 B2 सततं वेपमाना सा. —^{c}) Ś1 Ñ1 D2.3.4.10.11 राक्षसीभ्योः D9 °सानां; Cm.g.t as in text (for °सीनां). Ñ2 V B2–4 D6 भयात्तत्र; D10 भयाच्चस्ता. —^{d}) D8 M1 विषण्ण- (for विवर्ण-).

9 For sequence in Ś1 Ñ V B2–4 D1–6.10.11 G1, cf. v.l. 2. B1 om. 9 (cf. v.l. 8). D8 reads 8–9 after 13. —^{a}) D7.9 G3 -बहुला (for -विपुला). Ñ2 V B2–4 D6 तस्याः सुविपुला दीर्घा. —^{b}) D5 वसंत्याः. Ñ2 V B2–4 D6 परमस्त्रियः; D8 G2 M2 सीतया तथा. —For 9^{ab}, Ś1 Ñ1 D1–4.10.11 subst.:

579* तस्याः सा कम्पमानाया दीर्घा सुविपुलासिता ।

[D2 सकंपमानाया.]

—^{c}) Ś1 D10 कंपिता; Ñ2 V B2–4 D6 दृश्यते (for ददृशे). Ś1 D10 रुचिरा; Ñ V B2–4 D1–7.9.11 T2 G3 M1 कंपिता; M3 शंसिनी (for कम्पिनी). —^{d}) Ñ2 V B2–4 D6 परिवर्तिनी(D6 °ता); G1 °सर्पिणी; Cr.m.g.t as in text (for °सर्पती). Ś1 Ñ1 D1–4.10.11 सर्पं(Ś1 D10 कंपं)ती भुजगी यथा. ❀ Cv.m.g.t: सीतयेत्यत्र(Cg °येति व्यत्ययेन) षष्ठ्यर्थे तृतीया। परिसर्पती परिसर्पन्ती(Cg °न्ती। नुमभाव आर्षः). ❀

10 For sequence in Ś1 Ñ V1(illeg. from 10 up to 5.24.12).2 B2–4 D1–6.10.11 G1, cf. v.l. 2. B1 om. 10 (cf. v.l. 8). —^{a}) Ś1 Ñ1 D3.10.11 निः(D10.11 नि)श्वसंत्यथ; Ñ2 V2 B2–4 निःश्वसंती च(B3 °ती सु-; B4 °त्यति-); D1.9 S सा निश्वसंती; D2 निश्वसत्यति-; D6 विश्वसंती स- (for सा निःश्वसन्ती). D7.9 शोकार्ता (for दुःखार्ता). —^{b}) Ś1 Ñ1 D1–4.10.11 भय-; Ñ2 V2 B2–4 D6 दुःख- (for शोक-). D2.4.11 -मानसा (for -चेतना). —^{c}) Ś1 D10 एवं (for आर्ता). D10 विसृजद्. D2 आर्ता विसृज्य चाश्रूणि. —^{d}) Ś1 Ñ2 V2 B2–4 D1.3.4.6.7.9–11 G1 M2 च (for ह).

11 For sequence in Ś1 Ñ V1(illeg.).2 B2–4 D1–6.10.11 G1, cf. v.l. 2. —^{a}) Ñ1 प्रचुक्रोश; D2.4.11 च (D4 om.[subm.]) शोकार्ता; D3 सुदुः° (for च दुःखार्ता). Ś1 D10 हा हा रामेति दुःखार्ता(D10 °खांता [sic]); Ñ2 V2 B D6 हा (D6 हे) राम इति शोकार्ता (with hiatus). —^{b}) Ñ2 V2 B D5–9 S transp. पुनर् and हा. Ñ1 लक्ष्मणेति पुनः पुनः. —^{d}) G1.2 सुमित्रेति च; M2 सुमित्रे चेति; Cr.m.g.t as in text (for हा सुमित्रेति). Ś1 D1–4.10.11 हा सुमित्रे ममेति च; Ñ1 सुमित्रे कैकयीति च; Ñ2 V2 B D6 सुमित्रे चैव भाविनि. ❀ Cr.m: सुमित्रेत्यत्र एकाराभाव आर्षः।; so also Cg.t. ❀

12 For sequence in Ś1 Ñ V1(illeg.).2 B2–4 D1–5(repeats 12).6.10.11 G1, cf. v.l. 2. B1 om. 12–13. —^{a}) B2 D1 लोके प्रवादः; D2 लोकापवादः. —^{b}) Ñ2 V2 B2–4 D6 उपलक्षितः (for समुदाहृतः). —^{c}) B3 दुर्भवोः D6 दुर्बले (sic) (for दुर्लभो). —^{d}) D1–4.5(both times).11 G M1.2 स्त्रियो (for स्त्रिया). B2 पुरुषेण. D1.4 च (for second वा).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

यत्राहमाभिः क्रूराभी राक्षसीभिरिहार्दिता ।
जीवामि हीना रामेण मुहूर्तमपि दुःखिता ॥ १३
एषाल्पपुण्या कृपणा विनशिष्याम्यनाथवत् ।
समुद्रमध्ये नौः पूर्णा वायुवेगैरिवाहता ॥ १४
भर्तारं तमपश्यन्ती राक्षसीवशमागता ।
सीदामि खलु शोकेन कूलं तोयहतं यथा ॥ १५
तं पद्मदलपत्राक्षं सिंहविक्रान्तगामिनम् ।
धन्याः पश्यन्ति मे नाथं कृतज्ञं प्रियवादिनम् ॥ १६
सर्वथा तेन हीनाया रामेण विदितात्मना ।
तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवितम् ॥ १७
कीदृशं तु मया पापं पुरा देहान्तरे कृतम् ।
येनेदं प्राप्यते दुःखं मया घोरं सुदारुणम् ॥ १८
जीवितं त्यक्तुमिच्छामि शोकेन महता वृता ।
राक्षसीभिश्च रक्षन्त्या रामो नासाद्यते मया ॥ १९
धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् ।
न शक्यं यत्परित्यक्तुमात्मच्छन्देन जीवितम् ॥ २० G. 5. 26. 18 B. 5. 25. 20 L. 5. 20. 21

इति श्रीरामायणे सुन्दरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

---

13 For sequence in Ś1 Ñ V1(illeg.).2 B2-4 D1-5(repeats 13).6.10.11 G1, cf. v.l. 2. B1 om. 13 (cf. v.l. 12). —[a]) B3 यतो; B4 (m. also) यदा (for यत्र). B2 D4 अति-; T1.3 M3 एवं (for आभिः). Ñ2 D6 क्रुद्धाभी; D4 -घोराभिर् (for क्रूराभी). D1 यथाहमपि घोराभिर्. ❀ Cm.g : यत्र यतः।; so also Ct. ❀ —[b]) Ñ2 V2 B2.4 D6 अभिद्रुता; B3 उपद्रुता (for इहार्दिता). D1.4 यातुधानाभिरर्दिता. —[c]) Ś1 D1-4.10.11 पतिना हीना; Ñ2 V2 B2-4 D6 पतिहीना च(B3 om. [subm.]); D5 (second time) यदि रामेण; D8 [अ]हं न रामेण (sic) (for हीना रामेण). Ñ1 यस्या विना * जीवामि (sic); D5 (first time) विना रामेण जीवामि. —[d]) B3 अपि च (hypm.); D2 इव (for अपि). —After 13, D8 reads 8-9.

14 For sequence in Ś1 Ñ V1(illeg.).2 B2-4 D1-6.10.11 G1, cf. v.l. 2. —[a]) D3.6.8 -पुण्य- (for -पुण्या). D2 निपुणा (sic) (for कृपणा). —[b]) T2 दीना क्लिश्यामि (for विनशिष्यामि). Ś1 Ñ1 D1-4.10.11 विनश्यामि यथातथं(Ś1 D10 °थं; D1.3 °तथा); Ñ2 V2 B D6 विनश्या (V2 D6 °नंक्ष्या)मि यथासुखं. —Ś1 D10 om. 14[cd]. B2 reads 14[cd] twice. —[c]) D11 ध्वस्ता (for पूर्णा). —[d]) D2 वायुवेगाद्. D1 [आ]हवे; D11 [अ]भवत् (for [आ]हता). Ñ2 V2 B D6 ताडिता मारुतैरिव(B1.2 °र्यथा).

15 V1 illeg. for 15 (cf. v.l. 10). —[a]) Ś1 D1.4.10 स्वम् (for तम्). —[b]) Ñ V2 B D6 पश्यंती राक्षसीगणं(V2 °णान्; B4 °कुलं); D1.4 राक्षसीनां वशं गता. —[c]) D8 ननु (for खलु). B1 दुःखेन. —[d]) Ś1 Ñ1 D1-4.10.11 कूलं तोयैरिवाप्लु(Ś1 D3.10 °वृ; Ñ1 °*)तं.

16 V1 illeg. for 16 (cf. v.l. 10). —[a]) B2.4 D1.2.4.6.11 -रक्ताक्षं; B3 -वक्त्रा° (for -पत्रा°). Ś1 D10 सुपद्मदलरूपाक्षं. ❀ Cv.g : पद्मदलपत्राक्षम्। दलतीति दलं विकसितपद्माक्षमित्यर्थः। यद्वा दलतीति दलं गर्भपत्रम्। विस्पष्टार्थमेकार्थे शब्दद्वयं वा. ❀ —[b]) B2 -विक्रम- (for -क्रान्त-). B1 सिंहविक्रमशालिनं. —[c]) Ś1 D3.10 तं रामं; Ñ1 illeg.; Ñ2 B1.2.4 D6 काकुत्स्थं; D2.11 वै रामं (for मे नाथं). B3 धन्या पश्यामि काकुत्स्थं. —[d]) Ś1 B3 D3.10 प्रियदर्श(D3 °र्शि)नं; D1.11 सत्यवादिनं.

17 V1 illeg. for 17 (cf. v.l. 10). —[c]) M2 विषं तीक्ष्णम् (by transp.). V2 B4 D1-4.11 T2 [आ]स्वाद्य. —[d]) D11 तव (sic) (for मम). D7.9 जीवनं. Ñ2 V2 B1.3.4 D6 transp. मम and जीवितं. B2 जीवितं दुर्लभं मम.

18 V1 illeg. for 18 (cf. v.l. 10). —[a]) V2 B4 हि (for तु). D5 T2 M1.2 पुरा; D6-9 महा- (for मया). G1 ईदृशं नु पुरा पापं. —[b]) Ś1 Ñ1 D1-4.10.11 पूर्व-(D2 °र्वं); B3 पर-; D5-9 T2 G1 M1.2 मया (for पुरा). M1.3 जन्मांतरे. —[cd]) D7.9 महा- (for मया). D7-9 transp. दुःखं and घोरं. Ś1 Ñ1 D1-4.10.11 यदि(D3 येने)यं प्राप्यतेवस्था मया(D1.4 °हा-) घोरा सुदारुणा; Ñ2 V2 B D6 यदयं प्राप्यते शोको मया घोरा च(B4 तु) यातना. ❀ Ck : सुदारुणमित्यनन्तरमेकः श्लोकः क्वचित्प्रक्षिप्तः. ❀ —After 18, G1.2 ins. 585* (G1 alone repeating it after 5.24.7).

19 V1 illeg. for 19 (cf. v.l. 10). After 19[ab], B3 reads 5.24. 3[c]-5[b]. —Ś1 D10 om. 19[cd]. —[c]) G1.2 तु (for च). Ñ1 D1-4.11 राक्षसीरक्षितत्वाच्च. ❀ Cr.m.g : रक्षन्त्या रक्ष्यमाणया. ❀ —[d]) Ñ1 D1-4.11 M2 कामो (for रामो). —For 19[cd], Ñ2 V2 B D6 subst. :

580* मया नावाप्यते कामो राक्षसीभिः सुरक्षितः।

[B4 रामो (for कामो). B4 राक्षसीकृतरक्षया (for the post. half).]

20 V1 illeg. for 20 (cf. v.l. 10). —[a]) D3 क्षीमतरं तु (sic) (for खलु मानुष्यं). —After 20[ab], Ś1 Ñ1 D1-4.10.11 ins. :

581* राक्षसीवशमापन्नं भर्त्स्यमानं सुदारुणम्।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

२४

G. 5. 26. 19
B. 5. 26. 1
L. 5. 20. 22

प्रसक्ताश्रुमुखीत्येवं ब्रुवन्ती जनकात्मजा ।
अधोमुखमुखी बाला विलप्तुमुपचक्रमे ॥ १
उन्मत्तेव प्रमत्तेव भ्रान्तचित्तेव शोचती ।
उपावृत्ता किशोरीव विवेष्टन्ती महीतले ॥ २
राघवस्याप्रमत्तस्य रक्षसा कामरूपिणा ।
रावणेन प्रमथ्याहमानीता क्रोशती बलात् ॥ ३
राक्षसीवशमापन्ना भर्त्स्यमाना सुदारुणम् ।
चिन्तयन्ती सुदुःखार्ता नाहं जीवितुमुत्सहे ॥ ४
न हि मे जीवितेनार्थो नैवार्थैर्न च भूषणैः ।
वसन्त्या राक्षसीमध्ये विना रामं महारथम् ॥ ५

[D1–4 -वशगा याहं; D11 -वशमापन्ना (for -वशमापन्न). D1–4.11 भर्त्स्यमाना.]

—^{c}) Ñ2 V2 B D6 यन्न शक्यं (by transp.); M1 न शक्यते (for न शक्यं यत्). —^{d}) Ś1 Ñ1 D10 स्वच्छंदेनात्म-; B3 आत्मनैव तु; T1.3 G3 मम छंदेन; Cg.k.t as in text (for आत्मच्छन्देन). —After 20, Ś1 Ñ2 B1.4 D3.6.10.11 ins. :

582* यस्मादपारैर्दुःखैर्मां प्राप्तां नयति नान्तकः ।

[B1 D6 अपारे दुःखे मां, B1 नांतिकं (sic) (for नान्तकः).]

Colophon : Ś1 Ñ V2 B D1.3.6.10.11 om. (cont. the Sarga). —*Sarga name* : D2.4 सीताविलापः. —*Sarga no.* (figures, words or both) : D2.4 om. ; D5.7–9 T G M1.3 25; M2 24. —After colophon, G concludes with श्रीरामाय नमः .

24

Ś1 Ñ V2 B D1.3.6.10.11 cont. the previous Sarga. M2 begins with श्रीरामाय नमः.

1 V1 illeg. up to 12 (cf. v.l. 5.23.10). —^{a}) D3 प्रसिक्ताश्रु-; D5.10 T2 प्रसृताश्रु-; D11 प्रशस्ताश्रु- (sic); Cm.g.k.t as in text (for प्रसक्ताश्रु-). Ñ2 V2 B1 D1.3.5.7.8 T1.2 M2 त्वेवं; B4 ह्येवं (for [इ]त्येवं). —B1 om. from जन in 1^{b} up to खाद in 586*. —^{b}) Ś1 B2 D2.3.10 रुदती; Ñ V2 B1.3.4 D6.7.9 T Ct ब्रुवती; D1 कुर्वंती; Cm.k as in text (for ब्रुवन्ती). —^{c}) B4 D7–9 अधोग(B4 °न)त- (for °मुख-). Ñ2 हीना; D6 दीना (for बाला). —^{d}) M1 प्रलप्तुम्; Cm.k.t as in text. Ñ2 V2 B2–4 D6 विललाप सुदुःखिता. ❀ Cm.k.t : विलपुं विलपितुम् . ❀ —For 1^{cd}, Ś1 Ñ1 D1–4.10.11 subst.; while B4 ins. after 1 :

583* अधोमुखी विलपितुं बाला समुपचक्रमे ।

—After 1, B2 ins. :

584* हा राम हा * सौमित्रे उवाच च पुनः पुनः ।

2 V1 illeg. for 2; B1 om. 2 (for both, cf. v.l. 1). —^{a}) Ś1 D10 रुदती च(D10 °तीव) (for उन्मत्तेव). D6 reads प्रमत्तेव in marg. —^{b}) Ś1 D1–4.10.11 भामिनी; Ñ1 जानकी; Ñ2 V2 B2–4 D6 चातुरा; Ck.t as in text (for शोचती). ❀ Ck.t : शोचती शोचन्ती. ❀ —^{c}) B2 D1.5.7.8 T2 उपावृत्त-; G1 उपविष्टा; Cr.m.g.k.t as in text (for उपावृत्ता). D1 च (for [इ]व). D11 कुमारी च (for किशोरीव). —Ñ1 illeg. for 2^{d}–3^{a}. —^{d}) Ś1 B3 D3.11 व्य(Ś1 वि)चेष्टत; Ñ2 V2 B2.4 D2.6 चेष्टमाना; D1.4.7–9 विचेष्टंती; D10 विवेष्टत (for विवेष्टन्ती).

3 V1 illeg. for 3; B1 om. 3 (for both, cf. v.l. 1). Ñ1 illeg. for 3^{a} (cf. v.l. 2). —^{a}) Ś1 Ñ2 B2 D1.2.4.6–10 M2.3 Cm.g.t प्रमत्तस्य; V2 B3 प्रशक्तस्य; B4 D5 G3 [अ]प्रमेयस्य; Cr as in text (for [अ]प्रमत्तस्य). ❀ Cr : अप्रमेयस्येति पाठः सम्यक्. ❀ —B3 reads 3^{c}–5^{b} after $5.23.19^{ab}$. —^{c}) D1 प्रविश्य (for प्रमथ्य). —^{d}) Ñ2 V2 B2–4 D6 रुदती (for क्रोशती). Ś1 Ñ1 D1–4.10.11 क्रोशंत्यपहृता बलात्.

4 V1 illeg. for 4; B1 om. 4 (for both, cf. v.l. 1). For sequence in B3, cf. v.l. 3. Ś1 om. 4–5^{b}. —^{b}) Ñ V2 D5.7–9 T2 च दारुणं(V2 °णा); D1.4 पुनः पुनः; D6 °णा; D10 मु * हतैः (for सुदारुणम्). —D10 om. 4^{c}–5^{b}. —^{c}) Ñ1 D1–4.11 G1 विचिंतयंती(Ñ1 D2.11 °यामि) (for चिन्तयन्ती सु-). —^{d}) Ñ V2 B2–4 D1–4.6.11 नाहं(Ñ2 V2 B2.3 D6 न हि) शक्ष्या(B3.4 °क्षो)मि जीवितुं.

5 V1 illeg. for 5; B1 om. 5 (for both, cf. v.l. 1). For sequence in B3, cf. v.l. 3. Ś1 D10 om. 5^{ab} (cf. v.l. 4). —^{a}) M1 च (for हि). M3 जीवितैरर्थो. —Ñ1 illeg. for ^{b}. —^{b}) V2 B3.4 [अ]पि; D5 वा; T1 G1 च (for [ए]व). Ñ2 B2 नाप्यर्थैन; D6 नाप्यर्थैं*; Cg नैवार्थैर्न (as in text). B2 D1–4 वि-; B3 [अ]पि; D11 [ए]व (for च). —^{c}) Ś1 B3 D10 वसंती. V2 B2.3 D1–4.6.10.11 रक्षसां (for राक्षसी-). —^{d}) Ñ2 V2 B2.4 D6 T1.3 G1 महाबलं; B3 सुदुःखिता (for महारथम्). —After 5, D7–9 T G3 M1.3 ins.; while G1.2 ins. after 5.23.18(G1 repeating it after 5.24.7) :

585* अश्मसारमिदं नूनमथवाप्यजरामरम् ।
हृदयं मम येनेदं न दुःखेन विशीर्यते ।

[(l. 1) G1(first time).2 अश्मसारमयं. —(l. 2) M1

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

धिङ्मामनार्यामसतीं याहं तेन विना कृता ।
मुहूर्तमपि रक्षामि जीवितं पापजीविता ॥ ६
का च मे जीविते श्रद्धा सुखे वा तं प्रियं विना ।
भर्तारं सागरान्ताया वसुधायाः प्रियंवदम् ॥ ७
भिद्यतां भक्ष्यतां वापि शरीरं विसृजाम्यहम् ।
न चाप्यहं चिरं दुःखं सहेयं प्रियवर्जिता ॥ ८
चरणेनापि सव्येन न स्पृशेयं निशाचरम् ।
रावणं किं पुनरहं कामयेयं विगर्हितम् ॥ ९
प्रत्याख्यातं न जानाति नात्मानं नात्मनः कुलम् ।
यो नृशंसस्वभावेन मां प्रार्थयितुमिच्छति ॥ १०
छिन्ना भिन्ना विभक्ता वा दीप्ते वाग्नौ प्रदीपिता ।
रावणं नोपतिष्ठेयं किं प्रलापेन बश्चिरम् ॥ ११
ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः ।
सद्वृत्तो निरनुक्रोशः शङ्के मद्भाग्यसंक्षयात् ॥ १२
राक्षसानां जनस्थाने सहस्राणि चतुर्दश ।
येनैकेन निरस्तानि स मां किं नाभिपद्यते ॥ १३

G. 5. 26. 32
B. 5. 26. 12
L. 5. 20. 34

यन्ममैतेन (for मम येनेदं). G1(first time).2 दुःखेन न (by transp.). T3 M3 [अ]वशीयते.]

6 V1 illeg. for 6; B1 om. 6 (for both, cf. v.l. 1). —a) B3 अनाथाम्. —b) B4 तेनाहं (by transp.). —c) Ñ2 V2 B2-4 D6.7.9.11 M1 Ct जीवामि; D4 तिष्ठामि (for रक्षामि). Ś1 Ñ1 D1-3.10 यन्मु(D1.3 न मु [sic]; D2 सुमु)हूर्तमपीच्छामि. —d) Ñ2 V2 B2-4 D5 जीवंती; D3.4.10.11 जीवितुं (for जीवितं). Ś1 B4 D6.7.9.10 -जीविका; Ñ2 B2.3 D1 -जीविकां; D2 -जीवितं; G1 -वर्जिता; Ck as in text (for -जीविता). ❀ Ck: पापजीवितेत्यनन्तरं "चरणेनापीत्यादि"। अत्र च मध्ये द्वौ श्लोकौ प्रक्षिप्तौ।; so also Ct. ❀

7 V1 illeg. for 7; B1 om. 7 (for both, cf. v.l. 1). D5.7.9 T2 M2 om. 7-8. —a) Ñ2 D6 वा (for च). V2 वा (for मे). Ñ1 D2-4.11 नास्ति मे; B3 का रामे; B4 का मेस्ति; Cr as in text (for का च मे). B2 वांछा (for श्रद्धा). Ś1 D10 जीविते नास्ति मे श्रद्धा. —b) V2 रतिः (for वा तं). Ś1 D1-4.10.11 विना प्रियं (by transp.); Ñ1 विना पतिं. —After 7, G1 repeats 585*.

8 V1 illeg. for 8 (cf. v.l. 1). B1 D5.7.9 T2 M2 om. 8 (cf. v.l. 1 and 7). —a) Ś1 Ñ2 V2 B2-4 D1-4.6.10.11 छिद्यतां (for भिद्यतां). Ñ1 छिद्यतां (for भक्ष्यतां). Ñ2 V2 B2-4 D6 वा मे; G1 मेद्य (for वापि). —c) Ś1 दारुणं नेदृशं दुःखं; Ñ2 V2 B2-4 D6 न चेदं(Ñ2 D6 चाहं; V2 चैव) सुमहद्दुःखं; D1.2.4 मा चिरं विविधं दुःखं; D3.11 अचिराच्चिरं दुःखं; D10 दारुणैरीरितं दुःखं. —d) D1 प्रियवर्जितं.

9 V1 illeg. for 9; B1 om. 9 (for both, cf. v.l. 1). —a) D11 T2 G1 [अ]प- (for [अ]पि). Ñ2 V2 D6 वामेन; Ct as in text (for सव्येन). —b) B3 D1 स्पृशेयं न (by transp.). Ñ2 V2 B2-4 D6 कदाचन (for निशाचरम्). —c) G2 तं (for किं). Ñ V2 B2-4 D1-4.6.11 नीचं (for अहं). Ś1 D10 किं पुना रावणं नीचं. —d) Ś1 कामयेय. Ñ2 V2 B2-4 D6 पृथग्जनं; D7.9 निशाचरं (for विगर्हितम्).

10 V1 illeg. for 10; B1 om. 10 (for both, cf. v.l. 1). Ñ2 om. 10ab. —a) Ś1 Ñ1 D1.7-11 T2 M1 Cv.k.t प्रत्याख्यानं(Ś1 Ñ1 D10 °तो); V2 B2-4 D6 °दिष्टः(V2 B4 °ष्टं); Cr.m.g as in text (for °ख्यातं). B2-4 D2.6 स; D10 वि-; Cv.t as in text (for न). Ś1 Ñ1 D1-4.10.11 जानीते; Cv.t as in text (for जानाति). —b) Ś1 D10 आत्मानं (with hiatus) (for ना°). —c) Ś1 Ñ1 D1-4.11 -प्रभावोयं(D1 °वेन; D3.11 °वो मां); D10 -स्वभावत्वात् (for -स्वभावेन). —d) T3 G1 मा (for मां). Ś1 Ñ1 D1.2.10 धर्षयितुम्; Ñ2 B2-4 D6 परम्रष्टुम्; V2 वा *स्पर्ष्टुम्; Ck.t as in text (for प्रार्थयितुम्). D3.4.11 प्रधर्षयितुम्.

11 V1 illeg. for 11 (cf. v.l. 1). —a) D7.9 प्रभिन्ना (for विभक्ता). —b) D7.9 T2 दीप्ता (for दीप्ते). Ś1 Ñ1 [ऽ]ग्नौ वा (by trasp.); D1.3.8.11 चाग्नौ (for वाग्नौ). Ś1 Ñ1 D2-4 प्रवेशिता; D1 प्रवेशनात् (for प्रदीपिता). D10 प्रदीप्तेग्नौ प्रवेशिता. ❀ Cv.r: दीप्ते वेत्यत्र वेति पदच्छेदः. ❀ —For 11ab, Ñ2 V2 B D6 subst.:

586* छित्त्वा भित्त्वापि खादन्तां दीप्ते वाग्नौ प्रवेश्यताम् ।

[B1 om. up to खाद (cf. v.l. 1). V2 B4 छित्त्वा (for भित्त्वा). Ñ2 B2 D6 च (for [अ]पि). Ñ2 D6 खादंतु. Ñ2 V2 B2 दीप्ता (for दीप्ते). V2 B1 D6 च (for वा). B4 प्रदीयतां.] —d) Ś1 विलापेन. B3 वा परं; D1.10.11 वा चिरं; T2 निश्चयं (sic); Ct as in text (for बश्चिरम्).

12 V1 illeg. for 12 (cf. v.l. 1). —a) D2.10 प्रज्ञः (for प्राज्ञः). D1.11 ख्यातप्रज्ञः. Ñ2 V2 B D6 कुलीनश्च. T2 स (for च). —b) D2 [ऽ]थ; T2 स (for च). —c) Ś1 D1.10 सांप्रतं; Ñ2 B3.4 D3.4.6.11 T1.3 G3 M2 Ck संवृत्तो; B2 पंडितो; D8 G2 M1 सुवृत्तो; Cg as in text (for सद्वृत्तो). —d) B3 om. शङ्के. D4.10 सद्भाग्य- (for मद्भाग्य-). Ñ2 D11 -संचयात् (sic); D1 M1 -संक्षये; G1 -सुक्षयात्; Cr.m.g.k.t as in text.

13 ab) B1 सहस्राणां. T1.3 G2 M3 सहस्राणि जनस्थाने (by transp.). —c) D7-9 T2 एकेनैव (for येनैकेन).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 26. 0
B. 5. 26. 13
L. 5. 20. 0

निरुद्धा रावणेनाहमल्पवीर्येण रक्षसा ।
समर्थः खलु मे भर्ता रावणं हन्तुमाहवे ॥ १४
विराधो दण्डकारण्ये येन राक्षसपुंगवः ।
रणे रामेण निहतः स मां किं नाभिपद्यते ॥ १५
कामं मध्ये समुद्रस्य लङ्केयं दुष्प्रधर्षणा ।
न तु राघवबाणानां गतिरोधी ह विद्यते ॥ १६
किं नु तत्कारणं येन रामो दृढपराक्रमः ।
रक्षसापहृतां भार्यामिष्टां नाभ्यवपद्यते ॥ १७
इहस्थां मां न जानीते शङ्के लक्ष्मणपूर्वजः ।
जानन्नपि हि तेजस्वी धर्षणां मर्षयिष्यति ॥ १८
हृतेति योऽधिगत्वा मां राघवाय निवेदयेत् ।
गृध्रराजोऽपि स रणे रावणेन निपातितः ॥ १९
कृतं कर्म महत्तेन मां तदाभ्यवपद्यता ।
तिष्ठता रावणद्वंद्वे वृद्धेनापि जटायुषा ॥ २०
यदि मामिह जानीयाद्वर्तमानां स राघवः ।
अद्य बाणैरभिक्रुद्धः कुर्याल्लोकमराक्षसम् ॥ २१

—[a]) Śi Ñ V B D1-4.6.10.11 Ck स मां(D6 मा) नाभ्युप (Śi Ñ1 D1-4.10 Ck °भ्यव)पद्यते. ❀ Ck : अतः परं कामं मध्य इत्यादि। अत्र च मध्ये द्वौ श्लोकौ प्रक्षिप्तौ क्वचित्।; Ct : एतदुत्तरं कामं मध्य इति। मध्ये, निरुद्धा रावणेन; समर्थः खलु मे; विराधो दण्डकारण्ये; रणे रामेण इति श्लोकौ प्रक्षिप्ताविति कतकः. ❀

14 G2 om. (hapl.) 14-15. Ñ2 V B D1.2.6 om. 14. —[a]) Śi Ñ1 D10.11 [इ]हः; Ck as in text (for [अ]हम्). —[b]) Śi Ñ1 D10 स्वल्प-; D11 स्वेन; Ck as in text (for अल्प-). Śi Ñ1 D3.4.10.11 वीर्यवान्(D3.4 °तः); Ck as in text (for रक्षसा). —[c]) Śi Ñ1 D10.11 कथं नु; Ck as in text (for समर्थः). Śi Ñ1 D10.11 मां (for मे). —Ñ1 illeg. for [d]. —[d]) Śi D3.4.10.11 रामो नाभ्यव (D11 °भ्युप)पद्यते(Śi °वर्तते).

15 G2 om. 15 (cf. v.l. 14). Ñ2 V B D6 read 15 after 18. —[a]) D4.6.8 विरोधो (sic); Ck as in text. —[c]) Śi Ñ V B D1-4.6.10.11 शरेणैकेन; Ck as in text (for रणे रामेण). —[d]) Śi Ñ V B D1-4.6.7.9-11 T2 G1 Ck स मां(D6 मा) नाभ्यव(Ñ2 V B D6.11 °भ्युप)पद्यते.

16 Ñ2 V B D6 read 16 after 24[ab]. —[a]) D11 कथं (for कामं). —[b]) Ñ2 V B D6 दुर्धर्षा(V1 B4 °र्जया) रक्षसां(V2 राक्षसी) पुरी. —[c]) D4.10 नु; Ct as in text (for तु). V2 B1.2.4 रामस्य (for राघव-). —[d]) Śi Ñ1 D1-4 अप्राप्या(D2.3 °प्य मुप(Ñ1 D1 °भव)धारये; Ñ2 V B D6 अप्राप्यं भुवि विद्यते; D5.7-9 Ct गतिरोधो भविष्यति(D5 हि विद्यते; D8 °त्र दृश्यते); D10 अप्राप्येत्युपधारये; D11 न प्राप्येत्यवधारये.

17 Ñ2 V B D6 om. (hapl.) 17. —[a]) D2-4.8-10 M3 किं(D2 तं [sic]) तु (for किं नु). Śi D10 किं (sic) (for तत्). —[cd]) D1 भार्यां शिष्टां (sic); G1 दृष्ट्वा मां च (for भार्यामिष्टां). D7.9 यो नाभिपद्यते; D8.11 नाभ्युपपद्यते; G2 नाद्यावपद्यते.

18 [a]) B3 इह स्थानं; G3 इह ** (damaged); Cm.g.k.t as in text (for इहस्थां मां). B2 नाभि- (for मां न). G1 जानाति. —[b]) Ñ2 V B D6 नूनं (for शङ्के). —D9 reads from जस्वी in [c] up to [d] in marg. —[c]) V1 B2.4 D1-4.6.11 G2 M1.2 न हि; T2 इह (for अपि). Śi Ñ V B D T2 G2 M1.2 स (for हि). —[d]) B3 न धैर्यं; D5 T2 M3 धर्षणं. —After 18, Ñ2 V B D6 read 15.

19 [a]) Śi Ñ1 D1.3.4.8.10.11 M2 योभि(Śi Ñ1 °ति; D11 °पि)गत्वा मां; Ñ2 V B1.3.4 D6 यो हि मां ग(Ñ2 D6 ज्ञा)त्वा; B2 यो मां स गत्वा च (hypm.); D2 योपि मां गत्वा; D7.9 Ct मां योधिगत्य; Ck as in text (for योऽधिगत्वा मां). —[b]) G1 M1 न्यवेदयेत् (sic). —After 19[ab], Śi Ñ1 D1-4.10.11 ins. :

587* सुमहत्तेन कल्याणं कृतं स्याल्लोकनन्दनम्।

—Thereafter Ñ1 cont. :

588* न तं पश्यामि तदानीं सुहृदं करुणालयम्।

—[c]) Ñ1 च; D5.8 T2 G1.2 M1 हि (for sपि). M2 हि (for स). Śi Ñ1 D2.10.11 समरे. Ñ2 V B D6 रणे सोपि (by transp.) (for sपि स रणे). D1.3.4 स गृध्रराजः समरे.

20 [a]) Śi Ñ1 B2 D2.3.10.11 transp. कर्म and तेन. —Ñ2 V B D6 transp. [b] and [d]. —[b]) D3.4 मा (for मां). M3 Cm तथा (for तदा). Śi D1 [अ]भ्यव(D1 [अ]भ्युप)गच्छता; Ñ2 V B D2.6.11 [अ]भ्युपपद्यता; D10 स्वरराच्छता (corrupt); M1 ह्यवपद्यता. ❀ Cr : मां तदाभ्यवपद्यता मामुद्दिश्य विपद्यतेत्यर्थः। परस्मैपदमार्षम्. ❀ —[c]) Ñ1 रावणे; D1.2.5.6 T1.3 रावणं; M1 परम- (for रावण-). Ñ1 D6 युद्धे; D7.9 Ck.t -वधे; Cr.m.g.tp as in text (for -द्वंद्वे). ❀ Ck : 'रावणवधे' इति पाठः। रावणवधार्थयत्न इत्यर्थः।; Ct : रावणवधे तिष्ठता रावणवधार्थं यतता। 'रावणद्वंद्वे' इति पाठे रावणेन सह द्वंद्वयुद्ध इत्यर्थः. ❀ —[d]) D11 गृध्रेणापि; M1 वृद्धेन हि (for वृद्धेनापि). Ñ1 गतायुषा; G3 ज****.

21 [a]) D1.3.4 G3 अभि-; Ck as in text (for इह). —[b]) D5.7.9 हि (for स). Ñ2 V B D6 तिष्ठंतीं रावणालये. —D5 reads 21[cd] in marg. —[c]) D3.4 अथ (for अद्य). Ñ1 D10.11 G3 अति-; Ñ2 V B D6 सुसं-; G1 M1.2 अपि

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

विधमेच्च पुरीं लङ्कां शोषयेच्च महोदधिम् ।
रावणस्य च नीचस्य कीर्तिं नाम च नाशयेत् ॥ २२
ततो निहतनाथानां राक्षसीनां गृहे गृहे ।
यथाहमेवं रुदती तथा भूयो न संशयः ।
अन्विष्य रक्षसां लङ्कां कुर्याद्रामः सलक्ष्मणः ॥ २३
न हि ताभ्यां रिपुर्दृष्टो मुहूर्तमपि जीवति ।
चिताधूमाकुलपथा गृध्रमण्डलसंकुला ।
अचिरेण तु लङ्केयं श्मशानसदृशी भवेत् ॥ २४

अचिरेणैव कालेन प्राप्स्याम्येव मनोरथम् ।
दुष्प्रस्थानोऽयमाख्याति सर्वेषां वो विपर्ययः ॥ २५
यादृशानि तु दृश्यन्ते लङ्कायामशुभानि तु ।
अचिरेणैव कालेन भविष्यति हतप्रभा ॥ २६
नूनं लङ्का हते पापे रावणे राक्षसाधिपे ।
शोषं यास्यति दुर्धर्षा प्रमदा विधवा यथा ॥ २७
पुण्योत्सवसमृद्धा च नष्टभर्त्री सराक्षसा ।
भविष्यति पुरी लङ्का नष्टभर्त्री यथाङ्गना ॥ २८

G. 5. 26. 0
B. 5. 26. 26
L. 5. 20. 49

(for अभि-). D2 स बाणैरपि संक्रुद्धः. —[d]) Ñ2 V B D6 कुर्यांलंकामराक्षसां(B4 °सीं).

22 [a]) Śi D10 विध्वंसेच्च; Ñ1 प्रविशेत्तु; B1 विध्वंसयेत्; D5.7.9 निर्दहेच्च. —[b]) Ñ2 D7.9 निर्दहेच् (for शोषयेच्). Ñ1 तु (for च). Ñ2 V B D6 महार्णवं. —[c]) D8 [अ]द्य (for च). B3 सर्वंशस्य (for च नीचस्य). —[d]) Ñ2 V B D2.6 दुष्कुलं नावशेषयेत्.

23 [b]) Śi D2.10 Cv राक्षसानां; D11 om. (hapl.?); Cg as in text (for राक्षसीनां). —[c]) B2 ममैव; Cr.m.g.k.t as in text (for [अ]हमेवं). Ñ2 V B D1.3.4.6 रुदितैः (for रुदती). —[d]) T1.2 G1.2 भूयान्; Cv as in text (for भूयो). M1 भविष्यति (for न संशयः). Śi Ñ V B D1–4.6.10.11 प्रगीतेव(Śi Ñ1 D10 °भाते च; Ñ2 V1 D6 °गीते च) पुरी भवेत्. —[e/]) V B4 D2–4 अन्वेष्य(D3.4 °ष्य); T1.3 G1 अन्वीक्ष्य; G3 अ**; Cv as in text (for अन्विष्य). V2 B1 G1 राक्षसीं; D1–4 T1 G3 M1 राक्षसान्; Cv as in text (for रक्षसां). M1 लोकान् (for लङ्कां). Śi Ñ1 D10.11 विनष्टराक्षसां लंकां(Śi °साँल्लोकान्); Ñ2 D6 अन्वीक्ष्य(Ñ2 तां वीक्ष्य) भस्मसाल्लंकां (for [e]). D2 सह- (hypm.) (for स-). B3 रामलक्ष्मणयोर्युद्धे शरैरा-शीविषोपमैः. ❀ Cv.r: अन्विष्य रक्षसामिति पाठः. ❀

24 [a]) Śi D10.11 शरैः स्पृष्टो; Ñ1 D1–4 शरैर्दृष्टो (D3.4 °र्दग्धो) (for रिपुर्दृष्टो). Ñ2 V B D6 न तयोर्हि शरैः स्पृ(B1 °रैर्दृ)ष्टो. —After 24[ab], Ñ1 ins.:

589* दुष्टात्मासौ दुराचारो रावणो लोककण्टकः।

—After 24[ab], Ñ2 V B D6 read 16. —[c]) Ñ1 D11 -धूमाकुला चासौ(D11 चैव). —After 24[c], D11 ins.:

590* गृहधूमाकुला तथा।
शिवाशताकुला चैव.

—[d]) D7–9 -मंडिता (for -संकुला). —[e]) D8 [ए]व (for तु). Śi Ñ V B D2–4.6.10.11 पुरी लंका; D7.9 [ए]व कालेन (for तु लङ्केयं). —D9 reads [f] in marg.

25 [a]) Śi Ñ1 D1–4.10.11 नाति(Śi Ñ1 तं न)दीर्घेण (for अचिरेणैव). —[b]) Śi प्राप्यसे (sic). Śi B4 तन् (sic); V D2 [ए]तन् (sic); B3 [ए]तं; D1.3.4.6–9.11 M1 [ए]नं; D5 T2.3 [ए]वं (for [ए]व). D11 महारथं. D10 प्राप्यते स मनोरथः. —After 25[ab], B2 ins.:

591* भविष्यति तदा कार्यं मम वाक्यानुसारतः।

—[c]) Śi Ñ1 D1–4.8.10.11 G1 दुःप्र(Śi D10 G1 दुष्प्र)स्थानं (Ñ1 °नो). Śi D2.8.10.11 स(D8 म)माख्याति; Ñ1 D7.9 Ct [s]यमाभाति; D1.3.4 यथाख्याति(D1 °मि); D5 [s]यमाख्यातः; Cm as in text (for sयमाख्याति). —[d]) Śi Ñ1 D1.3.4.10 हि; D11 च (for वो). Śi Ñ1 D1.4.8.10.11 S Cm विपर्ययं; Ct °र्ययः (as in text). D2 दुःखस्यास्य विपर्ययात्. —For 25[cd], Ñ2 V B D6 subst.:

592* दुष्टात्मायं यथाख्याति राक्षसो वधमात्मनः।

[Ñ2 B2 D6 न जानाति (for यथाख्याति). B2 रावणो. B3 रक्षसो धर्मम् (for राक्षसो वधम्).]

26 Ñ2 V B2–4 D6 om. 26–49. B1 om. 26. —[a]) D5 T2 Ck तादृशानि; Cr.m.g.t as in text. Śi Ñ1 D1–4.10.11 T1.3 G3 M3 Cg [इ]ह; M2 च (for तु). —[b]) Śi Ñ1 D1–4.10.11 M2 च; T1.3 G2 M3 वै (for तु). —[c]) T1.3 M3 तु (for [ए]व).

27 Ñ2 V B2–4 D6 om. 27 (cf. v.l. 26). B1 reads 27–29 in marg. —[a]) D3 काल-; T2 लोके (for लङ्का). D1 -पतौ (for हते). Śi Ñ1 D2–4.10.11 हते लंकापतौ चापि(D2–4 पापे). —[b]) D3 रामेण (for रावणे). Śi D10 राक्षसेश्वरे; B1 D3.4 T1.3 M3 राक्षसाधमे; D1 राक्षसे हते. —[c]) Śi D5.10 शोकं; Ñ1 illeg.; D2.4 हानिं (for शोषं). D7–9 एष्यति (for यास्यति). D11 शोचयिष्यति. D3 लंकेयं (for दुर्धर्षा). —[d]) D3 गृहिणी (for प्रमदा).

28 Ñ2 V B2–4 D6 om. 28 (cf. v.l. 26). B1 reads 28 in marg. (cf. v.l. 27). —[a]) D1 पुष्पोत्सव-; D11 नानो° (for पुण्योत्सव-). Śi Ñ1 B1 D2–4.10.11 [अ]पि (for च). —D5 om. (hapl.) 28[bc]. —[b]) Śi B1 D3.10 दु(B1 न)ष्टसत्त्वा स-; Ñ1 दुष्टसंभ्रम-; D1.2.4.11 नष्टसं(D11 °वि)त्रस्त-; M1 °पत्नी स- (for नष्टभर्त्री स-). —[c]) Śi D10 विनश्यति; D3 विनंक्ष्यति. —M2 om. (hapl.) 28[d] –

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 26. 42
B. 5. 26. 27
L. 5. 20. 0

नूनं राक्षसकन्यानां रुदन्तीनां गृहे गृहे ।
श्रोष्यामि नचिरादेव दुःखार्तानामिह ध्वनिम् ॥ २९
सान्धकारा हतद्योता हतराक्षसपुंगवा ।
भविष्यति पुरी लङ्का निर्दग्धा रामसायकैः ॥ ३०
यदि नाम स शूरो मां रामो रक्तान्तलोचनः ।
जानीयाद्वर्तमानां हि रावणस्य निवेशने ॥ ३१
अनेन तु नृशंसेन रावणेनाधमेन मे ।
समयो यस्तु निर्दिष्टस्तस्य कालोऽयमागतः ॥ ३२
अकार्यं ये न जानन्ति नैर्ऋताः पापकारिणः ।
अधर्मात्तु महोत्पातो भविष्यति हि साम्प्रतम् ॥ ३३
नैते धर्मं विजानन्ति राक्षसाः पिशिताशनाः ।
ध्रुवं मां प्रातराशार्थे राक्षसः कल्पयिष्यति ॥ ३४
साहं कथं करिष्यामि तं विना प्रियदर्शनम् ।
रामं रक्तान्तनयनमपश्यन्ती सुदुःखिता ॥ ३५
यदि कश्चित्प्रदाता मे विषस्याद्य भवेदिह ।
क्षिप्रं वैवस्वतं देवं पश्येयं पतिना विना ॥ ३६
नाजानाज्जीवतीं रामः स मां लक्ष्मणपूर्वजः ।
जानन्तौ तौ न कुर्यातां नोर्व्यां हि मम मार्गणम् ॥ ३७

30^{c}. —^{d}) Ś1 B1 D2.5.10.11 -भर्ता (sic); D1.4 -नाथा (for -भर्त्री). B1 यथाबला.

29 Ñ2 V B2–4 D6 M2 om. 29 (cf. v.l. 26 and 28). B1 reads 29 in marg. (cf. v.l. 27). —^{b}) Ś1 Ñ1 D2.7.10.11 T3 G1.3 M1 रुदतीनां. —^{c}) D2 श्रोष्यंति. —^{d}) D10 दुःखांतानां (sic). Ś1 Ñ1 D1–4.10.11 महा-; B1 अहं; D7.9 T2 Cm*p*.k.t इव; G1 अपि (for इह). ❀ Ct : दुःखार्तानामिव इति पाठः. ❀

30 Ñ2 V B2–4 D6 om. 30 (cf. v.l. 26). M2 om. 30^{abc} (cf. v.l. 28). B1 om. 30–49. —^{a}) T2 हतोद्याना. —^{b}) M1 गत- (for हत-). —For 30, Ś1 Ñ1 D1–4.10.11 subst.:

593* सान्धकारमिवोद्योतं हते राक्षसपुंगवे ।
भविष्यति समुन्मोक्षो मेघानां शरदीव मे ।

[(l. 1) D11 इवोद्यानं. —D3 om. from l. 2 to st. 31. —(l. 2) D1 खयातानां; D4 स वै मोक्षो (for समुन्मोक्षो). D1 शरदागमे.]

31 Ñ2 V B D3.6 om. 31 (cf. v.l. 26 and 30). M2 om. 31^{ab}. —^{a}) D8 रामः (for नाम). —^{b}) D8 इह (for रामो). G1 रक्तांत * * *. —^{c}) D2 मे; D7.9 Cr.m.g.k मां; D8 Ct यां (for हि). —D9 reads ^{d} in marg. —^{d}) D2.7.9 T1 Ck.t राक्षसस्य; Cr.m.g as in text.

32 Ñ2 V B D6 om. 32 (cf. v.l. 26 and 30). —^{a}) D3 च (for तु). —^{b}) D11 T2 M2 च (for मे). —^{c}) D2 च; D3 हि (for तु). —^{d}) Ś1 Ñ1 D1–4.10.11 [ऽ]ति(Ñ1 D11 [ऽ]सि; D4 न)वर्तते (for ऽयमागतः). —After 32, D7.9 ins.:

594* स च मे विहितो मृत्युरस्मिन्दुष्टेन वर्तते ।

33 Ñ2 V B D6 om. 33 (cf. v.l. 26 and 30). D3 om. 33. —^{a}) Ś1 जानातु (sic) (for जानन्ति). —^{b}) D2.5.8.11 G1 M1.2 पापचारिणः; Cm.g.k.t as in text. Ś1 D10 राक्षसाः पिशिताशिनः. —^{c}) D5 तैर् (for तु). T2 महोत्पाता. Ś1 Ñ1 D1.2.4.10.11 धर्मात्ते(Ś1 Ñ1 D10 धर्मस्ते; D4 कर्म ते)षां महाघातो. —^{d}) T2 भविष्यंति; Cm.g.t as in text. Ś1 D1.2.4.10.11 मां प्रति; Ñ1 मां विभो (for साम्प्रतम्). ❀ Ct : नञोऽत्रानुकर्ष इति कतकः. ❀

34 Ñ2 V B D6 om. 34 (cf. v.l. 26 and 30). Ś1 D2 om. 34^{ab}. —^{ab}) D5 T2 Cr ते (for [ए]ते). D11 प्रजीवंति (for विजानन्ति). D4 पिशिताशिनः. D10 नैर्ऋताः पापकर्मणः (metri causa) (for ^{b}). D3 नैष धर्मं विजानाति राक्षसः पिशिताशनः. —D5 repeats 34^{c}–35^{b} after 48^{ab}. —^{c}) Ś1 Ñ1 D1.5 (both times) T2 Ck.t प्रातराशार्थं (D1 °य); D4 प्रति नाशाय; D10 प्रातव्याढर्थं (sic) (for प्रातराशार्थे). —^{b}) Ś1 Ñ1 D1.2.4.10.11 योजयिष्यति (for कल्प°). D3 क्रूरः संयोजयिष्यति.

35 Ñ2 V B D6 om. 35 (cf. v.l. 26 and 30). D5 repeats 34^{c}–35^{b} after 48^{ab}. —^{a}) Ś1 Ñ1 D1.2.10.11 भविष्यामि; M1 चरि°; Ct as in text (for करि°). —^{b}) Ś1 Ñ1 D1–4.10.11 वीरं (for विना). D1 प्रियदर्शिनं. —^{c}) Ś1 राजीवपत्राक्षम्. —^{d}) Ś1 D10 च (for सु-).

36 Ñ2 V B D6 om. 36 (cf. v.l. 26 and 30). D3.7 om. 36. D9 transp. 36 and 37^{ab}. —^{b}) D8 विषमद्य. Ś1 D10 T1.3 G1.2 भविष्यति; D5 भवेदिति (for भवेदिह). —^{c}) Ñ1 विवस्वतं (sic). D10 चैवं (for देवं). —^{d}) D4 पश्येहं. ❀ Ct : पतिनेति नाभाव आर्षः. ❀

37 Ñ2 V B D6 om. 37 (cf. v.l. 26 and 30). D9 transp. 36 and 37^{ab}. —^{a}) M1 जानकीं (for नाजानाज्). Ś1 Ñ1 D1–4.10.11 न जाने ध्रि(Ś1 Ñ1 D11 म्रि)यते(D3 परतो) रामः. ❀ Cg.k.t : जीवतीं जीवन्तीम्. ❀ —^{b}) Ś1 Ñ1 D1.3.10.11 वा; D2 तु; D4 च (for मां). Ñ1 D1.2.4.11 शत्रुघ्न-; D3.7.9 G1 M2 भरत- (for लक्ष्मण-). —^{c}) D1–4.11 G1 जीवंतौ; Cv.g.k.t as in text (for जानन्तौ). D7 तु (for तौ). Ś1 Ñ1 D10 जीवंतौ न प्रकुर्यातां; M1 जानंतौ *ततः कुर्यात् (sic). ❀ Cv : जानन्तौ तौ न कुर्यातामिति पाठः. ❀ —^{d}) D5.7–9 T2 Ct परि- (for मम). D1 पृथिव्यामपि; D2 मौर्व्यामपि हि (sic); D3 कथं तु परि-; D4 नोर्व्यामपि हि मम (hypm.); D11

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

नूनं ममैव शोकेन स वीरो लक्ष्मणाग्रजः ।
देवलोकमितो यातस्त्यक्त्वा देहं महीतले ॥ ३८
धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
मम पश्यन्ति ये नाथं रामं राजीवलोचनम् ॥ ३९
अथवा न हि तस्यार्थो धर्मकामस्य धीमतः ।
भया रामस्य राजर्षेर्भार्यया परमात्मनः ॥ ४०
दृश्यमाने भवेत्प्रीतिः सौहृदं नास्त्यपश्यतः ।
नाशयन्ति कृतघ्नास्तु न रामो नाशयिष्यति ॥ ४१
किं नु मे न गुणाः केचित्किं वा भाग्यक्षयो हि मे ।
याहं सीता वरार्हेण हीना रामेण भामिनी ॥ ४२
श्रेयो मे जीवितान्मर्तुं विहीना या महात्मना ।
रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात् ॥ ४३
अथवा न्यस्तशस्त्रौ तौ वने मूलफलाशनौ ।
भ्रातरौ हि नरश्रेष्ठौ चरन्तौ वनगोचरौ ॥ ४४
अथवा राक्षसेन्द्रेण रावणेन दुरात्मना ।
छद्मना घातितौ शूरौ भ्रातरौ रामलक्ष्मणौ ॥ ४५
साहमेवंगते काले मर्तुमिच्छामि सर्वथा ।
न च मे विहितो मृत्युरस्मिन्दुःखेऽपि वर्तति ॥ ४६

G. 5. 26. 0
B. 5. 26. 44
L. 5. 20. 66

नोर्व्यामपि हि; M1 तन्नोर्व्यां मम (for नोर्व्यां हि मम). D2 मार्गणां. —After 37, D3 reads 44–45.

38 Ñ2 V B D6 om. 38 (cf. v.l. 26 and 30). —a) D1 कृतं (for नूनं). D3 च मम (for ममैव). —b) Ś1 D10 रामो (for वीरो). —For 38cd, Ś1 Ñ1 D1-4.10.11 subst.:

595* देवातिथेयं शुद्धात्मा प्रतीच्छति गतोऽनघः ।

[Ñ1 धर्मात्मा (for शुद्धात्मा). D1 गतव्यथः. D3 देवादति- विशुद्धात्मा गतो वैवस्वतः क्षयं.]

39 Ñ2 V B D6 om. 39 (cf. v.l. 26 and 30). —a) D2 देवा धन्याः (by transp.). —b) D3 तथा ह्यप्सरसां गणाः. —c) Ñ1 ये च (for मम) and मे (for ये). D5.7–9 T2 M1 Ct वीरं (for नाथं). D3 तत्र द्रक्ष्यंति ये रामं. —d) D3 वीरं (for रामं).

40 Ñ2 V B D6 om. 40 (cf. v.l. 26 and 30). —a) D5 यथा वा (for अथवा). D3 निग्रहश्चार्थो (sic) (for न हि तस्यार्थो). —b) T2 धर्मकाम्यस्य. —d) Ñ1 विदितात्मनः. —After 40, Ñ1 ins.:

596* न भयं धर्मतो राजा सोऽनुमन्येत कर्हिचित् ।

41 Ñ2 V B D6 om. 41 (cf. v.l. 26 and 30). —a) D3 पश्यतो हि (for दृश्यमाने). —b) G1 सौहार्दं. D7–9 G1.3 M1 Ck.t [अ]दृश्यतः; T2 [अ]पश्यति; Cm.g as in text (for [अ]पश्यतः). Ś1 Ñ1 D1–4.10.11 अदृश्ये प्रीति(Ñ1 D1 रतिः D2.4 सतिः D3 नापि)सौहृदं. —c) G1 नाशयंतु. D3 ये; D11 च (for तु).

42 Ñ2 V B D6 om. 42 (cf. v.l. 26 and 30). —a) Ñ1 D1.2.4.8.11 तु (for नु). D3 ममैव हि (for किं नु मे न). D2 किंचित्; D10 संति (for केचित्). D11 गुणः कश्चित्. Ś1 किं रामे न गुणाः संति; D9 किं वा मय्यगुणाः केचित्. —b) D3 तथा (for किं वा). D3 [स]पि वा; T1.3 G2 M3 मम (for हि मे). —cd) D5 च; D7.9 T1 M2 हि; Ct as in text (for [अ]हं). Ś1 Ñ1 D1.2.4.10.11 हीना; D5 M2 नीता; G1 स्थिता (for सीता). D10 वराहीन (sic) (for वरार्हेण). T3 G2.3 M3 याहं सीदामि रामेण (for c). D5 T2 विना (for हीना). T3 G2.3 M3 मुख्येन (for रामेण). G1 कामिनी. Ś1 Ñ1 D1.2.4.10.11 रामेण विदितात्मना (for d). D3 यन्ममैवानुतापेन राघवो न विपद्यते.

43 Ñ2 V B D6 om. 43 (cf. v.l. 26 and 30). —a) Ś1 D10 श्रेयान् (for श्रेयो). D2 जीवितं (for °तान्). —T1 damaged from न्म up to रा in 45a. Ś1 Ñ1 D10.11 मृत्युर्; D3 त्यक्तुं; Cr.g as in text (for मर्तुं). —b) Ś1 D2.10.11 ह्यहं ततः; Ñ1 ह्यसंशयं; D1.4.5.7–9 T2 G2 M3 Cr.g महात्मनः; M1.2 समंततः; Ct as in text (for महात्मना). ❀ Cr: विहीनाहं महात्मन इति पाठः।; Cg: महात्मनो रामाद्विहीनाया महात्मना रामेण विहीनायाः। तृतीयार्थे पञ्चमी।; so also Cm.k. ❀ —c) Ś1 D10 उत्कृष्ट-; D1 प्रशस्य-; D3 अरिष्ट- (sic) (for अक्लिष्ट-).

44 Ñ2 V B D6 om. 44 (cf. v.l. 26 and 30). T1 damaged for 44 (cf. v.l. 43). D3 reads 44–45 after 37. —a) Ś1 D10 त्यक्त- (for न्यस्त-). —b) D3 वन- (for वने). Ś1 Ñ1 D2.4.5.10 T2.3 G1.3 M1.3 -फलाशिनौ. —c) G3 भ्रुतकौ (sic) (for भ्रातरौ). D1.4 पुरुष-; M1 तु नर- (for हि नर-). D3 शोकसंमूढहृदयौ. —d) Ś1 Ñ1 D10 चरतो; D3 दुःखितौ; D5 चरणैर्; T3 G2 M3 Cg संवृत्तौ (for चरन्तौ).

45 Ñ2 V B D6 om. 45 (cf. v.l. 26 and 30). T1 illeg. up to रा in a (cf. v.l. 43). D3 reads 44–45 after 37. —a) D3 भ्रमंतौ (for अथवा). —c) D3 सोहितौ (sic); D5 M3 Cg [आ]सादितौ (for घातितौ). Ś1 Ñ1 D2.4.10.11 वीरौ (for शूरौ). —After 45, Ñ1 ins.:

597* श्रेयांसौ मम जीवेतां द्विषद्विधततत्परौ ।

46 Ñ2 V B D6 om. 46 (cf. v.l. 26 and 30). —a) D5 न (for सा). D7–9 M1 एवं त्वेवं. —b) M1 यमम् (for मर्तुम्). D3 M2 सर्वशः; D7.9 G1 सर्वतः. —T1 damaged for 46c–47. —c) D3 हि (for च). —a)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 26. o
B. 5. 26. 45
L. 5. 20. 67

धन्याः खलु महात्मानो मुनयः सत्यसंमताः ।
जितात्मानो महाभागा येषां न स्तः प्रियाप्रिये ॥ ४७
प्रियान्न संभवेद्दुःखमप्रियादधिकं भयम् ।
ताभ्यां हि ये वियुज्यन्ते नमस्तेषां महात्मनाम् ॥ ४८
साहं त्यक्ता प्रियेणेह रामेण विदितात्मना ।
प्राणांस्त्यक्ष्यामि पापस्य रावणस्य गता वशम् ॥ ४९

इति श्रीरामायणे सुन्दरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

Ś1 D10 तस्मिन् (for अस्मिन्). D7.9 [s]ति-; D8 प्र- (for sपि). Ś1 Ñ1 D1–4.10.11 T2.3 M1 [s]ति(Ñ1 D1.2 प्र; D3 T2.3 M3 [s]पि; D11 [s]मि)वर्तते; D5 निवर्तने (for [s]पि वर्तति). ❀ Cr: दुःखेऽपि वर्तति। दुःखे वर्तमानेऽपि। परस्मैपदमार्षम्।; Cg: वर्तति वर्तमाने।; Ct: अतिवर्तति अतिशयेन वर्तमाने. ❀

47 Ñ2 V B D6 om. 47 (cf. v.l. 26 and 30). T1 damaged for 47 (cf. v.l. 46). —^{b}) Ś1 Ñ1 D1.2.4.10.11 ऋषयः; D3 यतयः (for मुनयः). Ś1 D2.10.11 सत्यसंगराः; Ñ1 °पारगाः; D3 साधु°; D5 G1 M3 त्यक्तकिल्बिषाः; Ct as in text (for सत्यसंमताः). —^{c}) D3 T2 महा(T2 प्रीता)त्मानो; Cg.k.t as in text (for जिता°). Ñ1 D3 य(D3 जि)तात्मानो; D2.11 महात्मानो (for महाभागा). —^{d}) D3 तेषां (for येषां). Ś1 D3.10.11 G1.2 M1.2 नास्ति; D2 नष्टौ; Ct as in text (for न स्तः). Ś1 D2.3.10.11 G1 M2 -[अ]प्रियं(D2 °यौ); Cm.k.t as in text (for -[अ]प्रिये).

48 Ñ2 V B D6 om. 48 (cf. v.l. 26 and 30). —^{a}) Ś1 D1.2.10.11 उत्प(D2 °त्पा)द्यते; Ñ1 *पेक्षते; D4 om. (for न संभवेद्). —^{b}) Ś1 D1.2.4.10 पुनः; Ñ1 T2 M2 प्रियं (sic); D7–9 M1 Ct भवेत्; D11 सुखं (sic); Cm.g.t*p* as in text (for भयम्). —After 48^{ab}, D5 repeats 34^{c} – 35^{b}. —^{c}) G1 ते विसृज्यंते; Ct as in text. —For 48^{cd}, Ś1 Ñ1 D1–4.10.11 subst.:

598* ये प्रियेभ्यो विमुक्तास्तान्नमस्कुर्यां महात्मनः।

[Ñ1 D2 वियुक्तास्; D11 विर° (for विमु°). Ñ1 D1.4.11 ते (for तान्). Ñ1 ता*स्यंति; D1.4.11 नमस्का(D11 °स्कु [sic])र्या; D2 नमस्यामि (for नमस्कुर्यां). D1.4.11 महात्मनां.] —For 48, D3 subst.:

599* प्रिया*दुःखं भवति भयं चैवाप्रियान्मतम्।
प्रियाप्रियेभ्यो मुक्ता ये नमस्तेभ्यः पुनः पुनः।

49 Ñ2 V B D6 om. 49 (cf. v.l. 26 and 30). D11 om. (hapl.?) 49^{ab}. —^{a}) D1 प्रियेणेव; D7.9 Ct °णैव; T1.3 G2 M3 प्रियार्हेण; G3 M1 °णाद्य(M1 °हं) (for प्रियेणेह). —^{b}) D3 राघवेण महात्मना. —After 49^{ab}, Ś1 Ñ1 D1–4.10 ins.:

600* शूरेण प्रियभार्येण गुणज्ञेन दृढात्मना।

[Ñ1 प्रियकार्येण. Ś1 D10 महात्मना (for दृढा°). Ñ1 कृतज्ञेन दृढव्रता (for the post. half).]

—T1 damaged from 49^{c} up to colophon. —^{c}) D1 च त्यक्त्वा (for त्यक्ष्यामि). Ś1 Ñ1 D1–4.10.11 यास्यामि; G1 भीमस्य (for पापस्य). —^{d}) Ś1 Ñ1 D1–4.10.11 वशं न तु(D1.2.4.11 च); D8 G M2 वशं गता (by transp.).

Colophon: T1 damaged (cf. v.l. 49). D2 om. —*Sarga name*: Ś1 Ñ1 D1.3.4.11 सीताप्र(D1.4.11 °वि)लापः; Ñ2 V B D6 सीतानिर्वेदः; D10 लंकापर्वणि सीताप्रलापः. —*Sarga no.* (figures, words or both): Ñ1 D1.4.10.11 om.; Ś1 23; Ñ2 B1 D5–9 T G M1.3 26; V1 B4 D3 27; V2 17; B2.3 M2 25. —After colophon, G concludes with श्रीरामाय नमः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

२५

इत्युक्ताः सीतया घोरं राक्षस्यः क्रोधमूर्छिताः ।
काश्चिज्जग्मुस्तदाख्यातुं रावणस्य तरस्विनः ॥ १
ततः सीतामुपागम्य राक्षस्यो घोरदर्शनाः ।
पुनः परुषमेकार्थमनर्थार्थमथाब्रुवन् ॥ २
हन्तेदानीं तवानार्ये सीते पापविनिश्चये ।
राक्षस्यो भक्षयिष्यन्ति मांसमेतद्यथासुखम् ॥ ३
सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा ।
राक्षसी त्रिजटा बुद्ध्वा शयाना वाक्यमब्रवीत् ॥ ४
आत्मानं खादतानार्या न सीतां भक्षयिष्यथ ।
जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥ ५
स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ।
राक्षसानामभावाय भर्तुरस्या भवाय च ॥ ६
एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्छिताः ।
सर्वा एवाब्रुवन्भीतास्त्रिजटां तामिदं वचः ॥ ७
कथयस्व त्वया दृष्टः स्वप्नोऽयं कीदृशो निशि ॥ ८

G. 5. 27. 8
B. 5. 27. 8
L. 5. 21. 8

25

M2 begins with श्रीरामाय नमः.

1 T1 damaged from [a] up to रावणस्य in [d].—[a]) Ś1 Ñ1 D2.3.8.10.11 G2 M3 घोराः D1.4 तास्तु (for घोरं). Ñ2 V B D6 सीतायास्तद्व(B3 °स्तु व)चः श्रुत्वा.—After 1[ab], Ñ1 ins.; Ś1 D2–4.10.11 ins. l. 3 only after 1[ab]:

601* महाघोरं महा** सर्वलोकभयंकरम् ।
जगन्ति त्रासयन्त्यः कुर्वाणाः प्रस्थिताः किल ।
तूर्णमुत्पतिता गृह्य शूलशक्तिपरश्वधान् ।
उद्यतान्त्रिप्रकुर्वन्त्यो राक्षस्यो भीमदर्शनाः ।
काश्चिद्त्रासयामासुः सीतां तां क्रूरदर्शनाः । [5]

[(l. 3) Ñ1 रौद्राः; D4.11 घोराः (for गृह्य). Ś1 D2.10 शक्तिशूल- (by transp.). D4 शक्तिशूलासिपाणयः (for the post. half).]

—[c]) Ñ V B D6 जग्मुः काश्चित् (by transp.); D2 जग्मुः सर्वास्. Ñ1 V1 तथा (for तद्). Ś1 D3.10.11 जग्मुरन्याख्यथाख्यातुं; D1.4 जग्मुस्तस्य तमाख्यातुं.—[d]) Ñ2 V B1.2.4 D1.4–7.9 G1 दुरात्मनः (for तरस्विनः).

2 Ñ1 illeg. for 2[ab].—[a]) Ñ2 V B D6 अन्याः (for ततः).—D4 om. (hapl.) 2[b]–3[b].—[b]) D2.7–9 M1 भीम- (for घोर-).—[c]) Ñ2 B D1.2.6 एवार्थम् (for एका°).—Ñ1 illeg. for 2[d]–5[b].—[d]) B3 सनाथां ताम् (for अनर्थार्थम्). M3 [अ]ब्रवीत् (sic). B4 D2.3.11 अनर्थाये(D11 °र्थं ही)दमब्रुवन्.—For 2[cd], Ś1 D10 subst.:

602* परुषं परुषानर्हामनर्थायेदमब्रुवन् ।

[D10 अब्रवीत् (sic).]

3 D4 om. 3[ab]; Ñ1 illeg. for 3 (for both, cf. v.l. 2). T1 damaged for 3–4.—[a]) D1.5.7–9 T2.3 G M all Cs अद्य (for हन्त). M1 [इ]मानि (sic). V2 B2.4 D1 तदा; G1 त्वया (sic) (for तव).—[c]) D8 भक्षयिष्यामो.—[d]) Ś1 D10 तेद्य (for एतद्). Ñ2 V B D6 मांसान्यु(B1 °समु)त्कृत्य सर्वशः.

4 Ñ1 V1 illeg. for 4 (for Ñ1, cf. v.l. 2). T1 damaged for 4 (cf. v.l. 3).—[ab]) Ś1 Ñ2 V2 B D1.3.4.6.10.11 निर्भ(Ś1 प्रभ)र्त्सितां (for संतर्जितां). D5 तथा (for तदा). D2 सीता तामिश्र नीचाभिर्हृष्टा (sic) निर्भर्त्सिता तदा. ❀ Cr: सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदेति पाठः. ❀ —[c]) D1.5 नाम (for बुद्ध्वा).—[d]) B1 समानाः; D1.4.7.9 G1 Ck.t प्रबुद्धा; Cg as in text (for शयाना).

5 Ñ1 illeg. for 5[ab] (cf. v.l. 2).—[a]) B1 [अ]नार्ये (sic); D1.2 [अ]नार्यो (sic).—[b]) D10 खादयिष्यथ.—[c]) Ñ2 V B D6 [आ]त्मजाम् (for सुताम्). D4 इत्थं (for इष्टां).—[d]) G1 साक्षाद्दशरथस्नुषां.

6 T1 damaged for 6–7. Ñ1 illeg. for 6–7[b].—[a]) B3 [s]ह्यापि; D2 ह्यथ (marg.) (for ह्यद्य).—[b]) D5 इदानीं (for दारुणो). V B D1.3.4.10 लोम- (for रोम-).—[c]) G1 राक्षसीनाम्; Cm.k.t as in text (for °सानाम्).—[d]) V2 B4 T3 G M1 जयाय; Cm.t as in text (for भवाय). D11 भर्तुरस्याभयाय च; T2 स्वभर्तुरभवाय च.

7 T1 damaged for 7 (cf. v.l. 6). Ñ1 illeg. for 7[ab] (cf. v.l. 6).—[b]) Ñ2 V B D6 प्रेक्ष्य(B3 प्रोह्य) मैथिलीं (for क्रोधमूर्छिताः). Ś1 D1–4.10.11 राक्षस्योपास्य मैथिलीं (metri causa).—[c]) V2 B2 सर्वा एवं ब्रुवंतीं तां. D11 सर्वा एवं ब्रुवंतीस्तास् (sic).—[d]) Ñ2 V B1–3 D6 त्रिजटां परिवार्य ताः.—After 7, Ś1 Ñ V B D1–4.6.10.11 ins.:

603* अशेषं श्रोतुमिच्छामस्तव दुःस्वप्नदर्शनम् ।

[Ñ2 V B D6 श्रोतुमिच्छामहे सर्वास् (for the prior half). Ñ1 D11 दुःस्वप्नमातुराः. V2 B1.3 तत्त्वतः स्वप्नदर्शनं (for the post. half).]

8 D3 om. 8–9.—For 8, Ś1 Ñ V B D1.2.4.6.10.11 subst.:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 27. 9
B. 5. 27. 8
L. 5. 21. 9

तासां श्रुत्वा तु वचनं राक्षसीनां मुखोद्गतम् ।
उवाच वचनं काले त्रिजटा स्वप्नसंश्रितम् ॥ ९

गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम् ।
युक्तां वाजिसहस्रेण स्वयमास्थाय राघवः ॥ १०

स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता ।
सागरेण परिक्षिप्तं श्वेतपर्वतमास्थिता ।
रामेण संगता सीता भास्करेण प्रभा यथा ॥ ११

राघवश्च मया दृष्टश्चतुर्दन्तं महागजम् ।
आरूढः शैलसंकाशं चचार सहलक्ष्मणः ॥ १२
ततस्तौ नरशार्दूलौ दीप्यमानौ स्वतेजसा ।
शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ ॥ १३
ततस्तस्य नगस्याग्रे आकाशस्थस्य दन्तिनः ।
भर्त्रा परिगृहीतस्य जानकी स्कन्धमाश्रिता ॥ १४
भर्तुरङ्कात्समुत्पत्य ततः कमललोचना ।
चन्द्रसूर्यौ मया दृष्टा पाणिभ्यां परिमार्जती ॥ १५

604* कीदृशः स त्वया दृष्टः श्रोतुं कौतूहलं हि नः ।

[Ś1 Ñ1 D1.10.11 कीदृशं तु त्वया दृष्टं (for the prior half). Ñ2 V B D6 परं (for श्रोतुं). D11 तु (for हि). D6 मे (for नः). Ñ1 स्वप्नं दृष्ट्वा सुमध्यमे (sic) (for the post. half).]

9 D3 om. 9 (cf. v.l. 8). —[b]) T1.3 M3 मुखाच्च्युतं. —T1 damaged for 9[c] – 10. —[d]) D3 -संश्रयं; G1 M1 -दर्शनं; Cm.g.k.t as in text (for -संश्रितम्). —For 9, Ś1 Ñ V B D1.2.4.6.10.11 subst.:

605* तासामेतद्वचः श्रुत्वा त्रिजटा वृद्धराक्षसी ।
वक्तुं बाष्पाञ्जलिपुटा तं स्वप्नमुपचक्रमे ।

[(l. 1) B4 तु तद् (for एतद्). B4 नाम (for वृद्ध-). —(l. 2) Ś1 वक्त्रे कृतांजलिपुटा (for the prior half). Ñ1 स्वप्नं तम् (by transp.).]

—Then all the above MSS. cont.; D3 cont. after 603* (owing to om.):

606* सपर्वतवनां कृत्स्नां ग्रसमानो वसुंधराम् ।
स्वप्ने रामो मया दृष्टो रुधिरं पीतवान्बहु ।

[(l. 1) Ś1 Ñ1 D1–4.10.11 महीमिमां (for वसुंधराम्). —(l. 2) V B1–3 मयाद्य दृष्टः स्वप्नांते (for the prior half). Ñ1 शोणितं (for रुधिरं). B4 मुहुः (for बहु).]

10 T1 damaged for 10 (cf. v.l. 9). —[b]) V2 गिरिकाम् (sic) (for शिबिकाम्). B अंतरीक्षगां. —[c]) D2 गुप्तां. Ś1 Ñ1 D2–4.10.11 नाग-; Ñ2 V B D6 गज-; D8 T3 M3 हंस-; M2 राज-; Ck.t as in text (for वाजि-). —After 10, D5.7–9 S Ct read 17[cd], D7–9 G1 M1 Ct repeating it in its proper place.

11 Ñ2 V B D6 om. 11[ab]. —[a]) D1 सीता (for स्वप्ने). G2 [अ]सौ (for [अ]द्य). D1 स्वप्ने (for दृष्टा). —[b]) D1 दृष्टा (for सीता). —[d]) D4 T1.3 M श्वेतं (for श्वेत-). G2 आश्रिता (for °स्थिता). Ś1 D10 आरोहंश्चैव पर्वतं (sic). —For 11[cd], Ñ2 V B D6 subst.; while Ñ1 D1.4.11 ins. after 11[cd]:

607* समुद्रेण परिक्षिप्तमारुह्य श्वेतपर्वतम् ।

[B4 समुद्रे च; D1 रामोपि तत् (for समुद्रेण). Ñ2 V B D6 आरूढः. V2 B3 D8 -पर्वतः (sic). D1 श्वेतपर्वतमास्थिता (for the post. half).]

—T1 damaged for 11[e] – 12. —[e]) D4 om. (hapl.?) सीता. —[f]) D9.10 G1 यथा प्रभा (by transp.). D2 भास्करस्य प्रभा इव (with hiatus). —After 11, Ś1 Ñ V2 B D1–4.6.10.11 read 608*.

12 T1 damaged for 12 (cf. v.l. 11). V2 B1.3 om. 12 – 16.

☞ V1 illeg. from 12 up to colophon. —[a]) D4 रामश्च स (for राघवश्च). D7.9 T1 G1.3 M2 Ct पुनर् (for मया). —[b]) B4 D1.5 चतुर्दंष्ट्रं. —[c]) D6 श्वेत- (for शैल-). —[d]) Ś1 Ñ1 B2.4 D1–4.6 विचरन्; Ñ2 D7.9 Ct चकास; D8 जगाम; T2 चचाल; Cg as in text (for चचार). D6 स सलक्ष्मणः. —After 12, D8 ins. for the first time l. 1–2 of App. I (No. 5), repeating them after l. 22 of the same passage.

13 V2 B1.3 om.; V1 illeg. for 13 (for both, cf. v.l. 12). Ñ2 B2 D6 om. 13 – 16. —[a]) D5.8 M1.3 तु (for तौ). B4 तत्रस्थौ. D7.9 T1 ततस्तु सूर्यसंकाशौ; G1 ततस्तु राघवौ भूयो. —[b]) D10 सुतेजसा. —[c]) D3 -धरां (for -धरौ). —[d]) Ś1 B4 D1–4.10.11 प्रत्युपस्थितौ; Ñ1 समुप°; T2.3 G1 M1 पर्यव°; Cm.t पर्युप° (as in text).

14 Ñ2 V2 B1–3 D6 om.; V1 illeg. for 14 (for both, cf. v.l. 12 and 13). D8 transp. [ab] and [cd]. Note hiatus between [a] and [b]. —[a]) Ś1 Ñ1 B4 D1–4.10.11 M2 [अ]ग्राद् (for [अ]ग्रे). —[b]) D5.7–9 T G M1.3 ह्या(G2 चा)काशस्थस्य (to avoid hiatus). D1 आकाशस्थातिनंदितः (sic); M3 उत्थितस्थस्य दंतिनः (sic). —T1 damaged for 14[c] – 15. —[c]) Ś1 D10 भ्रात्रा; D1.3.8.9.11 M1 भर्ता (sic); G3 पित्रा (sic); Cr.m.t as in text (for भर्त्रा). —[d]) Ś1 D10 आगता; Ñ1 D1–4.11 आप्लु(Ñ1 D4 °स्थि)ता (for आश्रिता).

15 Ñ2 V2 B1–3 D6 om.; V1 illeg. for 15 (for both, cf. v.l. 12 and 13). T1 damaged for 15 (cf. v.l. 14). —[a]) Ś1 समुत्सृज्य; D10 समुत्सृत्य; Cm.t as in

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ततस्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः ।
सीतया च विशालाक्ष्या लङ्कायाः उपरि स्थितः ॥ १६

पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम् ।
शुक्लमाल्याम्बरधरो लक्ष्मणेन समागतः ।
लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ १७

G. 5. 27. 13
B. 5. 27. 18
L. 5. 21. 13

text. —^{b}) G2 सीता; Ct as in text (for ततः). —^{c}) D5.7–9.11 T2.3 G2 दृष्टौ (for दृष्टा). Ś1 D10 चंद्रसूर्योपमा दृष्टा. —^{d}) Ś1 B4 D1–4.10.11 T2.3 G1.2 M1.3 Cg.k पाणिना; Ct as in text (for °भ्यां). —After 15, T2 ins. (var.) l. 1–2 of App. I (No. 5).

16 Ñ2 V2 B1–3 D6 om.; V1 illeg. for 16 (for both, cf. v.l. 12 and 13). —^{b}) Ś1 D10 आस्थितोसौ; D1 आस्थिताभ्यां (for °तः स). —^{d}) D8 G1 लंकायाम्. Ś1 Ñ1 B4 D2.4.10.11 लंकां पर्य(D4 प्रत्य)क्षितः स्थितः; D3 लंकां कंपन्निव स्थितः; D5 लंकायाः समुपस्थितः. —After 16, G1 ins. 608*.

17 V1 illeg. for 17 (cf. v.l. 12). —^{a}) Ñ2 D6 पांडुरध्वज-; B2 पांडुरच्छत्र-; T1.3 G M Cv.r पांडरर्षभ- (for पाण्डुरर्षभ-). —^{b}) V2 B1–3 D3.6 [अ]श्व- (for [अ]ष्ट-). Ś1 Ñ1 B4 D4.10.11 -भुजः; Cv as in text (for -युजा). Ñ2 D6 चरन् (for स्वयम्). —D5.7–9 S Ct read 17^{cd} after 10, D7–9 G1 M1 Ct repeating it here. —^{c}) D2 मुक्ता- (for शुक्ल-). D8 (first time) शुक्लांबरधरो वीरो. —^{d}) Ś1 B4 D1–5.7–11 T3 G1.3 M Cv.k.t (D7–9 Ct second time; G1 M1 both times) सहागतः; Ñ2 V2 B1–3 D6 समन्वितः (for समागतः). —After 17^{cd} (r.), G1 M1 (l. 1–5 and 9 only) ins. a passage relegated to App. I (No. 5). —^{f}) D5.7–9 T2 G1 M2.3 Cv.g वीर्यवान् (for भार्यया). —For 17^{ef}, Ś1 Ñ V2 B D1–4.6.10.11 subst. and read after 11; D5 T2.3 G3 M3 ins. after 17^{ab}; D8 ins. after 17^{cd} (r.); T1 G2 M2 ins. l. 1 after 17^{ab} and cont. l. 2 after 609*; G1 ins. after 16:

608* इहोपयातः काकुत्स्थः सीतया सह भार्यया ।
लक्ष्मणेन सह भ्रात्रा विमाने पुष्पके स्थितः ।

[(l. 1) D2 अहोपजातं (sic). D1 वीर्यवान् (for भार्यया). Ñ1 भार्यया सह (by transp.). Ñ2 V2 B1–3 D6 transp. सीतया and भार्यया. —T1 damaged from l. 2 up to l. 2 of App. I (No. 5). —M3 om. l. 2. —(l. 2) Ñ2 V2 B D6 च वीरेण (for सह भ्रात्रा). D4 विमानं पुष्पमास्थितः (for the post. half).]

—Thereafter D5.8 T2 cont.; D7.9 ins. after 17^{cd} (r.); T1 (damaged) G2 M2 (G2 M2 repeat before 17^{ef}) ins. after l. 1 of 608*; T3 G1.3 ins. before 17^{ef}:

609* ततोऽन्यत्र मया दृष्टो रामः सत्यपराक्रमः ।

[Ck तत्र (for ततो). D5.8 T2 M2(second time) Cv ह्यत्र; Cr.k.t as above (for ऽन्यत्र). M2(second time) रामो विष्णुपराक्रमः (for the post. half).];

whereas T1.3 G2.3 M2 ins. a passage relegated to App. I (No. 5) after 608*. ❀ Cv: ततो ह्यत्र°; लक्ष्मणेन सह°; आरुह्य पुष्पकं°; उत्तरां दिशमालोक्य°; एवं स्वप्ने मया°; लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया इत्येष पाठक्रमः। अत्र पुरस्तात्पश्चाच्चान्येऽपि केचन श्लोकाः सन्ति ते प्रायिका इति न प्रदर्शिताः।; Cr: अत्र पुरस्तात्पश्चादस्मात्खण्डं त्रिभुवनमित्यादयः केचन श्लोका दृश्यन्ते। केषुचित्कोशेषु न दृश्यन्ते। ते नास्माभिर्व्याख्याताः।; Cg: अन्ये श्लोकाः प्रक्षिप्ताः। तेन ते न व्याख्याता इत्याहुः। लक्ष्मणेन सह भ्रात्रेति। एतत्पदस्यानन्तरम्—"सीतया सह वीर्यवान्; आरुह्य पुष्पकं°; उत्तरां दिशमालोक्य°; एवं स्वप्ने मया°; लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया।" इति पाठक्रमः। विमाने पुष्पके स्थितः।; खण्डं त्रिभुवनमित्यारभ्य रामः सत्यपराक्रम इत्यन्तो ग्रन्थः प्रक्षिप्तः प्रकृतासङ्गतश्च। विष्णुरेव स्वयं भूत्वेति प्रक्षिप्तवचनस्य विष्णुपराक्रम इत्यनेन विरोधात्।; Ck: शुक्लमाल्याम्बर° इत्यनन्तरं तत्रान्यत्र मया दृष्ट इति। अत्र मध्ये "खाण्डं भुवनमित्यादिका वंशाश्च वीणामुरजाश्च तूर्यं" इत्यन्तं च चतुर्दशश्लोकी स्वमतानुसारेण प्रक्षिप्ता रामानुजीयानां कोशेषु च दृश्यते। क्वचिन्न। तदव्याख्येयम्। तथैव पूर्वव्याख्यातृभिरप्यव्याख्येयमित्युक्तम्।; Ct: अत्र मध्ये "खाण्डं भुवनम्" इत्यादयो बहवः श्लोका रामानुजसंप्रदायपुस्तकेषु दृश्यन्ते। ते प्रक्षिप्ता इति कतकादयोऽन्ये च. ❀ —After 17, D5.7–9 S ins.:

610* आरुह्य पुष्पकं दिव्यं विमानं सूर्यसंनिभम् ।
उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ।
एवं स्वप्नो मया दृष्टो रामो विष्णुपराक्रमः ।
लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् ।
न हि रामो महातेजाः शक्यो जेतुं सुरासुरैः । [5]
राक्षसैर्वापि सर्वैर्वा स्वर्गः पापजनैरिव ।
रावणश्च मया दृष्टो क्षितौ तैलसमुक्षितः ।
रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः ।

[(l. 2) D7.9 आलोच्य; Cv.g as above (for °क्ष्य). T1 damaged from जगाम up to l. 5. D7.9 प्रस्थितः; Cv.g as above (for जगाम). —D7.9 om. l. 3–6. —(l. 3) G M Cv.g स्वप्ने (for स्वप्नो). —(l. 4) D5 T2 G1 M2 Cv.g भार्यया; T3 G3 M3 राघवः (for वीर्यवान्). —After l. 4, D8 ins. a passage relegated to App. I (No. 5). —D5.8 om. l. 5–6. —(l. 5) G1 महारणे; G2 महामृधे (for सुरासुरैः). —(l. 6) T1.3 M3 चान्यैर्; G2 लोकैर् (for सर्वैर्). M2 रक्षसां वापि लोकेन (for the prior half). —(l. 7) G1 तु (for च). D7.9 Ck.t मुंडस् (for क्षितौ). T2 -समन्वितः (for -समुक्षितः). —T1 damaged from l. 8

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 27. 15
B. 5. 27. 20
L. 5. 21. 20

विमानात्पुष्पकाद्य रावणः पतितो भुवि ।
कृष्यमाणः स्त्रिया दृष्टो मुण्डः कृष्णाम्बरः पुनः ॥ १८
रथेन खरयुक्तेन रक्तमाल्यानुलेपनः ।
प्रयातो दक्षिणामाशां प्रविष्टः कर्दमं ह्रदम् ॥ १९
कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी ।
काली कर्दमलिप्ताङ्गी दिशं याम्यां प्रकर्षति ॥ २०
वराहेण दशग्रीवः शिशुमारेण चेन्द्रजित् ।
उष्ट्रेण कुम्भकर्णश्च प्रयातो दक्षिणां दिशम् ॥ २१

up to हसन्नृत्यन् in l. 1 of 611*. —(l. 8) ❀ Cg: कर्वीरकृतस्रज इत्यकारान्तत्वमार्षम् । हलन्ताद्वा इत्यापो विधानात्स्रक्शब्दस्याबन्तत्वेन वा निर्वाहः . ❀]

18 V1 illeg. for 18 (cf. v.l. 12). T1 damaged for 18 (cf. v.l. 610*). —^{a}) D4 दृष्टो; D6 दिव्याद् (for अद्य). —^{b}) Ś1 Ñ V2 B1-3 D2-6.10.11 मया; D1.7.9 G2.3 क्षितौ (for भुवि). —^{cd}) T2 मया (for स्त्रिया). D5.7.9 transp. दृष्टो and मुंडः. Ś1 Ñ1 V2 B1-3 D1-4.6 मुंडः पीतां(V2 B1-3 D6 रक्तां)बरो हसन्(Ñ1 D3 हि सः; D2 वसन्); B4 रक्तांबरधरो हसन्; D8 G2.3 M1 मुंडः कृष्णांबरावृतः (for ^{d}). —After 18, D10 reads 20^{cd}.

19 V1 illeg. for 19 (cf. v.l. 12). T1 damaged up to हसन्नृत्यन् in l. 1 of 611* (cf. v.l. 610*). Ñ1 transp. ^{ab} and ^{cd}. —^{b}) D3 रक्तमाला-. D6.10 -[अ]नुलेपयन्. —After 19^{ab}, D7-9 T1.2(ins. after 20).3 G2.3 M1.3 ins.; while M2 cont. after 612*:

611* पिबंस्तैलं हसन्नृत्यन्भ्रान्तचित्ताकुलेन्द्रियः ।
गर्दभेन ययौ शीघ्रं दक्षिणां दिशमास्थितः ।
पुनरेव मया दृष्टो रावणो राक्षसेश्वरः ।
पतितो विशिरा भूमौ गर्दभाद्भयमोहितः ।
सहसोत्थाय संभ्रान्तो भयार्तो मदविह्वलः । [5]
उन्मत्तरूपो दिग्वासा दुर्वाक्यं प्रलपन्बहु ।
दुर्गन्धं दुःसहं घोरं तिमिरं नरकोपमम् ।
मलपङ्कं प्रविश्याशु मग्नस्तत्र स रावणः ।

[(l. 1) T1 damaged up to हसन्नृत्यन्. T1.2 M2 -चित्ता- (for -चित्त). —G3 om. l. 2-5. —(l. 2) D7-9 आश्रितः (for आस्थितः). — T1 damaged for l. 4-7. —(l. 4) D7-9 T2 G2 M1.3 [स]वाक्शिरा (for विशिरा). M2 पतितस्त्ववाक्शिरा भूमौ (hypm.) (for the prior half). T2 -संहितः (for -मोहितः). —(l. 5) T2 भयात्तु (for भयार्तो). —(l. 6) D8 T3 G2.3 M1.3 उन्मत्त इव. G2 विलपन्. —(l. 7) G2 दुर्गंधि. —(l. 8) M1 भग्नस् (for मग्नस्). G2.3 महाह्रदे (for स रावणः).]

—T1.3 G2.3 M3 om. 19^{cd}. Ś1 transp. 19^{c} – 20^{b} and 20^{cd}. D8 reads 19^{cd} after l. 1 of 613*. —^{c}) D7.9 प्रस्थितो; M2 प्रायाद्वा (for प्रयातो). —^{d}) D4 गोमयं; B (ed.) C1 [स]कर्दमं. Ś1 Ñ1 B4 D10 का(B4 क)र्दमे ह्रदे; Ñ2 V2 T1-3 D3.11 कार्दमं ह्रदं; D1 गोमयं द्रुमः; D2 गोमये ह्रदे. —After 19, M2 ins.; while G1.2 cont. after 613*:

612* रक्तमाल्याम्बरधरो रक्तगन्धानुलेपनो ।
—Thereafter M2 cont. 611*.

20 V1 illeg. for 20 (cf. v.l. 12). Ś1 transp. 19^{c} – 20^{b} and 20^{cd}. —^{b}) M1 कृष्ण- (for रक्त-). Ś1 D10 -वाससं; D1.4 -वाससा; D2.3 -वाससी (for -वासिनी). —D10 reads 20^{cd} after 18. —T1 damaged from 20^{d} up to दृष्टः in l. 1 of 613*. —^{cd}) Ś1 V2 B1.2.4 D2-4.10.11 काली कमलपत्राक्षी; B3 काली करालवदना (for ^{c}). Ś1 D10 प्रकर्षती; B2 प्रयच्छति; D11 प्रधर्षती. D1 पांडुरैर्दशनैर्दष्ट्वा कर्षंती दक्षिणामुखं. —After 20, D7-9 T1.3 G M ins.; while T2 ins. 611* and then cont.:

613* एवं तत्र मया दृष्टः कुम्भकर्णो निशाचरः ।
रावणस्य सुताः सर्वे मुण्डास्तैलसमुक्षिताः ।

[(l. 1) T1 partially damaged for the prior half. M2 मुंडस् (for एवं). D7.9 T1 महाबलः (for निशाचरः). —After l. 1, D8 reads 19^{cd}. —T1 damaged from l. 2 up to 21^{ab}. —(l. 2) T3 G1 M3 दृष्टास् (for मुण्डास्).] —Thereafter G1.2 cont. 612*.

21 V1 illeg. for 21 (cf. v.l. 12). T1 damaged for 21^{ab} (cf. v.l. 613*). Ś1 om. 21. —^{a}) D1 वाराहेण. Ñ2 V2 B1.2 D6 वानरेण मया दृष्टः(V2 समादिष्टः); B3.4 रावणश्च(B3 °णेन [sic]) मया दृष्टः. —^{b}) Ñ1 V2 D2.3.10.11 [अ]सकृत् (for [इ]न्द्रजित्). Ñ2 D6 कृष्यमाणोपि चासकृत्. —^{c}) V2 तु (for च). Ñ1 D2-4.10.11 उष्ट्रेण च मया दृष्टः (D4 reads या दृष्टः in marg.). —^{d}) D1 प्रविष्टो; D2 प्रगतो; D4 (m.) याती वै; D7.8 G2 M2 प्रयाता. —After 21, D5.7-9 S ins.:

614* एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीषणः ।
शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ।
शङ्खदुन्दुभिनिर्घोषैर्नृत्तगेयैरलंकृतः ।
आरुह्य मेघसंकाशं मेघस्तनितनिःस्वनम् ।
चतुर्दन्तं गजं दिव्यमास्ते तत्र विभीषणः । [5]
चतुर्भिः सचिवैः सार्धं वेहाससमुपस्थितः ।

[❀ Ck: "श्वेतच्छत्रो विभीषणः" इत्यतः परं "चतुर्भिः सचिवैरिति" । अत्र मध्ये श्लोकद्वयं प्रक्षिप्तं क्वचित्. ❀ —After l. 1, D8 M2 read l. 6 —D5.7.9 G1.2 M1 om. (haplᵒ?); T1 damaged for l. 2-5. —(l. 3) D8 नृत्य- (for नृत्त-). D8 T2 -गीतैर् (for -गेयैर्). —(l. 4) M3 शैलसंकाशं. —(l. 6) D8 T2 विहायसम्; Cr.m.g.k.t as above (for वैहा°). D9 उपास्थितः.]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

समाजश्च महान्वृत्तो गीतवादित्रनिःस्वनः ।
पिबतां रक्तमाल्यानां रक्षसां रक्तवाससाम् ॥ २२
लङ्का चेयं पुरी रम्या सवाजिरथसंकुला ।
सागरे पतिता दृष्टा भग्नगोपुरतोरणा ॥ २३
पीत्वा तैलं प्रनृत्ताश्च प्रहसन्त्यो महास्वनाः ।
लङ्कायां भस्मरूक्षायां सर्वा राक्षसयोषितः ॥ २४
कुम्भकर्णादयश्चेमे सर्वे राक्षसपुंगवाः ।
रक्तं निवसनं गृह्य प्रविष्टा गोमयह्रदे ॥ २५
अपगच्छत नश्यध्वं सीतामाप्नोति राघवः ।
घातयेत्परमामर्षी सर्वैः सार्धं हि राक्षसैः ॥ २६

G. 5. 27. 24
B. 5. 27. 34
L. 5. 21. 26

22 V1 illeg. for 22 (cf. v.l. 12).—[a]) Ñ1 D2 T3 M2.3 दृष्टो; G3 वृ* (for वृत्तो). Ś1 Ñ2 D5.6.10 मया दृष्टो; D8 महातेजा (for महान्वृत्तो).—[b]) G3 damaged for गीतवा. Ś1 Ñ1 B3 D2–4.10.11 -नृत्यवान्; Ck.t as in text (for -निःस्वनः). Ñ2 V2 B1.2.4 D1.6 नृत्यवादित्रगीतवान्.—T1 damaged from 22[c] up to l. 1 of 615*. G3 damaged for 22[cd].—[c]) D5 धूमतां (sic) (for पिबतां). Ś1 Ñ1 D1–4.10.11 बिभ्रतां रक्तमाल्यानि; Ñ2 V2 B D6 पिबतां मुंडशीर्षाणां.

23 V1 illeg. for 23 (cf. v.l. 12). T1 damaged up to l. 1 of 615* (cf. v.l. 22).—[a]) Ś1 Ñ V2 B D1–4.6.10 कृत्स्ना; D11 कृष्णा (for रम्या).—[b]) Ñ2 D6.7.9 T2 G M3 -कुंजरा (for -संकुला). Ś1 Ñ1 D1–4.10.11 गजवाजिसमा(D2.4.11 °रथा)कुला.—[c]) D4 सागरं. Ñ1 *का (for दृष्टा).—[d]) Ś1 भग्न-. D1.2.4.11 -प्राकार- (for -गोपुर-). M2 भग्नतोरणगोपुरा.—After 23, T1.3 G2.3 M1.3 ins.:

615* लङ्का दृष्टा मया स्वप्ने रावणेनापि रक्षिता।
दग्धा राक्षस्य दूतेन वानरेण तरस्विना।

[T1 damaged for l. 1.—(l. 1) G2 पुरी स्वेन; G3 M1 पुनः स्वप्ने (for मया स्वप्ने). M3 [अ]नि- (for [अ]पि). G3 T3 वानरेण तरस्विना; M2 lacuna (for the post. half).—(l. 2) G3 damaged after दग्धा up to भस्म in 24[c]. T1 महात्मना (for तरस्विना). M2 दग्धा **पुरी सर्वा रावणेनाभिपालिता.]

24 V1 illeg. for 24 (cf. v.l. 12). G3 damaged up to भस्म in [c] (cf. v.l. 23). M2 transp. [ab] and [cd].—[a]) Ś1 D10 T1 प्रनृत्यंत्यः; V2 D1–3 प्रवृत्ताश्च; B2 प्रवृद्धाश्च; B3 प्रनृत्यामः (sic); D4 प्रकृष्टाश्च; D6–9 M3 प्रमत्ताश्च; G2 M1 प्रनृत्यंति (for प्रनृत्ताश्च).—[b]) B3 दिवानिशं; D10 महास्वराः; M1 °स्वनं (for महास्वनाः).—[c]) Ś1 Ñ1 D3.10.11 T3 -रूपायां; D4 -भूतायां; Cm as in text (for -रूक्षायां). Ñ2 B2.4 D6 भग्नकक्षायां; B3 T2 G1 भग्नरूपायां.—T1 damaged for 24[d]–26[b].—[d]) D3.11 T2 सर्व- (for सर्वा). T3 M3 प्रविष्टा राक्षसस्त्रियः.

25 V1 illeg. for 25 (cf. v.l. 12). T1 damaged for 25 (cf. v.l. 24). G3 damaged for [a].—[a]) B2 [अ]न्ये; D9 M2 [ए]ते; T2 G1 [ए]व (for [इ]मे). D1 विरूपाक्ष्यादयश्चेमे.—[b]) D1 सह-; G2 सर्व- (for सर्वे). D1 -पुंगवैः.—[c]) D8 रक्तनीलासनं गृह्य; T2 अशक्ता इव संगृह्य.—[d]) T2 -ह्रदं. D7 G2 गोमयं ह्रदं.—For 25[cd], Ś1 Ñ1 (illeg.).2 V2 B D1–4.6.10.11 subst.:

616* पीतैर्निवासिता वस्त्रैः क्रीडन्तो गोमये ह्रदे।

[Ś1 D10 निवसनैर्हृष्टाः; B2 निवासितैर्वस्त्रैः; D1–4.11 निवसनैर्दृष्टाः (for निवासिता वस्त्रैः). Ś1 Ñ2 V2 D10 गोमयह्रदे.]

—Thereafter Ś1 Ñ B1.4 D2.3.6.10.11 cont.; D1 cont. after l. 3 of 618*; D4 cont. after l. 2 of 618*:

617* श्वेतपर्वतमारूढस्त्वेक एव विभीषणः।
चतुर्भिः सचिवैः सार्धं राक्षसैरनिलादिभिः।

[(l. 1) Ś1 Ñ2 D4.10.11 श्वेतं; B1 एक- (for श्वेत-). D1 आरूढम्. B1 D4.11 एक (for त्वेक). D1 एकमेव विभीषणं (for the post. half).—(l. 2) B4 D3 अनलादिभिः.]

—D3 further cont.; D1.4 cont. after 616*:

618* लङ्कायां च सदा रात्रौ पुरुषः कृष्णपिङ्गलः।
कालो गृह्णाणि सर्वाणि पर्यटन्वै पुनः पुनः।
चकर्ष राक्षसान्सर्वान्वर्जयित्वा विभीषणम्।
एवंविधो मया स्वप्नो दृष्टो राक्षससंक्षयः।

[(l. 1) D3 वानरः पुरुषर्षभः (sic) (for the post. half).—(l. 2) D3 काले (for कालो). D1 खे (for वै).—(l. 4) D1 transp. स्वप्नो and दृष्टो.]

26 V1 illeg. for 26 (cf. v.l. 12). T1 damaged for 26[ab] (cf. v.l. 25). G3 illeg for 26–27[a].—[a]) Ś1 D10 उपसर्पत; Ñ V2 B D1.2.4.6.11 अपसर्पत; D3 अपसर्पतु; M3 अव°; Cr.g.k.t as in text (for अपगच्छत). Ś1 Ñ1 V2 B3 D1.2.7–11 Ck.t पश्यध्वं; Cr.g as in text (for नश्यध्वं). T2 अवगच्छन्ति तोयः.—[b]) D8 T3 G1.2 M3 Cg आप स; M1 संप्राप्य; Ck.t as in text (for आप्नोति). Ś1 Ñ B D3.4.6.11 श्रुत्वा खलु स; V2 B4 D2.10 श्रुत्वा स खलु; D1 मा कुर्युः स (for सीतामाप्नोति).—D8 om. (hapl.) 26[c]–27.—[c]) Ś1 पातयेत् (for घात°). D2 परामर्षी च (for परमामर्षी).—[d]) D7.9 युष्मान् (for सर्वैः). G1.2 M1 राक्षसान् (for °सैः). Ś1 Ñ1 D1–3.10.11 सर्वानागत्य(D1.2 °म्य)राक्षवान्; Ñ2 V2 B D6 सर्वानेव हि राक्षसान्; D4 सर्वान्सपदि राक्षसान्. ❀ Cr.g: नश्यध्वम्। अदर्शनं प्राप्नुत। आत्मनेपदमार्षम्। (Cg सीतामाप सीरामचिरेणाप्स्यतीत्यर्थः। सर्वैः राक्षसैः सार्धं घातयेद्वा इति सिद्धम्। अपगच्छत नश्यध्वमित्युक्ते रावणमित्यध्याहारो वा). ❀

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 27. 25
B. 5. 27. 35
L. 5. 21. 27

प्रियां बहुमतां भार्यां वनवासमनुव्रताम् ।
भर्त्सितां तर्जितां वापि नानुमंस्यति राघवः ॥ २७
तदलं क्रूरवाक्यैर्वैः सान्त्वमेवाभिधीयताम् ।
अभियाचाम वैदेहीमेतद्धि मम रोचते ॥ २८
यस्या ह्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते ।
सा दुःखैर्बहुभिर्मुक्ता प्रियं प्राप्नोत्यनुत्तमम् ॥ २९
भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया ।
राघवाद्धि भयं घोरं राक्षसानामुपस्थितम् ॥ ३०
प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ।
अलमेषा परित्रातुं राक्षस्यो महतो भयात् ॥ ३१
अपि चास्या विशालाक्ष्या न किंचिदुपलक्षये ।
विरुद्धमपि चाङ्गेषु सुसूक्ष्ममपि लक्षणम् ॥ ३२
छायावैगुण्यमात्रं तु शङ्के दुःखमुपस्थितम् ।
अदुःखार्हामिमां देवीं वैहायसमुपस्थिताम् ॥ ३३
अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थिताम् ।
राक्षसेन्द्रविनाशं च विजयं राघवस्य च ॥ ३४

27 Ñ1 V1 illeg. for 27 (for V1, cf. v.l. 12). D8 om. 27 (cf. v.l. 26). G3 illeg. for 27^{a} (cf. v.l. 26). —^{b}) Ś1 Ñ2 V2 B D2-4.6.10.11 वनवासेष्यनुव्रतां (B4 °त्तमां). —T1 damaged for 27^{c}-28. —^{c}) Ś1 D1-4.10.11 त्रा(D11 वा)सितां (for तर्जितां). Ś1 B1.3 चापि; Ñ2 D6 चैव (for वापि). —^{d}) T2 G1 Cr [अ]वमंस्यति. Ś1 D1-4.10.11 राघवो नानुमंस्यते; Ñ2 V2 B D6 न रामो मर्षयिष्यति. —After 27, V2 B read 35-37.

28 V1 illeg. for 28 (cf. v.l. 12). T1 damaged for 28 (cf. v.l. 27). V2 B om. 28. G3 damaged for 28. —^{a}) D7.9 च; G2 वा (for वः). D3 -वाक्यार्थैः; T2 -वाग्भिर्वः (for -वाक्यैर्वः). —^{b}) D6 सांत्वयित्वा विधीयतां. —^{c}) Ś1 Ñ D3.4.6.10.11 T3 अभियाचत; D2 अभिवाद्य च; Cr.g as in text. —After 28, Ñ2 D6 read 35-37.

29 V1 illeg. for 29 (cf. v.l. 12). —^{a}) D5 T1.2 G2 M3 यस्यां (for यस्या). Ś1 D10 एवंविधः; Ñ2 V2 B1.2.4 D6 ह्येतादृशः; B3 चैतादृशः (for ह्येवंविधः). D1 अस्यस्यैवंविधः (corrupt); T3 M3 यस्यासेवंविध. —^{b}) T G2 M2.3 दुःखितायां. Ś1 D10 प्रदर्शितः (for प्रदृश्यते). D5 दुःखितायां प्रपद्यते. —Ñ1 illeg. for 29^{cd}. —^{c}) T1.3 G1 M3 विविधैर् (for बहुभिर्). D1 सा दुःखं सर्वमुत्सृज्य. —^{d}) D1 सुखं (for प्रियं). Ś1 D3.10.11 श्रियं प्राप्नोत्यनुत्तमां; Ñ2 V2 B D6 प्रियं पश्यत्यनंतरं.

30 V1 illeg. for 30 (cf. v.l. 12). T1 damaged for 30-31. —^{a}) D5 तर्जितामिति. Ñ2 V2 B D1.4.6.11 तत्सीतामभि(D2 °पि)याव(D11 °वाञ्छ)ध्वं(V2 B1-3 D6 °चामो). —^{b}) B4 किमु वक्षया (sic); G2 किं विपक्ष्यया (sic). – G3 mostly damaged for ^{cd}. —^{c}) D2 यद् (for हि). —^{d}) M1 अपि (for उप-). —After 30, D8 G3 ins.:

619* ततस्ता सहिताः सर्वा विहताशा निरुद्यमाः ।
परिक्षिप्य समस्तास्ता निद्रावशमुपागताः ।
तासु चैवं प्रसुप्तासु सीता भर्तुर्हिते रता ।
विलप्य करुणं दीना प्रशशोच सुदुःखिता ।
तासां मध्यात्समुत्थाय त्रिजटा वाक्यमब्रवीत् । [5]

[Cf. 5.56. 73-74 (including star passage). G3 mostly damaged for l. 1.—(l. 1) G3 समुद्यमाः (for निरु°). —(l. 3) G3 चैव (for चैवं). —(l. 5) G3 मध्ये (for मध्यात्).]

31 V1 illeg. for 31 (cf. v.l. 12). T1 damaged for 31 (cf. v.l. 30). Ñ2 V2 B1-3 D6 om. 31. —^{c}) Ś1 Ñ1 D1.10 आर्ता; D3.4 आर्ताः; D2 अत्र (for एषा). —^{a}) Ś1 Ñ1 B4 D1-4.10.11 G2 राक्षसीर् (for °स्यो).

32 V1 illeg. for 32 (cf. v.l. 12). D8 reads 32-33 after 35. —^{a}) B1(also).3 तथा चास्याः; D3 अभिवाद्य (for अपि चास्या). B2 एतत्त्वस्यां विशालाक्ष्यां. —^{b}) D11 नो (for न). D1-3 उपलक्ष्यते. —After 32^{ab}, B3 ins.:

620* देव्याः कथयतीवास्या राघवं पुरतः स्थितम् ।
राक्षस्योऽथ विशालाक्ष्या न किंचिदुपलक्षये ।

—^{c}) Ñ1 D5.7-10 Ck.t विरूपम् (for विरुद्धम्). Ś1 विरूपमथवांगेषु; Ñ2 B विरुद्धं(B2-4 द्ध-) गुणसंगेषु; V2 D1.6 विरुद्धगुणमंगेषु; D4 विरूपगुणमंगेषु. ❀ Ct: अपि चेति। द्वितीयमपि चेति पादपूरणे. ❀ —^{d}) Ś1 D3.10 यत्; B2 D1.7.9 T2 न; D2 स- (for सु-). Ś1 जायते; D4 [अ]लक्ष्येः; D10 किंचन (for लक्षणम्).

33 V1 illeg. for 33 (cf. v.l. 12). D4 om. 33. T1 damaged for 33-35^{b}. D8 reads 32-33 after 35. —^{a}) Ś1 Ñ1 D2.3.10.11 -वैगुण्यमाया(D2.11 °ख्या)ति. Ñ2 V2 B D6 ईषद्वै(V2 B1 [m. also].3.4 इयं वै)गुण्यमात्रेण. ❀ Cv: छायावैगुण्यमात्रा(त्रं) त्विति सम्यक्. ❀ —^{b}) Ś1 Ñ1 D2.3.10.11 यतो (for शङ्के). Ñ2 V2 B D6 उपागता D6 °मत्) (for उपस्थितम्). —D3.10 om. 33^{cd}. D5 reads 33^{cd} except अदुःखा in marg. —^{a}) Ś1 D1.2.11 नियतां सत्पथे स्थितां; Ñ1 नियतां समुपस्थितां; Ñ2 V2 B D6 न क्लेशयितुमर्हथ. —After 33, Ñ2 V2 B D6 ins.:

621* इयं वै देवगुह्येन(B3 °व) रक्षोनाशार्थमागता ।

34 V1 illeg. for 34 (cf. v.l. 12). T1 damaged for 34 (cf. v.l. 33). D2 T3 M1 om. (hapl.) 34^{ab}. —^{a}) Ś1 अत्र (for अर्थ-). T2 च (for तु). —^{b}) G3 समु-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

निमित्तभूतमेतत्तु श्रोतुमस्या महत्प्रियम् ।
दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतम् ॥ ३५
ईषच्च हृषितो वास्या दक्षिणाया ह्यदक्षिणः ।
अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते ॥ ३६
करेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः ।
वेपन्सूचयतीवास्या राघवं पुरतः स्थितम् ॥ ३७
पक्षी च शाखानिलयं प्रविष्टः
पुनः पुनश्चोत्तमसान्त्ववादी ।
सुस्वागतां वाचमुदीरयानः
पुनः पुनश्चोदयतीव हृष्टः ॥ ३८

G. 5. 27. 35
B. 5. 27. 46
L. 5. 21. 38

इति श्रीरामायणे सुन्दरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

पस्थितां; Cm.g.k.t as in text (for [अ]हमुप°). Ñ1 ****बलक्षये (illeg.). —c) Ñ2 V2 B D6 रावणस्य (for राक्षसेन्द्र-). —d) T2 राघवस्य जयं तथा.

35 V1 illeg. for 34 (cf. v.l. 12). T1 damaged for 35ab (cf. v.l. 33). Ñ2 V2 B (V2 B after 27 owing to om.) D6 read 35–37 after 28. —a) Ñ2 V2 B D6 हि (for तु). D2 निमित्तमेतद्भूतं तु. —b) D4 स्तोतुम् (sic) (for श्रोतुम्). D1 M2 श्रियं; D4 फलं (for प्रियम्). Ñ2 V2 B D6 श्रुत्वास्याः सु(Ñ2 D6 °त्वा*स्या)महत्प्रियं. —Ñ2 V2 B1–3 D6 transp. 35cd and 36ab. —c) Ś1 D1–4.10.11 स्फुरत्पश्यामि(D11 °त्तस्यापि) नयनं; Ñ2 V2 B D6 पश्यत स्पंदमानं च. —d) D2 [उ]द्भतं (for [आ]यतम्). —After 35, Ñ2 V2 B D6 ins.:

622* सर्वासामेव युष्माकं प्रत्यक्षमिव लोचनम् ।

[·B1.2 D6 इह (for इव).];

while D8 reads 32–33 after 35.

36 V1 illeg. for 36 (cf. v.l. 12). For sequence in Ñ2 V2 B D6, cf. v.l. 35. —ab) T1.3 एतच् (for ईषच्). M1 हृषितं. D2 [अ]दूषितोपि; T2 स्फुटितं च (for हृषितो वा). Ñ D1.3 ह्यस्याः; D8 G2 बाहुर् (for बास्या). Ñ2 V2 B D6 ईषत्(B3 यथा) प्रहसितं सौम्यं; D4 ईषच्च हर्षते ह्यस्या (sic); D11 ईषत्प्रहसितोप्यस्या (for a). Ñ2 V2 B D6 M1 प्र(B1 M1 ह्य)दक्षिणं (for ह्यदक्षिणः). D1 दक्षिणाभिप्रदक्षिणं; D2–4.11 दक्षिणोति(D11 °पि)प्रदक्षिणः (D2 °णं; D4 °णा) (for b). Ś1 D10 एष चादूषितो ह्य(D10 °तोप्य)स्या दक्षिणोति(D10 °पि)प्रदक्षिणः. —T1 damaged for 36c–38b. —c) D3.10 अथ (for एव). —d) T2 एष (for एकः). Ś1 D5.10 प्रवेपते; Ñ2 V2 B D6 प्रवेपितः; D3.4 स्म वेपते (for प्रकम्पते). D1 बाहुः सद्यः सवेपथुः; D11 बाहुकंपः प्रवेपतः.

37 V1 illeg. for 37 (cf. v.l. 12). T1 damaged for 37 (cf. v.l. 36). For sequence in Ñ2 V2 B D6, cf. v.l. 35. —a) D5 करेणोर् (for करेणु-). D6 -हेम- (for -हस्त-). B3 -प्रतिमं. —b) Ś1 Ñ1 D1–3.10.11 सवेपथुः; D9 अनुत्तमं (for अनुत्तमः). B3 सव्यं चोत्तरमुत्तमं; D4 *द्य******. —cd) Ś1 Ñ1 D1–3.10.11 देव्याः; T2 एष; M2 वपुः; Cv.t as in text (for वेपन्). G1 [अ]ग्रे; M2 [अ]स्यै (for [अ]स्या). Ñ2 V2 B D6 रूपं कथयतीवास्याः; D5 वेपते सूचयत्यस्याः; D8 T3 G2 M3 वेपमानः सूचयति; M1 वेपयन्सूचयन्नग्रे (for c). Ś1 Ñ1 D2.3.10.11 राघवं स्थितमग्रतः (for d). D4 देव्यास्तं राघवं**सूचयंतीवमग्रतः. ❀ Cv: वेपन्सूचयतीवास्या इति पाठः. ❀

38 V1 illeg. for 38. T1 damaged for 38ab (cf. v.l. 36). —a) D3.8 Ck [इ]व; Cv as in text (for च). T2 -निचयं; Cv as in text (for °लयं). M1 प्रहृष्टः; Cv as in text (for °विष्टः). Ś1 D3.10 -[आ]लयनः प्रहृष्टः; Ñ1 G2 -निलयः प्रहृष्टः; Ñ2 B1.2.4 D6 -निलयोभ्वु(D6 °प्यु)वाच; V2 -निलयादुवाच; B3 -निलयो ह्यब्रवीत्; D1 -निलयः प्रकामं; D2.11 -[आ]लयनः प्रकामं(D2 पुनः पुनः). —b) Ś1 D2.10 -शांतवादी(Ś1 °ची) (for -सान्त्ववादी). Ñ1 श्रोतुमसांत्ववादी (for चोत्तम°). B3 पुनः शुभं चोत्तमशांत-वादी. —c) Ś1 B4 D1.3.7–9 सुखा(B4 D1 स्वमा)गतां; Cv.r.m.g.t as in text (for सुस्वागतां). B2 D11 सुखागतं वः स (D11 वाक्यम्). Ś1 Ñ V2 B D6.10 उदीरयन्वै(Ñ1 °यंश्च). —d) G3 प्रहृष्टः (for [इ]व हृष्टः). Ś1 Ñ1 D2.10.11 प्रत्यागमं(D2 °तं) चोदय(Ś1 D10 दर्शय; Ñ1 दर्शय)तीव काकः; Ñ2 V2 B D6 प्राप्तं प्रियं दर्शयतीव काकः; D1 प्रीत्योदयं चोदयतीव काकः; D3.4 प्रत्यागमं नोदयतीव काकः. —After 38, D1(l. 1–4 only).3.4 ins.:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

२६

G. 5. 28. 1
B. 5. 28. 1
L. 5. 22. 1

सा राक्षसेन्द्रस्य वचो निशम्य
तद्रावणस्याप्रियमप्रियार्ता ।
सीता वितत्रास यथा वनान्ते
सिंहाभिपन्ना गजराजकन्या ॥ १

सा राक्षसीमध्यगता च भीरु-
र्वाग्भिर्भृशं रावणतर्जिता च ।
कान्तारमध्ये विजने विसृष्टा
बालेव कन्या विललाप सीता ॥ २

सत्यं बतेदं प्रवदन्ति लोके
नाकालमृत्युर्भवतीति सन्तः ।
यत्राहमेवं परिभर्त्स्यमाना
जीवामि किंचित्क्षणमप्यपुण्या ॥ ३

सुखाद्विहीनं बहुदुःखपूर्ण-
मिदं तु नूनं हृदयं स्थिरं मे ।
विदीर्यते यन्न सहस्रधाद्य
वज्राहतं शृङ्गमिवाचलस्य ॥ ४

623* त्यजस्व सीते हृदि शोकमुद्गतं
प्रीतिं भज स्वाभ्युदयः समागतः ।
निःशेषचन्द्रं प्रतिपूर्णमानसा
संप्राप्स्यसे जानकि कोशलेन्द्रम् ।
इत्येवमुक्ते वचने तदानीं [5]
प्रहस्य दीर्घं रुषितो गणश्च ।
स राक्षसीं तां निजगाद वाक्यं
मा पण्डिते क्षुद्रमिहालपस्व ।
किं कुर्महे स्वामिभावे स्थितासि
प्रातः सर्वं श्रोष्यते राक्षसेन्द्रः । [10]
एवं प्रलापान्बहुधैव कृत्वा
सुप्तो गणस्त्रिजटा सापि सुप्ता ।

[(l. 1) D1 उच्छ्रितं; D3 उद्धतं (for उद्गतं). —(l. 2) D4 समागमं (sic) (for °गतः). —(l. 3) D1.3 -चंद्रप्रतिपूर्णमानसं- (D3 °सा). —(l. 4) D1 अवाप्स्यसि; D3 समाप्स्यसे. —(l. 6) D3 सः (for च).];
while D7-9 ins.:

624* ततः सा हीमती बाला भर्तुर्विजयहर्षिता ।
अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः ।

Colophon: V1 illeg. —*Sarga name*: Ś1 त्रिजटादुःस्वप्नसंदर्शनं; Ñ1 D1.3.4.11 त्रिजटास्वप्नदर्शनः; Ñ2 V2 B4 D6 त्रिजटास्वप्नदर्शनं; B1.3 त्रिजटास्वप्नकथनं; B2 स्वप्नदर्शनं; D2 त्रिजटास्वप्नवर्णनः; D10 त्रिजटास्वप्नः. —*Sarga no.* (figures, words or both): Ñ1 D1.2.4.10.11 om.; Ś1 24; Ñ2 B1 D5-9 T G M1.3 27; V2 18; B2.3 M2 26; B4 D3 28. —After colophon, G concludes with श्रीरामाय नमः.

26

M2 begins with श्रीरामाय नमः.

1 V1 illeg. up to हा in ^{d}. —^{a}) B4 तद् (for सा). Ś1 D3 विचिंत्य (for निशम्य). G1 निशम्य वाक्यं (for वचो निशम्य). —^{b}) Ś1 Ñ V2 B D1-4.6.10 तद्राक्षसीनां च वचः सुतीक्ष्णं. —^{c}) D4 तदा (for यथा). —^{d}) D5.7 -[अ]विपन्नाः; M1 -[उ]प° (for -[अ]भि°). Ñ2 V2 B D2.4.6 सिंहाभिपन्ने (B1.3 °हाद्विपन्ने; B2 °हावपन्ने; B4 °हावसन्ने) व गजेंद्रकन्या.

2 ^{a}) B3 * भीरुस्; D3 सुभीता; D10 [अ]पि भीरुर्; D11 सुभीरुर् (for च भीरुर्). —^{b}) Ś1 D1.10 वाक्यैर्; Ñ V B D2.4.6 तथा (for वाग्भिर्). B4 D2 -गर्जिता; D11 -निर्जिता (for -तर्जिता). —^{c}) Ñ2 V1 B D2.6 विहीना (for विसृष्टा). —^{d}) Ñ2 V B D6 योषा; D2.4 योषिद् (for कन्या). B3 निपपात (for विललाप). Ñ2 योषा (for सीता). D3 रुरोद सीता कुररीव विघ्ना.

3 ^{a}) Ś1 D10 तथेदं; D1 बतेति; D2 यदेतत्; D3 न मिथ्या; D4 हितेदं (sic); D11 च तेदं (sic) (for बतेदं). D11 लोका. Ñ2 V B D6 सत्यं वचो यत्प्रवदंति (B3 प्र**) विप्रा (B4 लोका). —^{b}) T2\हरति; G1 भविता (for भवति). B1.4 [इ]ह (for [इ]ति. Ś1 D10 विज्ञाः; Ñ V B D6 लोके; D1-4.11 तज्ज्ञाः (for सन्तः).

☞ V1 illeg. from 3^{c} up to colophon. —^{c}) D3 एका (for एवं). Ś1 D10 परित्तर्ज्यमाना; Ñ2 V2 B D6 पतिना विहीना. —^{d}) Ñ2 B1-3 D6 सीता; V2 B4 भीता; D7.9 Ck.t यस्मात् (for किंचित्). Ś1 Ñ1 D10 कृपणाल्पपुण्या; B1 D1.5.11 T2 G3 M2 क्षण (D1 फल) मल्प°; B3 क्षणमप्युपास्या (for क्षणमप्यपुण्या). ❀ Cr.m: यत्र यतः।; Cg: यत्र येन। किंचिज्जीवामि कुत्सितं जीवामि. ❀

4 ^{a}) Ś1 Ñ V2 B2-4 D3.4.6.10 सुखैर्; B1 (m. also as in B2) अर्थैर् (for सुखाद्). —^{b}) Ñ V2 B D1.3.4.6 हि (for तु). D3 दृढं (for स्थिरं). —After 4^{ab}, D1 erroneously repeats 3^{c}–4^{b} and then again 3^{c}. —^{c}) D1.3 T1.3 G2 M1.3 विशीर्यते. Ś1 Ñ V2 D1-4.6-9.11 यत्र (for यन्न). D2.6 सहस्रधा च.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

नैवास्ति नूनं मम दोषमत्र
वध्याहमस्याप्रियदर्शनस्य ।
भावं न चास्याहमनुप्रदातु-
मलं द्विजो मन्त्रमिवाद्विजाय ॥ ५
नूनं ममाङ्गान्यचिरादनार्यः
शस्त्रैः शितैश्छेत्स्यति राक्षसेन्द्रः ।
तस्मिन्ननागच्छति लोकनाथे
गर्भस्थजन्तोरिव शल्यकृन्तः ॥ ६
दुःखं बतेदं मम दुःखितायाः
मासौ चिरायाभिगमिष्यतो द्वौ ।
बद्धस्य वध्यस्य यथा निशान्ते
राजापराधादिव तस्करस्य ॥ ७
हा राम हा लक्ष्मण हा सुमित्रे
हा राममातः सह मे जनन्या ।
एषा विपद्याम्यहमल्पभाग्या
महार्णवे नौरिव मूढवाता ॥ ८
तरस्विनौ धारयता मृगस्य
सत्त्वेन रूपं मनुजेन्द्रपुत्रौ ।
नूनं विशस्तौ मम कारणात्तौ
सिंहर्षभौ द्वाविव वैद्युतेन ॥ ९

G. 5. 28. 9
B. 5. 28. 9
L. 5. 22. 9

---

5 [a]) T1.3 G1 दोषो (for नूनं). M3 transp. नूनं and दोषम्. T1.3 G1 नूनमत्र; T2 दोष एवम् (for दोषमत्र). Ś1 Ñ1 D1–4.10.11 शेषं (D2 दोषं) त्विदानीं मम नास्ति नूनं (D2 किंचिद्); Ñ2 V2 B D6 नूनं त्विदानीं मम (V2 D6 °नीमव-) शेषमस्ति. ❀ Cv.r.m.g : दोषं दोषः (। Cr.g आर्षं नपुंसक [Cr °कत्व]म्।; so also Ct. ❀ —[b]) Ñ2 V2 B2.4 D6 वध्यास्मि; T2 अद्याहम् (for वध्याहम्). Ś1 B3 D1.10 अद्य; Ñ2 V2 B2.4 D6 तस्य; D5 T1.3 तत्र; T2 अन्या; Cm.g.k.t as in text (for अस्य). —[c]) Ñ1 B2.4 तावन्; D1 भवेन्; M1 भयं (for भावं). Ñ2 B D6 तस्याहम्; D4 वाचाहम् (for चास्याहम्). Ñ2 V2 B1.2.4 -प्रदद्याम्; B3 -प्रयातुम् (for -प्रदातुम्). —[d]) M1 ब्रह्मन् (for मन्त्रम्). Ś1 Ñ V B D1–4.6.10.11 अलं (Ñ2 V2 B1.2.4 महा-) द्विजो ब्रह्म यथांत्यजाय (V2 B3 °जात्य; B4 °जस्य; D6 °जातौ).

6 [a]) Ś1 D10 चिराद् (sic) (for [अ]चिराद्). D1 ममांगं नचिराद्. —[b]) D5.7.9 शरैः (for शस्त्रैः). D1.3.11 शतैश्. V2 B1.2.4 राक्षसोयं (for °सेन्द्रः). —[c]) D1 न चागच्छति; D2 त्वना° (for अना°). Ś1 D10 लोकपाले. —[d]) Ś1 Ñ1 D1.3.10.11 -हर्ता (for -कृन्तः). Ñ2 V2 B1.2 D4.6 गर्भान्विनष्टानिव शल्यहर्ता (Ñ2 °कृंतः); B3 * * * गर्भानि * शल्यहर्ता; B4 गर्भान्विशिष्टानिव शल्यकर्ता; D2 गर्भस्थनिष्टानि विशल्यहर्ता (sic). ❀ Cv : शल्यकृन्तोऽस्वष्टः।; Cr.m.g : शल्यकृन्तो नापितः।; Ck.t : शल्यं शस्त्रं तेन कृणत्तीति शल्यकृन्त आम्बष्ठवैद्यः (। Ct आर्षत्वात्साधु). ❀

7 Ś1 D10 om. 7. —[a]) D1 किलेदं; D2.3 बतेमौ; D11 M2 ममेदं; G3 यदेतत्; Cv.g.k.t as in text (for बतेदं). D7–9 ननु; M2 बत (for मम). Ñ1 D1–4.11 दौर्मनस्या (D11 °स्य [sic])न् (for दुःखितायाः). —[b]) T2 योसौ (for मासौ). D1–4 [अ]द्य; T1.3 G2 M3 Cr.g [अ]धि-; G1 [अ]ति-; G3 [अ]प-; Ct as in text (for [अ]भि-). T2 -[अ]भिगमिष्यते. Ñ1 om.; T2 [ऽ]द्य (for द्वौ). D11 नेमौ चिरायाद्य गमिष्यतो तौ. —For 7[ab], Ñ2 V2 B D6 subst., while Ñ1 cont. after 626* :

625* द्वौ चापि मासौ समयावशिष्टौ
दण्डश्च मे धास्यति तीक्ष्णरोषः ।

[(l. 1) D6 समयोवशिष्टो. —(l. 2) D6 दास्यति. B3 -दंडः (for -रोषः).]

—[c]) D1–3.11 G3 वध्यस्य बद्धस्य (by transp.); D2 वध्यस्य बंधैर्हि. M2.3 Cv.g तथा; Cr.m.gp as in text (for यथा). Ñ2 V2 B D6 [अ]वशिष्टो (B3.4 °ष्टौ) (for निशान्ते). —[d]) Ñ1 राजोपहतुं दिव (sic); Ñ2 V2 B D6 राजापराधैरिव (B3 °बत); D1–4.11 राजा (D1.3 °ज्ञा)पकर्तुस्त्विव (D2.11 °ह); D5 T2 G3 Cv राजोपचा (G3 °का)रादिव; D7.9 राजोपरोधादिव; Cr.m.g as in text (for राजापराधादिव). ❀ Cg : यथेति पाठ इवशब्दो वाक्यालङ्कारे. ❀

8 [b]) D7.9 G3 Ck.t जनन्यः; D4 जनस्य (sic); T2 न तस्याः (for जनन्या). —[c]) Ñ2 V2 B D6 विन (V2 °प)श्यामि; G1 मरिष्यामि; G3 °स्यामि; Ct as in text (for विपद्यामि). Ś1 Ñ1 D10 एषाभि (Ñ1 एवं वि)पद्ये भृशमल्पपुण्या; D1–4.11 एषा विपद्ये (D3 °त्स्ये) भृशमल्पभाग्या. —[d]) Ś1 Ñ1 D11 वातरुग्णा; Ñ2 V2 B1–3 D4.6 वातमू (Ñ2 °गू)ढा; B4 वातभग्ना; D1 रूक्षवातात्; D2 वातहत्या; D3 मंदवाता; D10 वायुनुन्ना; Cr.m.g.k.t as in text (for मूढवाता).

9 [ab]) B2 G2 M2 तरस्विना (B2 °नो); Cr.m.g.k.t as in text. Ñ2 B1–3 D6 धारयतो (for °ता). Ñ2 V2 B1–3 D6 व्याजेन (for सत्त्वेन). Ś1 Ñ1 B4 D1–4.10.11 तौ धारयंतौ हि मृगाधिपस्य सत्त्वं च रूपं (Ñ1 वीर्यं) च नरेंद्र (B4 मनुजेंद्र)पुत्रौ. —After 9[ab], Ñ1 ins. :

626* पराक्रमं रूपमनन्तविक्रमौ
तौ राजसिंहौ सुदुरासदौ च ।

—Thereafter Ñ1 cont. 625*. —[c]) Ś1 Ñ V2 B D1–4.6.10.11 विनष्टौ; Cr.g.k.t as in text (for विशस्तौ).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 28. 10
B. 5. 28. 10
L. 5. 22. 10

नूनं स कालो मृगरूपधारी
मामल्पभाग्यां लुलुभे तदानीम् ।
यत्रार्यपुत्रं विससर्ज मूढा
रामानुजं लक्ष्मणपूर्वजं च ॥ १०

हा राम सत्यव्रत दीर्घबाहो
हा पूर्णचन्द्रप्रतिमानवक्त्र ।
हा जीवलोकस्य हितः प्रियश्च
वध्यां न मां वेत्सि हि राक्षसानाम् ॥ ११

अनन्यदेवत्वमियं क्षमा च
भूमौ च शय्या नियमश्च धर्मे ।
पतिव्रतात्वं विफलं ममेदं
कृतं कृतघ्नेष्विव मानुषाणाम् ॥ १२

मोघो हि धर्मश्चरितो ममायं
तथैकपत्नीत्वमिदं निरर्थम् ।
या त्वां न पश्यामि कृशा विवर्णा
हीना त्वया संगमने निराशा ॥ १३

पितुर्निदेशं नियमेन कृत्वा
वनान्निवृत्तश्चरितव्रतश्च ।
स्त्रीभिस्तु मन्ये विपुलेक्षणाभिः
संरंस्यसे वीतभयः कृतार्थः ॥ १४

अहं तु राम त्वयि जातकामा
चिरं विनाशाय निबद्धभावा ।
मोघं चरित्वाथ तपो व्रतं च
त्यक्ष्यामि धिग्जीवितमल्पभाग्या ॥ १५

Ś1 D1.10 कारणाय; Ñ2 B1.2.4 D6 कारणे तौ; B3 कारणेन; D3.4.11 °णात्तु; T2 °णार्थं. —[d]) B2 reads सिंहर्षभौ in marg. D3 अपि (for इव). Ś1 D10 वैकृतेन; D1.4 विद्युतेन; Cv.r.m.g.t as in text (for वैद्यु°). Ñ2 V2 B D6 सिंहर्षभौ वै(B3 वि)द्युतवह्निनेव.

10 [a]) B D6 -वेश- (for -रूप-). —[b]) Ś1 मम (for माम्). Ś1 B3 -भाग्यात्; Ñ V2 B1.2.4 D2.4.6 -पुण्यां. Ś1 लभते (for लुलुभे). —V2 om. 10[c]. B1 repeats 10[cd] after 11[ab]. —[cd]) D5.7.9 G2 -पुत्रौ (for -पुत्र). Ñ2 B1(both times).2–4 D6 न्ययोजयं तत्र(Ñ2 D6 यत्र; B2 यत्न) विमूढचेता (for [c]). Ś1 Ñ1 D1–4.10.11 मोहान्मया तत्र तु तौ(D2 ततो; D3 तदा) नियुक्तौ रामानुजो लक्ष्मणपूर्वजश्च. ❀ Cr.m.g: यत्र यस्मिन्काले(Cr °स्मात्कारणात्)। विससर्ज(Cg °र्जेति)। सृजेरु(Cg °र्जेर्लिट्यु)त्तमपुरुषैकवचनम् (Cm °र्जे व्यसृजम्)।; Ck: विससर्ज विसृष्टवती। अपरोक्षेऽपि (Ct °पि चित्तविक्षेपादिना पारोक्ष्यमारोप्य) लिट्. ❀

11 V2 B2.3 om. 11[a]–19[b]. B1 reads 11[ab] in marg. —[b]) B1.4 D3.4.6.11 -प्रतिरूप- (for °मान-). Ñ1 -रूप (for -वक्त्र). —After 11[ab], B1 repeats 10[cd]. —B1 om. 11[c]–19[b]. —[c]) B4 हा वीर-; D1 राजेव; D3 हे जीव- (for हा जीव-). Ś1 Ñ B4 D1–4.6.10.11 हित प्रियाद्य. T2 हितप्रियस्त्वं; G1 M1 हितप्रियां च; Ck.t as in text (for हितः प्रियश्च). —[d]) Ś1 वशां; D4 वश्यां (for वध्यां). D2 वध्यामिमां. Ś1 D10 वेत्स्यसि; Ñ1 पश्यसि; D2 वेत्सि न (for वेत्सि हि). D1.4 राक्षसीनां. D3 वश्यां प्रियां वेत्सि न राक्षसीनां.

12 Ś1 V2 B1–3 D10 om. 12 (for V2 B1–3 cf. v.l. 11). —[a]) Ñ1 D6 इमं; Ñ2 B4 D1.2.4.11 T2 G1 M1 (after corr. as in text).2 इदं; Cg.k.t as in text (for इयं). Ñ1 क्रमात्तु; Ñ2 D6 ममाद्य; D1.11 क्रमाच्च; D2 मयायं; D4 क्रमस्य (for क्षमा च). —[b]) D4 तु (for च). D1.4 नियमा(D4 °ता)श्; D2 T1 नियतश्. Ñ1 B4 धर्मः; D1.4 धर्मा: (for धर्मे). —[c]) Ñ2 न मे स्यात् (for ममेदं). D1.2.4.11 च न(D11 न च)मे फलं स्यात्; D6 सफलं न मे स्यात्. Ñ1 D3 पतिव्रतात्वं च ममाफलं स्यात्; B4 पतिव्रतात्वं च न मे फलाय.

13 V2 B1–3 om. 13 (cf. v.l. 11). —[a]) Ś1 D10 मिथ्या; Ñ2 D5.7–9 M1 Ck.t मोघं (for मोघो). D3 च (for हि). Ś1 Ñ1 D1.2.6.9–11 T1 मयार्यं(Ś1 °यत्) (for ममायं). B4 ततो हि धर्मश्च विभो ममायं. —[b]) Ś1 Ñ2 B4 तथैव; D2 तत्रैक-; D11 यथैक- (for तथैक-). Ś1 Ñ2 B4 D1.2.5.7.9.11 T2 G1.2 M1 निरर्थकं; Ñ1 निबंधं (for निरर्थम्). —[c]) Ś1 Ñ1 B4 D1–3.6.11 यत् (for या). G2 यां विपद्यामि; M1 यावन्न पश्यामि. D11 कृता (for कृशा). B4 विवस्त्रा; D5 विशीर्णा (for विवर्णा). —[d]) D5 reads from ना up to शा in marg. D2 दीना (for हीना). D1 संगमता (for °ने). B4 हीना त्वशक्ता मनसो निराशा.

14 V2 B1–3 om. 14 (cf. v.l. 11). —[a]) M2 नियोगं; Cg as in text (for निदेशं). Ś1 Ñ B4 D1.2.4.6.10.11 पितुर्निदेशा(B4 D1 °योगा)न्नियमाद्(D2 °त्प्र; D4 °न्न)ही (B4 °दी)नो. —[b]) D3 व्रतान् (for वनान्). —[c]) D4.6 T2.3 G1 च (for तु). Ś1 D10 मध्ये (for मन्ये). T2 विवृत- (for विपुल-). B4 स्त्रीभिस्त्वमन्यैर्विमलेक्षणाभिः. —[d]) B4 संवत्स्यसे; D5 G2 M1.3 Cg त्वं रंस्यसे; T2 त्वं मन्यसे; T3 G3 संरंस्यते (for संरंस्यसे).

15 V2 B1–3 om. 15 (cf. v.l. 11). —[a]) Ñ2 D6 हि (for तु). —[b]) Ś1 Ñ B4 D1–3.6.10.11 सदा (for चिरं). Ś1 Ñ1 D10 निवासाय (for विनाशाय). B4 विवर्ण-; D1.3.6 विवृद्ध- (for निबद्ध-). Ś1 निबद्धकामा. D4 सदा

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

सा जीवितं क्षिप्रमहं त्यजेयं
विषेण शस्त्रेण शितेन वापि ।
विषस्य दाता न तु मेऽस्ति कश्चि-
च्छस्त्रस्य वा वेश्मनि राक्षसस्य ॥ १६
शोकाभितप्ता बहुधा विचिन्त्य
सीताथ वेण्युद्ग्रथनं गृहीत्वा ।
उद्बध्य वेण्युद्ग्रथनेन शीघ्र-
महं गमिष्यामि यमस्य मूलम् ॥ १७
इतीव सीता बहुधा विलप्य
सर्वात्मना राममनुस्मरन्ती ।
प्रवेपमाना परिशुष्कवक्त्रा
नगोत्तमं पुष्पितमाससाद ॥ १८
उपस्थिता सा मृदुसर्वगात्री
शाखां गृहीत्वाथ नगस्य तस्य ।
तस्यास्तु रामं प्रविचिन्तयन्त्या
रामानुजं स्वं च कुलं शुभाङ्ग्याः ॥ १९
शोकानिमित्तानि तदा बहूनि
धैर्यार्जितानि प्रवराणि लोके ।
प्रादुर्निमित्तानि तदा बभूवुः
पुरापि सिद्धान्युपलक्षितानि ॥ २० G. 5. 28. 11 B. 5. 28. 19 L. 5. 22. 19

इति श्रीरामायणे सुन्दरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

विनाशायतिबालभावा (sic). —^{c}) Ñ$_{2}$ मोहं; B$_{4}$ D$_{10}$ स्वयं (for मोघं). Ś$_{1}$ Ñ$_{1}$ B$_{4}$ D$_{2.4.5.8.10}$ G$_{3}$ च; Ñ$_{2}$ D$_{6}$ [अ]द्य; D$_{11}$ स (for [अ]थ). Ñ$_{2}$ D$_{6}$ तपो ध्रुवं (for तपो व्रतं). —^{d}) D$_{4}$ [अ]हं; D$_{11}$ धिग्मां (hypm.) (for धिग्). Ñ$_{1}$ -पुण्या; D$_{7.9.11}$ G$_{3}$ Ck.t -भाग्यां; Cg as in text (for -भाग्या).

16 V$_{2}$ B$_{1-3}$ om. 16 (cf. v.l. 11); Ś$_{1}$ Ñ B$_{4}$ D$_{2.6.10.11}$ om. 16^{ab}. —^{a}) D$_{7}$ T$_{1}$ M$_{1}$ सं-; G$_{1}$ सु-; G$_{2}$ हा (for सा). —D$_{1}$ om. 16^{b}. —^{b}) D$_{5}$ च (for वा). —^{c}) Ś$_{1}$ Ñ$_{1}$ D$_{10}$ नच; Ñ$_{2}$ D$_{6}$ [अ]पि न; D$_{2}$ M$_{2}$ तु न (by transp.); G$_{1}$ M$_{3}$ न हि (for न तु). D$_{1.3}$ च (D$_{3}$ न) ममेह; D$_{4}$ ननु मेस्ति; D$_{11}$ T$_{2}$ न ममास्ति (for न तु मेऽस्ति). D$_{2}$ किंचिच्. —^{d}) D$_{4}$ शस्त्रप्रदो (for छस्त्रस्य वा). Ś$_{1}$ Ñ B$_{4}$ D$_{1-4.6.10.11}$ Cr रावणस्य; Cv.g.k.t as in text. ❀ Cv : राक्षसस्येत्यतः परं, इतीव देवी बहु विवक्ष्यते (बहुधा विलप्येत्ये) तत्। अतः श्लोकात्परतः शोकाभितप्ता बहुधा विचिन्त्येत्येतत्। अनयोः पादयोर्व्यत्यासो लेखकप्रमादकृतः। ; Cr : रावणस्येत्यतः परं, इतीव सीता बहुधा विलप्येत्ययं श्लोको द्रष्टव्यः। अत्र विलप्येति प्रकृतिविलापगमनात्। अतः शोकाभितप्तेति श्लोकः। व्यत्यासस्तु लेखकदोषः।; Ck : राक्षसस्येत्यनन्तरं, "इतीवेत्यादि"। अत्रैकः श्लोकः कश्मलार्थः प्रक्षिप्तः क्वचित्।; so also Ct. ❀

17 V$_{2}$ B$_{1-3}$ om. 17 (cf. v.l. 11); Ñ$_{2}$ D$_{6}$ om. 17^{ab}. D$_{5.7-9}$ T$_{1.3}$ (T$_{1.3}$ om. 18^{cd}) G$_{2}$ M$_{2.3}$ transp. 17 and 18. —^{a}) D$_{10}$ विलप्य (for विचिन्त्य). —^{b}) Ś$_{1}$ Ñ$_{1}$ B$_{4}$ D$_{1-4.11}$ दीना (for सीता). Ñ$_{1}$ D$_{7.9}$ -ग्रथनं; B$_{4}$ -[उ]द्ग्रथने (for -[उ]द्ग्रथनं). D$_{10}$ सर्वात्मना राममनुस्मरंती. —^{c}) Ñ$_{2}$ D$_{5}$ तद्बध्य (D$_{5}$ °द्ध-); D$_{2.10}$ उद्बद्ध-; D$_{3}$ उद्ग्रथ; T$_{2}$ ऊर्द्ध्य (for उद्बध्य). D$_{6}$ T$_{3}$ -[उ]द्ग्रथितेन; D$_{11}$ -[उ]ग्रथने स (sic) (for -[उ]द्ग्रथनेन). Ś$_{1}$ उद्बंधनं वेण्युद्ग्रथनेन शीघ्रम् (hypm.). —^{d}) T$_{2}$ इतो (for अहं). Ñ$_{2}$ नूनं (for मूलम्). ❀ Cv : यमस्य मूलमित्यत्रेतिशब्दश्च योज्यः. ❀

18 V$_{2}$ B$_{1-3}$ om. 18 (cf. v.l. 11). D$_{5.7-9}$ T$_{1.3}$ (T$_{1.3}$ om. 18^{cd}) G$_{2}$ M$_{2.3}$ transp. 17 and 18. —^{a}) Ś$_{1}$ इत्येव; D$_{1}$ अतीव (for इतीव). D$_{5.7-9}$ M$_{3}$ Cv.k.t देवी; Cr as in text (for सीता). —^{b}) Ñ$_{2}$ D$_{6}$ अनुप्रपन्ना. —Ñ$_{2}$ D$_{6}$ T$_{1.3}$ om. 18^{cd}. —^{c}) Ś$_{1}$ प्रवि-; D$_{3}$ बहु- (for परि-). D$_{4}$ -शुद्ध- (for -शुष्क-). Ñ$_{1}$ illeg.; G$_{3}$ -कंठा; Ct as in text (for -वक्त्रा).

19 V$_{2}$ B$_{1-3}$ om. 19^{ab} (cf. v.l. 11). —^{a}) D$_{1.3}$ मृदु (D$_{3}$ मृग)चारुनेत्रा. —^{b}) Ś$_{1}$ B$_{4}$ D$_{1.10}$ तु; D$_{5.7.9}$ च; D$_{6}$ om. (for [अ]थ). Ś$_{1}$ Ñ B$_{4}$ D$_{1-4.6.10.11}$ नगोत्तमस्य. —^{c}) Ñ$_{2}$ V$_{2}$ B$_{1-3}$ D$_{6}$ T$_{2}$ च (for तु). Ś$_{1}$ Ñ$_{1}$ B$_{4}$ D$_{3.4.5.7.9-11}$ T$_{2}$ परि (D$_{5}$ भुवि)चिंतयंत्या; Ñ$_{2}$ V$_{2}$ B$_{1-3}$ D$_{6}$ प्रति (V$_{2}$ °वि)चिंतयंत्याः; D$_{1.2}$ परि (D$_{2}$ प्रवि)चिंतयित्वा (sic); D$_{8}$ G$_{1.3}$ M$_{1.2}$ तु (G$_{3}$ M$_{1}$ च)विचिंतयंत्या. —^{d}) Ñ$_{2}$ V$_{2}$ B पत्युः कुलं (for रामानुजं). B$_{3}$ सूर्य- (for स्वं च). Ś$_{1}$ शुभाय; V$_{2}$ B$_{4}$ D$_{3.10.11}$ शुभायाः; D$_{2}$ सुभाग्या (for शुभाङ्ग्याः). D$_{1}$ रामानुजं च बहुलं विचिंत्य; D$_{6}$ पत्युः कुलं स्वं च कुलेषु भाग्यं.

20 Ñ$_{2}$ V$_{2}$ B$_{1-3}$ D$_{6}$ om. 20^{ab}. —^{a}) Ś$_{1}$ Ñ$_{1}$ B$_{4}$ D$_{1-4.10.11}$ शुभानि सर्वाणि; D$_{7.9}$ Ct तस्या विशोकानि; D$_{8}$ शंका°; T$_{3}$ G$_{2}$ शुभान्नि°; M$_{1}$ शोकापनोदानि; Cr.m.g as in text (for शोकानिमित्तानि). Ś$_{1}$ B$_{4}$ D$_{10}$ T$_{2}$ G$_{2}$ M$_{2.3}$

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

२७

G. 5. 28. 12
B. 5. 29. 1
L. 5. 23. 1

तथागतां तां व्यथितामनिन्दितां
व्यपेतहर्षां परिदीनमानसाम् ।
शुभां निमित्तानि शुभानि भेजिरे
नरं श्रिया जुष्टमिवोपजीविनः ॥ १
तस्याः शुभं वाममरालपक्ष्म-
राजीवृतं कृष्णविशालशुक्लम् ।
प्रास्पन्दतैकं नयनं सुकेश्या
मीनाहतं पद्ममिवाभिताम्रम् ॥ २
भुजश्च चार्वञ्चितपीनवृत्तः
परार्ध्यकालागुरुचन्दनार्हः ।
अनुत्तमेनाध्युषितः प्रियेण
चिरेण वामः समवेपताशु ॥ ३
गजेन्द्रहस्तप्रतिमश्च पीन-
स्तयोर्द्वयोः संहतयोः सुजातः ।
प्रस्पन्दमानः पुनरूरुरस्या
रामं पुरस्तात्स्थितमाचचक्षे ॥ ४
शुभं पुनर्हेमसमानवर्ण-
मीषद्रजोध्वस्तमिवामलाक्ष्याः ।
वासः स्थितायाः शिखराग्रदन्त्याः
किंचित्परिस्रंसत चारुगात्र्याः ॥ ५

तथा (for तदा). —[b]) Ś1 Ñ1 B4 D1.2.4.10.11 सत्यो(D1 °त्त्वो)चितानि; D3 सत्यानि यानि; Cv as in text (for धैर्या-र्जितानि). D8 काले (for लोके). —[c]) D10 T2.3 तथा (for तदा). —[d]) D5 reads [d], except पुरा प्र-, in marg. Ś1 D1.10 पुरा वि-; Ñ1 D11 पुरा सु-; Ñ2 V2 B D6 सुरर्षि-; D2.5 पुरा प्र-; G3 पुराभि-; Cr.m.g.k.t as in text (for पुरापि). Ś1 B3 D1.10 -शुद्धानि; Cr as in text (for सिद्धानि). Ś1 D10.11 सु(D10 स)लक्षणानि; Ñ1 D2.4 सुलक्षि°; B4 [उ]पलक्षणानि. Ñ2 B1.2 सिद्धाभ्यु(Ñ2 °द्यु)-पलक्षितानि.

Colophon : Ñ2 V2 B1–3 D6 om. —*Sarga name* : Ś1 Ñ1 B4 D1.2.4.10.11 सीताबि(Ñ1 D1 °प्र)लापः; D3 सीताशुभदर्शनः. —*Sarga no.* (figures, words or both) : Ñ1 D1.2.4.5.10.11 om.; Ś1 24; B4 D3 29; D7.8 T G M1.3 28; D9 18; M2 27. —After colophon, G concludes with श्रीरामाय नमः.

27

Ñ2 V2 B1–3 D6 cont. the previous Sarga. M2 begins with श्रीरामाय नमः.

1 [a]) D4 अथागतां. T2 परिहीनमानसां (for व्यथिता-मनिन्दितां). Ś1 D1.10 तथा च तां(D1 °थागतां) सुव्यथितां सुदीनां; B3 तथा तपंतीं बहुधाप्यनिंदितां. —[b]) Ñ1 B4 D4 व्यपेतसत्त्वां; D2 °शोकां; D7.9 T3 व्यतीतहर्षां; Cg as in text (for व्यपेतहर्षां). B2 प्रतिहीनमानसां; D10 अतिदीन°; T2 व्यथितामनिंदितां; Cg as in text. ❀ Cg : व्यपेतहर्षाम्। हर्षः पूर्वमस्यामुषित्वा गत इति न ज्ञातामित्यर्थः। व्यपाभ्यामुप-सर्गाभ्यां तथा प्रतीयते. ❀ —[c]) Ś1 D10 G1 तथा; Ñ1 D1–4.11 तदा; Ñ2 V B D6 आसन्; Cg.k as in text (for शुभां). Ñ2 V B1.2.4 D6 सर्वतो; B3 तानि; D1.7 जज्ञिरे (for भेजिरे). —[d]) Ś1 D10 जय- ; Ñ1 नृपं (for नरं). Ñ2 V B1–3 D6 [अ]नुजीविनः ; D1 [अ]पि जी°; D5.7.9 G Ct [उ]पसे°; Cm.g as in text (for [उ]पजी°).

2 [b]) Ś1 D1.3.10 -राजीववत्(D1 °मत्); Ñ2 V B2–4 D6 -राजीकृतं; D4.7.9 Ck.t -राज्यावृतं; D5 -विराजितं; G3 -राजीयुतं; Cm. as in text (for -राजीवृतं). Ś1 D10.11 -युक्तं; B4 -सूक्ष्मं (for -शुक्लम्). T1.3 M3 शुक्लविशालकृष्णं (by transp.). —D4 om. from 2[c] up to गु in 3[b]. —[c]) B3 पस्पंद चैकं; D11 प्रस्पंददैवं (sic) (for प्रास्पन्दतैकं). Ñ2 V B D6 वरांग्या; M1 शुभांग्या (for सुकेश्या). —[d]) Ś1 D10 T2 वाताहतं (for मीना°). Ś1 [अ]तिधूम्रं; V2 [अ]तिपद्मं; B D6 G2 [अ]तिताम्रं; Cv.m.g.k.t as in text (for [अ]भिताम्रम्). D11 पद्मधियाभिताम्रं.

3 D4 om. up to गु in [b] (cf. v.l. 2). —[a]) Ñ2 V2 B बाहुश्च प(V2 वी)र्यायत-; V1 illeg.; D6 बाहुश्च पंथायन- (sic) (for भुजश्च चार्वञ्चित-). Ñ1 D1–3.5.7–9 G3 M2 -वृत्तपीनः (by transp.). —[b]) D1.3.8 T1.3 G M1.3 -[अ]गरु-. Ñ2 V B D6 G2 -चंदनार्क्तः. —[c]) D4 ननूत्तमेन; D6 अनुक्रमेण (for अनुत्तमेन). —[d]) B1–3 D6 वीरेण (for चिरेण). Ñ2 V B D6 परिवेपते स्म (for समवेपताशु). Ś1 Ñ1 D1–4.10.11 प्रा(Ñ1 D1 प्र[sic])वेपतास्याः सु(D10 स्म)चिरेण(Ñ1 °रस्य) वामः.

4 [b]) D8 संगतयोः. Ś1 D10 च जातः; D1 सुजातं; M1 द्विजातः; B (ed.) तु जातः (for सुजातः). Ñ V B1–3 D2–4.6 सीतो(Ñ1 D2–4 तथो)रुरेकः सुशुभः(Ñ2 B3 D6 शुशुभे; V2 च शुभः) सुजातः; B4 पीतोरुनेकश्च ततः प्रयातः (sic). —[c]) M2 प्रस्पंदमानं (sic). D8 अन्यो (for अस्या). Ñ V B D2–4.6 कनकावदातो.

5 Ñ2 V B1–3 D6 om. 5. —[a]) Ś1 Ñ1 D10 सुखं; D1 शुभ्रं; T2 शुद्धं; Cr.g as in text (for शुभं). —[b]) D1–4 अथ (for इव). D7.9 [अ]तुलाक्ष्याः. —[c]) Ñ1 रामांस्थिरस्याः (sic) (for वासः स्थितायाः). Cv.k.t as in

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

एतैर्निमित्तैरपरैश्च सुभ्रूः
संबोधिता प्रागपि साधुसिद्धैः ।
वातातपक्लान्तमिव प्रनष्टं
वर्षेण बीजं प्रतिसंजहर्ष ॥ ६
तस्याः पुनर्बिम्बफलोपमोष्ठं
स्वक्षिभ्रुकेशान्तमरालपक्ष्म ।
वक्त्रं बभासे सितशुक्लदंष्ट्रं
राहोर्मुखाच्चन्द्र इव प्रमुक्तः ॥ ७
सा वीतशोका व्यपनीततन्द्री
शान्तज्वरा हर्षविबुद्धसत्त्वा ।
अशोभतार्या वदनेन शुक्ले
शीतांशुना रात्रिरिवोदितेन ॥ ८

G. 5. 28. 13
B. 5. 29. 8
L. 5. 23. 8

इति श्रीरामायणे सुन्दरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

---

text; Cr.m.g -दल्याः (for -दन्त्याः). —[d]) D5 reads [d] except किंचित् in marg. D1.2.4 तदा (for परि-). Ś1 D10.11 स्तनोस्पंदत; D11 स्तनं स्पंदत (for परिस्रंसत). Ñ1 कथंचिदाकंप च (sic). D8 चारुदंत्याः (for °गात्र्याः). B4 किंचित्तदाशंसत चारुनेत्र्याः; D3 किंचित्प्रशशंस सुचारुगात्र्याः. ❀ Cr.m.g.t: परिस्रंसत पर्यस्रंसत (Cr.g अडभाव आर्षः). ❀

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

४९

G. 5. 47. 1
B. 5. 51. 1
L. 5. 47. 1

तं समीक्ष्य महासत्त्वं सत्त्ववान्हरिसत्तमः ।
वाक्यमर्थवदव्यग्रस्तमुवाच दशाननम् ॥ १
अहं सुग्रीवसंदेशादिह प्राप्तस्तवालयम् ।
राक्षसेन्द्र हरीशस्त्वां भ्राता कुशलमब्रवीत् ॥ २
भ्रातुः शृणु समादेशं सुग्रीवस्य महात्मनः ।
धर्मार्थोपहितं वाक्यमिह चामुत्र च क्षमम् ॥ ३
राजा दशरथो नाम रथकुञ्जरवाजिमान् ।
पितेव बन्धुर्लोकस्य सुरेश्वरसमद्युतिः ॥ ४
ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः ।
पितुर्निदेशान्निष्क्रान्तः प्रविष्टो दण्डकावनम् ॥ ५
लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया ।
रामो नाम महातेजा धर्म्यं पन्थानमाश्रितः ॥ ६
तस्य भार्या वने नष्टा सीता पतिमनुव्रता ।
वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ॥ ७
स मार्गमाणस्तां देवीं राजपुत्रः सहानुजः ।
ऋश्यमूकमनुप्राप्तः सुग्रीवेण च संगतः ॥ ८
तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् ।
सुग्रीवस्यापि रामेण हरिराज्यं निवेदितम् ॥ ९

49

M2 begins with श्रीरामाय नमः.—Before 1, V2 ins. 1040*.

1 [a]) D1 महत् (for महा-). —[b]) Ś1 Ñ V B2-4 D1-4.6.10.11 -पुंगवः; B1 -यूथपः (for -सत्तमः). —G3 damaged from व in [c] up to वा in [d]. —[c]) Ñ1 वाचम्; D10 om. (for वाक्यम्). B4 सत्यवद् ; D10 यथावद् (for अर्थ°). Ś1 Ñ V B D1-4.6.10.11 अव्यग्रम्. —[d]) Ś1 Ñ V B D1-4.6.10.11 उवाच पवनात्मजः .

2 D10 om. from 2[b] up to हरीश in 2[c]. —[b]) D9 एव (for इह). D4 प्राप्तं (sic) (for प्राप्तस्). D4 तदालयं (sic); D6 तवालये; D7.9 तवांतिके (D9 °कं); T1.3 त्वदंतिकं (for तवालयम्). —[c]) Ś1 Ñ1 D1-5.7-9.11 M1 राक्षसेश. Ñ2 V B1-3 D6 हरींद्रस्त्वां; B4 कपींद्र°; D1.4.11 हरीशस्य; T3 °स्त्वद्-; Ct as in text (for हरीशस्त्वां). —[d]) D2 स वै; G2.3 राजा (for भ्राता). Ñ1 D1-4.11 G1 M2 कौशल्यम् (G1 M2 °लम्); Cm.t as in text (for कुशलम्). Ś1 D10 कुशलं परिपृच्छति.

3 [a]) Ś1 राजन्; Ñ1 D1.2.4.10.11 राज्ञः; B3 प्रभुः (for भ्रातुः). Ñ1 मयादेशं; D3 महा° (for समादेशं). G2 भ्रातुः शृणुष्व संदेशं. —[b]) B4 कपींद्रस्य (for सुग्रीवस्य). —[c]) Ś1 D10 धर्मार्थयोर्; Ñ1 धर्मार्थाय (for धर्मार्थोप-). Ś1 Ñ1 D10.11 चैव; D1.2.4 युक्तम्; D3 पथ्यम् (for वाक्यम्). Ñ2 V B धर्मार्थैस (B3 °सं) हितं युक्तम्; D6.7.9 T G3 धर्मार्थसहितं वाक्यम्. —[d]) B2 चान्यत्र (for चामुत्र). Ñ1 D11 चा (D11 वा) क्षयं; Ñ2 चोत्तमं; D1.4 चा (D1 वा) क्षमं; D6 (with hiatus) उत्तमं; T3 च क्षमः; Cg.k.t as in text (for च क्षमम्).

4 [b]) B1-3 D6 नर- (for रथ-). Ś1 V1 B1.2.4 D2.11 -वाजिनां; Ñ1 -वाजिवान् (for -वाजिमान्). —[c]) G3 damaged for पितेव. B सर्व- (for बन्धुर्). Ś1 D1-4.10.11 लोकानां (for लोकस्य). —[d]) D2 -महाद्युतिः; D9.10 -समद्युतिं.

5 [a]) B3 तेजोस्तस्य (sic); D11 ज्येष्ठस्य च (for ज्येष्ठस्तस्य). —[b]) Ś1 Ñ V B D1-4.6.10.11 प्रीतिकरः; D5.7.9 M1 प्रियतरः (for प्रियकरः). Ś1 D10 M1 पितुः; Ñ2 V B1.4 D6.11 शुभः; D1.4 सुतः; D3 प्रियः (for प्रभुः). —[c]) Ś1 Ñ1 B1 D1.2.4.10.11 नियोगान् (Ś1 D10 °गं); D8 M1 निर्देशान् (D8 °श-) (for निदेशान्). Ś1 D10 संप्राप्य; D11 च निः (hypm.) (for निष्क्रान्तः). —[d]) Ś1 Ñ V B D1-4.6.10.11 M2 दंडकं वनं (for °कावनम्).

6 [b]) Ś1 Ñ2 V2 B3 D6.7.9-11 T2 सह (for चापि). Ñ2 V B D6 transp. सीतया and भार्यया. —[c]) Ś1 Ñ V B D1-4.6.10.11 महर्षिभिरनुक्रांतं. —[d]) V2 B1.3.4 D4.6.11 धर्म- (for धर्म्यं). D11 -प्रस्थानम् (for पन्थानम्). Ś1 Ñ2 V B1-3 D1-6.10.11 आस्थितः (V2 °तं) (for आश्रितः).

7 [a]) D7.9 जनस्थाने; G3 वने भ्रष्टा (for वने नष्टा). —[b]) Ś1 Ñ1 D1-4.10.11 सीता नाम यशस्विनी; Ñ2 V B1.3.4 D6 सीता नाम तपस्विनी; B2 सती सीता तपस्विनी; D7.9 भ्रष्टा सीतेति विश्रुता. —[c]) Ñ2 V B4 D3.6.8.11 विदेहस्य. D1.4 विदेहराजस्य सुता.

8 [a]) Ś1 Ñ सं- (for स). D7.9 मार्गमाणस्तु तां देवीं. —[b]) Ś1 Ñ1 D1.3-5.10.11 -पुत्रौ (for -पुत्रः). D1.3.6.10 महानु (D3 °भु)जः (for सहानुजः). —[c]) Ś1 गिरिं (for अनु-). T2 -प्राप्य (for -प्राप्तः). D10 ऋष्यमूकगिरिं प्राप्तः. —[d]) D1.4 महात्मना; D2 वशं गतः; G2 च संगमः; M3 समागतः; Ck.t as in text (for च संगतः). D11 सुग्रीववशमागतः.

9 [a]) B1.4 तेन तस्य (by transp.). —[b]) Ñ1 तव (for परि-). —D4 om. (hapl.) 9[c]-10[b]. —[c]) Ś1 Ñ1 V B D1-3.10.11 च; Ñ2 D6 तु (for [अ]पि). —[d]) T1

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् ।
सुग्रीवः स्थापितो राज्ये हर्यृक्षाणां गणेश्वरः ॥ १०

स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसंगरः ।
हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः ॥ ११

तां हरीणां सहस्राणि शतानि नियुतानि च ।
दिक्षु सर्वासु मार्गन्ते अधश्चोपरि चाम्बरे ॥ १२

वैनतेयसमाः केचित्केचित्तत्रानिलोपमाः ।
असंगगतयः शीघ्रा हरिवीरा महाबलाः ॥ १३

अहं तु हनुमान्नाम मारुतस्यौरसः सुतः ।
सीतायास्तु कृते तूर्णं शतयोजनमायतम् ।
समुद्रं लङ्घयित्वैव तां दिदृक्षुरिहागतः ॥ १४

तद्भवान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः ।
परदारान्महाप्राज्ञ नोपरोद्धुं त्वमर्हसि ॥ १५

न हि धर्मविरुद्धेषु बह्वपायेषु कर्मसु ।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ १६

कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम् ।
शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ १७

G. 5. 47. 18
B. 5. 51. 19
L. 5. 47. 17

वालि-; T2 कपि- (for हरि-). Ś1 Ñ V B D1-3.6.10.11 प्रति(V1 °वि)श्रुतं (B2 also in marg. प्रप्रज्ञातं); D9 G3 M1 Ck.t निवेदितुं.

10 D4 om. 10^{ab} (cf. v.l. 9). —^{a}) Ś1 D10 वने; Ñ V B D1-3.6.11 रणे (for मृधे). —^{b}) Ñ2 V1 B1-3 D6 वयस्यं तव(B1 तं च) (for राजपुत्रेण). B4 वयस्यं वालिनं तव. —^{c}) Ś1 D10 प्रापितो (for स्थापितो). Ś1 Ñ2 D10 राज्यं. —^{d}) Ñ2 V B2-4 D6 हर्यृक्षाधि-. M1 गणेश्वरं. Ś1 D2.10 हर्यृक्षप्रवरागतं(D2 °धिपः); Ñ1 D1.4.11 हर्यृक्षप्लवगाधिपः; D3 हर्यृक्षगणपूजितः. —After 10, D5.7-9 S ins.:

1041* त्वया विज्ञातपूर्वश्च वाली वानरपुंगवः ।
स तेन निहतः संख्ये शरेणैकेन वानरः ।

[(l. 1) G1 स; Cm.k as above (for च). —(l. 2) T1.3 G2 M3 रामेण (for स तेन). ❀ Cm: स तेन निहत इति पाठः. ❀]

11 B4 om. 11-12; M1 om. 11^{ab}. —^{a}) D1.2.4-6 T2.3 -मार्गण- (for °णे). G1 स सीतामार्गसंसक्तः. —^{b}) Ñ2 ** संगरः. —D10 om. 11^{cd}. —^{d}) B1 G3 दिशः सर्वान्; D11 सर्वा दिशो (by transp.) (for दिशः सर्वा).

12 B4 om. 12 (cf. v.l. 11). —^{a}) B2 D1.4 हरीणां तु; D3 यं कपीनां (for तां हरीणां). —D1 repeats ^{b} after ^{c}. —^{b}) Ś1 Ñ V B1-3 D1(both times)-4.6.10.11 प्र(Ñ2 D6 नि; B2 D11 [with hiatus] अ)युतान्यर्बुदानि च (D2 °न्यपि). —Note hiatus between ^{c} and ^{d}. —^{c}) B1.3 D3 मार्गतः (for मार्गन्ते). —^{d}) Ñ1 D1.4.5.7-9.11 S (all to avoid hiatus) ह्यधश् (for अधश्). D3 [अ]परे (for [अ]म्बरे). Ś1 D10 सुग्रीवस्याभ्यनुज्ञया; Ñ2 V B1-3 D6 पृथिव्यामपि चांबरे.

13 Ś1 D10 om. 13. —^{b}) B4 शौर- (sic) (for तत्र). D3 [अ]नल- (for [अ]निल-). —V1 om. 13^{cd}. —^{c}) B1.4 अचिंत्य- (for असंग-). B2 (m. also as in text) -मतयः (for -गतयः). Ñ1 चान्या; D1.2.4.11 चान्ये; D3 केचिद्; D6 शीघ्रगा (hypm.) (for शीघ्रा). —^{d}) Ñ1 D1.2.4.11 महाकाया (for हरिवीरा). D2 -जवाः (for -बलाः).

14 ^{a}) Ñ1 च (for तु). —^{c}) Ś1 Ñ1 D1.4.10 कारणात्; Ñ2 V B D2.6.11 कारणे; G1 M1 च कृते (for तु कृते). V2 (marg. also as in text) D8 पूर्णं; B1 [स]हं तु; B3 वृत्तं (for तूर्णं). D3 सीतार्थमेकवेगेन. —^{d}) Ś1 Ñ V B D1-4.6.10.11 योजनानां शतं प्लुतः(B3.4 °तं). —After 14^{cd}, Ñ2 V B D6 ins.:

1042* तच्छ्रुणुष्व महाराज संदेशं मम सर्वशः ।
इहलोके हितं चैव परत्र च सुखावहम् ।

[(l. 1) V2 महाभाग (for °राज). B4 सर्वतः. —(l. 2) B3.4 इहलोक-. Ñ2 D6 सुखं चैव; V सुखं पथ्यं (for हितं चैव). B3 परलोक- (for परत्र च). Ñ2 D6 सुखप्रदं (for सुखावहम्).] —Ś1 Ñ V B D1-4.6.10.11 om. 14^{ef}. —^{f}) D7 G2.3 त्वां (for तां). G1 सीतां द्रष्टुमिहागतः. ❀ Cm.k.t: त्वां दिदृक्षुरिहागत इति पाठः (Ck पाङ्क्तः). ❀ —After 14, D5.7-9 S ins.:

1043* भ्रमता च मया दृष्टा गृहे ते जनकात्मजा ।
[D5 दृष्ट्वा (sic) (for दृष्टा).]

15 ^{a}) Ś1 Ñ1 D1-4.10.11 -तत्त्वार्थस्(D11 °र्थं); B2 (m. also as in text) -सर्वार्थस् (for -धर्मार्थस्). —^{b}) D10 ततः (sic) (for तपः-). D3 G1.2 -श्रमः; Cr.m.g.k.t as in text (for -ग्रहः). —^{c}) B4 M2 परदारं (sic) (for °रान्). V1 -बाहो (for -प्राज्ञ). —^{d}) Ś1 नोपरुद्धुं; D11 नापराद्धुं (for नोपरोद्धुं). Ś1 D10 समर्हसि(Ś1 °ति); Ñ2 V B1-3 D6 इहार्हसि(B3 °ति); Ck.t as in text (for त्वमर्हसि).

16 D11 reads 16^{ab} twice. —^{a}) B1 -विरोधेषु (for -विरुद्धेषु). —^{b}) Ñ2 V B बहुपापेषु; D1.4.6.10.11 बहूपायेषु (for बह्वपायेषु). —^{c}) B3 मूलजातिषु; M1 कुलघातिषु; Cm.g.k.t as in text (for मूलघातिषु). D2 मज्जंते. —^{d}) D6 बुद्धिवंतो. Ñ1 विचक्षणाः (for भवद्विधाः).

17 ^{a}) D1 T3 कश्चिल्; Cm.t as in text (for कश्च).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 47. 19
B. 5. 51. 20
L. 5. 47. 18

न चापि त्रिषु लोकेषु राजन्विद्येत कश्चन ।
राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् ॥ १८
तत्त्रिकालहितं वाक्यं धर्म्यमर्थानुबन्धि च ।
मन्यस्व नरदेवाय जानकी प्रतिदीयताम् ॥ १९
दृष्टा हीयं मया देवी लब्धं यदिह दुर्लभम् ।
उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥ २०
लक्षितेयं मया सीता तथा शोकपरायणा ।
गृह्य यां नाभिजानासि पश्चास्यामिव पन्नगीम् ॥ २१
नेयं जरयितुं शक्या सासुरैरमरैरपि ।
विषसंसृष्टमत्यर्थं भुक्तमन्नमिवौजसा ॥ २२
तपःसंतापलब्धस्ते योऽयं धर्मपरिग्रहः ।
न स नाशयितुं न्याय्य आत्मप्राणपरिग्रहः ॥ २३

—[b]) D6 om. राम. V2 -शोकानु- (for -कोपानु-). Ś1 Ñ1 B4 D1-4.10.11 शराणां(Ñ1 B4 D2 बाणानां) नतपर्वणां; B3 कामक्रोधानुवर्तिनां. —[c]) Ś1 Ñ1 B4 D1-4.10.11 दीक्षानाम्; B3 शूराणाम् (for शराणाम्).

18 V1 om. 18[ab]. —[a]) D3 जातु (for चापि). —[b]) B2 (m. also as in text) विद्यति (for विद्येत). D11 पुमानस्तीह कश्चन. —[c]) Ś1 Ñ1 D1.4.10.11 च; B1 कः; D3 तु (for यः). —[d]) Ś1 D3.10 कृत्वा यः(D3 यः कृत्वा) सुखमाप्नुयात्; Ñ1 D11 कृत्वा यः(D11 च) सुखमेधते; D1.4 यः कृत्वा सुखमेधते. —After 18, Ñ2 V B1.2.4 D6 ins.; while D2 ins. after 19:

1044* तद्यदात्महितं वीर सुहृदां चैव ते क्षमम् ।

[Ñ2 तद्यद्यात्म-; B1 तदध्यात्म- (for तद्यदात्म-). D2 चैव (for वीर). V तद्यदा मोहितं वीर; B2 तच्छृणुष्व हितं वीर (for the prior half). D2 यत् (for ते).]

19 Ñ2 V B D6 transp. [ab] and [cd] repeating 19[cd] in its proper place. D2 repeats 19[cd] after 1044*. —[a]) Ś1 D2 तं तु; Ñ1 त्वं च; Ñ2 V B1.2.4 D1.3.4.6.10.11 त्वं तु; B3 तत्तु; T3 तत्र (for तत्रि-). V2 धर्म-; B1-3 D6 काले; Cr -लोक-; Cm.g.t as in text (for -काल-). D4 om. from हि up to य in 20[b]. —[b]) D2.3.7.9 धर्मम् (for धर्म्यम्). Ś1 Ñ1 D1.2.10 -[अ]नुपालितं; D3.7.9 T2 -[अ]नुयायि च; G1 M1.2 °पाति च; Cr.m as in text (for °बन्धि च). Ñ2 D6 पथ्यं धर्मानुपालितं; V B अर्थं(B3 °र्थ्यं)धर्मानु(B4 °र्थं)पालितं(B2 °संहितं); D11 धर्मसत्त्वानुपालितं; G2.3 धर्मार्थानुपघाति च. —[c]) Ñ2 V B1.2.4 D6 (all first time) मन्यसे; D11 प्रणम्य (for मन्यस्व). D7.9 -शार्दूले (for -देवाय). ❀ Ck: नरशार्दूलेति पाठः. ❀ —[d]) V B2-4(V both times; B2.4 second time; B3 first time) जानकीं. V B2-4(V1 B2.4 second time; V2 both times; B3 first time)प्रतिपादय; B3 (second time) D1.2.11 सं(D2 both times च)प्रदीयतां (for प्रतिदीयताम्). —After 19, D2 ins. 1044*.

20 D4 om. up to य in [b] (cf. v.l. 19). —[a]) D5 दृष्ट्वा (for दृष्टा). Ñ2 V2 B1.4 D6 चेयं; V1 B2.3 चेह(for हीयं). G2 Cr सीता (for देवी). —D6 om. (hapl. see var.) 20[b]-21[a]. —[b]) G2 द्रष्टुं; G3 Ck लब्धुं (for लब्धं). B2 Cr तदिह; D8 यदि हि (for यदिह). Ñ1 D1.2.4 दुष्करं; D11 कारणं (for दुर्लभम्). —[c]) V1 B4 यच्छ्रेयं; V2 D8 तच्छेषो(D8 °षं); B1 यः श्रेयो; G3 यच्छिष्टं; Cm.t as in text (for यच्छेषं).

21 D6 om. 21[a] (cf. v.l. 20). —[a]) D11 लक्षियं ते (meta.) (for °तेयं). Ś1 D10 च विजने; Ñ1 V B D1-4.11 विशालाक्षी; Ñ2 मया देवी (for मया सीता). —[b]) Ś1 Ñ1 V B D1-4.10.11 मया; Ñ2 D6 दुःख-; T2.3 तदा; Cv.r.m.g as in text (for तथा). —[c]) D7.9 T1.2 गृहे; Cr.m as in text (for गृह्य). Ś1 D3.10 गृहीत्वा(D10 °ता) किं (D3 यां) न जानासि(D10 °मि); Ñ1 D1.2.4.11 गृहीतां किं न जानासि; Ñ2 V B D6 आदाय तां(B2 °यैतां) न जानीषे. —[d]) D2 इह (for इव). Ñ1 V B D1-4.10.11 भोगिनीं (for पन्नगीम्).

22 [a]) V2 धारयितुं; B2 जारयितुं; B4 जीवयितुं. D4 शक्यं (for शक्या). B3 नेयमेजयितुं शक्या. —[b]) Ś1 B1 ससुरैरसुरैरपि; V2 अमरैः सासुरैरपि; D3.8 विबुधैः(D8 राक्षसैः) सासुरैरपि; D5 सासुरैरपि दुर्लभा. —[c]) Ś1 D10 -संपृक्तम्; B4 D1.4-9.11 T -संस्पृष्टम् (for -संसृष्टम्). —[d]) D1.3.4 इवासुखं; D11 महौजसा (for इवौजसा). —After 22, Ś1 Ñ V B D1-4.6.10.11 read 32-33.

23 [ab]) B3 D1.4 ततः (for तपः-). Ś1 D1.4.10.11 -संचय-; Ñ2 V B D6 -संतान-; D2 -संयम-; G1 -प्रभाव-; Cr.m.g.t as in text (for -संताप-). B3 च (for ते). Ñ1 ततः संतापनं प्रायो; G3 M1 तपसा खलु लब्धस्ते (for [a]). D7.9 T1.2 G1.3 M1.2 सो (for यो). Ś1 Ñ V B D1.2.4.6.10.11 योय(Ś1 D2.10 सोय)मृ (Ñ1 °यं वि; D4 यो वा वृ)द्धिपरिच्छदः (for [b]). D3 तपसा यच्च संग्रामं माहात्म्यमिदमुत्तमं. —[c]) G1 तु; Cg.t as in text (for स). Ś1 D10 न्यासयितुं (for नाशयितुं). Ś1 D2.5.10 T3 Cg न्याय(D2.5 T3 °य्य)म्; D1.4 त्याज्य; D11 राज्यं (sic); M1 शक्यम् (also as in text); Cr.m.k.t as in text (for न्याय्य). Ñ2 V B D6 रामो नाशयितुं शक्तः; D3 नैतन्नाशयितुं त्याज्यं. ❀ Cg: न न्याय्यं न युक्तम्। अव्ययमेतत्. ❀ —[d]) Ś1 Ñ2 D1.2.4.10 आत्मत्राण-; V1 B1.2 D6 सात्मत्राण- (V1 D6 °प्राण-); V2 स ते प्राण-; B3 सत्त्वत्राण-; B4 सा हि राम-; D3 त्वया प्राण-; D11 स त्वं बाल-(sic) (for आत्मप्राण-). Ś1 B1.3 D10 -परिच्छदः; V2 D2 -परिग्रहं; D3 -परिग्रहात्.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अवध्यतां तपोभिर्यां भवान्समनुपश्यति ।
आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् ॥ २४

सुग्रीवो न हि देवोऽयं नासुरो न च मानुषः ।
न राक्षसो न गन्धर्वो न यक्षो न च पन्नगः ॥ २५

मानुषो राघवो राजन्सुग्रीवश्च हरीश्वरः ।
तस्मात्प्राणपरित्राणं कथं राजन्करिष्यसि ॥ २६

न तु धर्मोपसंहारमधर्मफलसंहितम् ।
तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥ २७

G. 5. 47. 31
B. 5. 51. 28
L. 5. 47. 29

24 Ś1 D10 om. 24. —[a]) D1.4.11 अवध्यत्वं(D11 °स्त्वं) (for अवध्यतां). Ñ2 V B D1–4.6.8.11 T3 तपो(D8 °तो)वी(D11 °धै)र्याद् ; Cr.m.g as in text (for तपोभिर्यां). —[b]) D7 -पश्यसि (sic) (for -पश्यति). Ñ1 D1.2.4.11 भवता यदि मन्यते; Ñ2 V B2.3 D3.6 भवान्यदभिमन्यते(D3 °गम्यसे [sic]); B1.4 भवान्यदिह मन्यते (B1 °से [sic]). —[d]) V2 अत्र (for तत्र). D11 शृणु (for महान्).

25 [a]) D5 G2 हि न(by transp.); D7–9 G3 M1 न च; G1 [ऽ]पि न (for न हि). —[b]) G1 [ए]व (for च). T1.3 दानवः ; G3 M2.3 राक्षसः ; Cm.gp as in text (for मानुषः). D7–9 न यक्षो न च राक्षसः . ❀ Cr.m.g : न च राक्षस इति पाठः सम्यक्(Cr इति पाठः। नासुरो न च मानुष इति केषुचित्कोशेषु दृश्यते। तदनुचितम्। "नहि चिन्ता ममान्येषु प्राणिष्वमरपूजित। तृणभूता इमे सर्वे प्राणिनो मानुषादयः" इत्युत्तरश्रीरामायणे मनुष्यादिभिरवध्यत्वस्याप्रार्थितत्वाद्येभ्योऽवध्यत्वं न प्रार्थितं तेभ्यो मृत्युरित्यर्थः). ❀ —For 25[ab], Ś1 Ñ1 B4 D1–4.10.11 T2 subst.(Ś1 D10 read after 23 owing to om.); V1 ins. after 26[cd] (first occurrence), whereas V2 cont. after 1047* :

1045* स हि रामः ससुग्रीवो नैव देवो न पन्नगः । ;

[T2 न (for स). Ñ1 दानवः (for पन्नगः). Ś1 V1 D3 T2 न देवो न च(D3 नापि) पन्नगः (for the post. half).]; while Ñ2 V B1–3 D6 subst. for 25[ab] :

1046* सुग्रीवो हि न देवेषु न रक्षःस्वसुरेषु वा ।

[V1 B3 न हि (by transp.). V2 न सुरेषु; B3 रक्षःसु च (for न रक्षःसु). V1 B1 सुरेषु (for [अ]सुरेषु). Ñ2 V2 D6 च (for वा).]

—Thereafter they cont. :

1047* बली वानरराजोऽसौ न तस्मादभयं तव ।
[B3 [ऽ]यं (for ऽसौ).]

—Thereafter V1 reads 26[cd] for the first time followed by 1045*; while V2 further cont. 1045*. —Ñ2 B1–3 D5.6 G1.3 M1.2 om. 25[cd] – 26[ab]. D7–9 om. 25[cd]. —[c]) M3 दानवो (for राक्षसो). Ś1 Ñ1 V B4 D1–4.10.11 T2 G2 नासुरो(G2 न यक्षो) न च गंधर्वो. —[d]) Ś1 D10 [ए]व (for च). Ś1 Ñ1 V B4 D1.3.10 T2 किंनरः (for पन्नगः). D2.11 न च यक्षो न किंनरः ; D4 यक्षो न न च किंनरः; G2 न पिशाचो न राक्षसः .

26 Ñ2 B D5.6 T1 G M om. 26[ab] (for all except B4 T1 G2 M3, cf.v.l. 25). —[a]) Ś1 D10 राजा (for राजन्). —[b]) V1 वानरश् (for सुग्रीवश्). V2 कपीश्वरः (for हरी°). D3 सुग्रीवो वानरेश्वरः . —V1 reads 26[cd] for the first time after 1047* and repeats it here. —[c]) Ś1 Ñ1 V1(second time).2 B4 D1.2.4.10.11 T2 ताभ्यां; Ñ2 V1 (first time) B1–3 D6 ततः ; Cm.g.k.t as in text (for तस्मात्). Ñ1 D1.2.4.11 T1.3 -त्यागं ; Ct as in text (for -त्राणं). —[d]) D3 नाम; D10 राजो (sic) (for राजन्). Ñ1 D2 न पश्यसि; B1 D11 करिष्यति (for करिष्यसि). —After 26[cd] (first occurrence), V1 ins. 1045*.

27 B3 om. 27 – 28. —[a]) D8 ननु (for न तु). G3 न (for -[ड]प-). Ś1 D1.2.4.6.10 न च(D2.6 हि) धर्मोपि(D1.2.4 °प)संहार्यो(D1.2.4 °राद्) ; Ñ V B1.2.4 D3.11 न हि(Ñ1 D11 च; D3 स) धर्मोप्यसंहार्यो. —[b]) Ś1 Ñ1 D10.11 ह्यधर्म- ; Ñ2 V B1.2 D3.6 विधर्म- ; B4 विकर्म- (for अधर्म-). D10 -बल- (for -फल-). Ś1 Ñ1 D8–10 -संयुतः (D8.9 °तं); Ñ2 V B1.2.4 D1.3.4.6 -संहितः (for -संहितम्). —Ñ2 om. 27[cd]. —[c]) Ś1 Ñ1 D10.11 स एव; B4 तदेवं (for तदेव). Ś1 Ñ1 D10 अश्येति; V B1.2.4 D2.6 आप्नोति (for अन्वेति). —[d]) Ś1 B4 D10 धर्मो नाधर्म- ; Ñ1 V B1.2 D6 धर्माणां धर्म- ; D1.3.4 ह्यधर्मो धर्म- ; D2 धर्मेणाधर्म- ; D11 धर्मैतां धर्म- (sic) (for धर्मश्चाधर्म-). V2 D2.11 -नाशनं; D6 -नाशकः (for -नाशनः). ❀ Cg : न त्विति। तुशब्दः उक्तशङ्काव्यावर्तकः। धर्मः उपसंह्रियतेऽनेनेति धर्मोपसंहारं धर्मफलम्। फलेन धर्मस्योपसंह्रियमाणत्वात्। क्लीबन्तत्वमार्षम्। ; Ck : यद्वा भट्टस्तु धर्मोपसंहारं धर्मफलं कर्तृ - - - - अधर्मफलसंहितं तत्सहानुभववत् न भवतीत्याह - तत्र "घञ्जबन्ताः पुंसि" इति धर्मोपसंहार इत्येव भाव्यम्। उपसंहारशब्दश्च व्यर्थः। धर्मोऽधर्मफलसंहित इत्येतावत एव वक्तव्यत्वात्। नापि चेदं वक्तव्यम्। धर्माधर्मफलयोः सुखदुःखप्रवृत्त्योर्योगपद्यस्य सर्वाविवादात्। अलमेतावता।; Ct : केचित्तु 'धर्मोपसंहारमधर्मफलसहित' मिति पाठः। धर्मोपसंहारं धर्ममुपसंह्रियतेऽनेनेति धर्मफलं सुखं तदधर्मफलसंहितं न संभवत्यधर्मफलेन दुःखेन सहानुभवं न भवति, तत्तस्मादेव फलमन्वेति धर्मो धर्मफलं सुखमेवान्वेति, एवमधर्मो दुःखं दुःखरूपं फलमेवान्वेति। अत्रे ' धर्मो नाधर्मनाशनः ' इति पाठः। पूर्वकृतो धर्मोऽधर्मस्येदानीं कृतस्य न नाशनः। चादधर्मोऽपि धर्मनाशनो नेत्यर्थ इति वदन्ति। तत्रार्थसामञ्जस्यं व्युत्पत्तैर्विभाव्यम्. ❀

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 47. 31
B. 5. 51. 29
L. 5. 47. 30

प्राप्तं धर्मफलं तावद्भवता नात्र संशयः ।
फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे ॥ २८

जनस्थानवधं बुद्धा बुद्धा वालिवधं तथा ।
रामसुग्रीवसख्यं च बुध्यस्व हितमात्मनः ॥ २९

कामं खल्वहमप्येकः सवाजिरथकुञ्जराम् ।
लङ्कां नाशयितुं शक्तस्तस्यैष तु विनिश्चयः ॥ ३०

रामेण हि प्रतिज्ञातं हर्यृक्षगणसंनिधौ ।
उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥ ३१

अपकुर्वन्हि रामस्य साक्षादपि पुरंदरः ।
न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥ ३२

यां सीतेत्यभिजानासि येयं तिष्ठति ते वशे ।
कालरात्रीति तां विद्धि सर्वलङ्काविनाशिनीम् ॥ ३३

तदलं कालपाशेन सीताविग्रहरूपिणा ।
स्वयं स्कन्धावसक्तेन क्षममात्मनि चिन्त्यताम् ॥ ३४

सीतायास्तेजसा दग्धां रामकोपप्रपीडिताम् ।
दह्यमानामिमां पश्य पुरीं साट्टप्रतोलिकाम् ॥ ३५

---

28 B3 om. 28 (cf. v.l. 27). —a) B1 कर्म- (for धर्म-). D1 तात; D11 चात्र (for तावद्). —c) D11 अद्य तु (for अस्यापि). —d) D9 एवं (for एव). Ś1 Ñ1 V B1.2.4 D2.3.10 [उ]पभोक्ष्यसे; Ñ2 D6 [उ]पलप्स्यसे; D5.9 T2 प्रपत्स्यते; Cr.t प्रपत्स्यसे (as in text). D1.4.11 क्षिप्रं समुपलप्स्यते (D4 °लभ्यते; D11 °से).

29 a) B2 जनस्थाने (for °स्थान-). Ñ1 घोरं; Ñ2 V B D6 श्रुत्वा; D3 दृष्ट्वा (for बुद्धा). —b) D7–9 वालिनश्च (for बुद्धा वालि-). Ś1 Ñ1 D1–4.10.11 वालिनश्चैव (Ś1 D3.10 °श्चापि) संक्षयं; Ñ2 V B D6 वालिनश्च तथा (B2 यथा) क्षयं (Ñ2 V2 [D6 वधं). —c) Ñ1 D2 हि; Ñ2 om. (for च).

30 a) B3 रामः (for कामं). Ś1 Ñ1 D10 एव (for अपि). —b) B3 D2.10.11 -कुंजरं (B3 °रः); T1.3 G3 -संकुलां (for -कुञ्जराम्). —c) D11 न त्वां (for लङ्कां). D3 कालयितुं (for नाश°). Ñ2 V B D6 शक्तो नाशयितुं लंकां. —d) D8 T1.3 [ए]व (for [ए]ष). D2.11 भुवि; D5.7–9 G2.3 M2.3 Ck.t तु न (for तु वि-). Ś1 D10 तस्यैकस्य विनिश्चितः (D10 °श्चयः); Ñ1 तस्यैषैव तु निश्चयः (sic); Ñ2 V1 B D6 तत्र नैष तु निश्चयः; V2 किं पुनस्ते महाबलाः; D3 तत्र चैष विनिश्चयः.

31 a) B1 T2 तु; B3 [अ]भि- (for हि). —b) Ś1 D2.10 हर्यृक्षकपि-; Ñ2 V B D6 वानराधिप- (for हर्यृक्षगण-). —c) B3 उच्छेदनम् (for उत्सादनम्). —d) Ś1 Ñ1 D1–4.10.11 क्षिप्रं तच्च (Ś1 D10 तत्तु; Ñ1 तस्य; D3 °प्रमेव) करिष्यति; Ñ2 V B1 येनासौ मैथिली हृता; B2–4 D6 येन सा (B2 मे) मैथिली हृता.

32 Ś1 Ñ V B D1–4.6.10.11 read 32–33 after 22. —a) D3 अपकृत्य (for °कुर्वन्). V2 B4 तु; D6 न (for हि). D11 अपकुर्युद्य रामस्य (sic). —b) B4 राक्षसेश; D1 साक्षादिव (for साक्षादपि). Ñ1 D1.4.11 शतक्रतुः (for पुरंदरः). —c) Ñ V B D1–4.6.10.11 राजन्; G1 किंचित् (for अन्यः). —d) D3 त्वादृशो (for त्वद्विधो). V B2–4 किं पुनस्त्वद्विधा जनाः.

33 Ś1 Ñ V B D1–4.6.10.11 read 32 – 33 after 22. —a) B3 या; B4 सा (for यां). Ñ1 यां त्वं सीतेति जानासि. —b) Ś1 तेग्रतः; Ñ1 B3.4 रूपिणी; D3 जानकी; D7–9 ते गृहे (for ते वशे). Ñ2 D6 तिष्ठंतीममिरूपिणीं; V B1.2 D1.2.4.10.11 सेयं तिष्ठति रूपिणी. —c) B1.2 D3.5 कालरात्रिं हि (D5 तु) (for °रात्रीति). —d) G3 -लोक- (for -लङ्का-). Ś1 Ñ2 V B1–3 D2.3.6.10.11 G2 -निवासिनां (G2 °नीं) (for -विनाशिनीम्).

34 a) D1.4.11 अयं (for अलं). —b) M3 -निग्रह- (for -विग्रह-). D11 सीतां व्यग्रहरूपिणीं (sic). —c) Ñ2 V1 B D2.6 कंठ- (for स्कन्ध-). Ñ2 -शेषेण; D10 -मुक्तेन; G1.3 -सिक्तेन (sic); Ck.t as in text (for -सक्तेन). D11 अद्य कृत्वावसक्तेन. —d) D5.7–9 T1.2 क्षेमम् (for क्षमम्). Ś1 Ñ1 D1–4.10.11 क्षेम (D1.3.4 क्षय; D2 क्षम) मालोकयात्मनः; Ñ2 V B D6 चिंत्यतां हितमात्मनः. —After 34, Ñ2 V1 B read 5.50.1; D6 ins. 1048*.

35 Ñ2 V1 B D6 om. 35. —a) D11 जग्धां (for दग्धां). —b) M2 काम- (for राम-). D11 -शोक- (for -कोप-). Ś1 Ñ1 D1–4.7–11 T1 G1.2 -प्रदीपितां (for -प्रपीडिताम्). V2 सवाजिरथकुंजरां. —d) Ś1 Ñ1 D1–4.10.11 लंकां सरथकुंजरां; V2 रामक्रोधप्रदीपितां. —After 35, Ś1 Ñ1 V2 D1–4.10.11 read 5.50.1, while D5–9 (D6 after 34 owing to om.) S ins. after 35:

1048* स्वानि मित्राणि मन्त्रींश्च ज्ञातीन्भ्रातॄन्सुतान्हितान् ।
भोगान्दारांश्च लङ्कां च मा विनाशमुपानय ।
सत्यं राक्षसराजेन्द्र शृणुष्व वचनं मम ।
रामदासस्य दूतस्य वानरस्य विशेषतः ।
सर्वांल्लोकान्स संहृत्य सभूतान्सचराचरान् । [5]
पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ।
देवासुरनरेन्द्रेषु यक्षरक्षोगणेषु च ।
विद्याधरेषु सर्वेषु गन्धर्वोरगेषु च ।
सिद्धेषु किंनरेन्द्रेषु पतत्रिषु च सर्वशः ।
सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः । [10]
यो रामं प्रति युध्येत विष्णुतुल्यपराक्रमम् ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

स सौष्ठवोपेतमदीनवादिनः
कपेर्निशम्याप्रतिमोऽप्रियं वचः ।
दशाननः कोपविवृत्तलोचनः
समादिशत्तस्य वधं महाकपेः ॥ ३६

G. 5. 47. 0
B. 5. 51. 45
L. 5. 47. 37

इति श्रीरामायणे सुन्दरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

सर्वलोकेश्वरस्येह कृत्वा विप्रियमुत्तमम् ।
रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ।
देवाश्च दैत्याश्च निशाचरेन्द्र
गन्धर्वविद्याधरनागयक्षाः । [15]
रामस्य लोकत्रयनायकस्य
स्थातुं न शक्ताः समरेषु सर्वे ।
ब्रह्मा स्वयंभूश्चतुराननो वा
रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा ।
इन्द्रो महेन्द्रः सुरनायको वा [20]
त्रातुं न शक्ता युधि रामवध्यम् ।

[(l. 1) T2 G3 मंत्रिणः स्वानि मित्राणि (for the prior half). ❀ Cr.g: मन्त्रीन् मन्त्रिणः । इकारान्तत्वमार्षम् . ❀ D5 हितान्सुतान् (by transp.); D6 सुतांस्तथा; D8 M1 सुहृद्धितान् (for सुतान्हितान्). —(l. 5) D7-9 T M3 सुसंहृत्य; G3 समा° (for स संहृत्य). —(l. 7) T3 -सुरेंद्रेषु (for -न°). D6-9 T1.2 G1 -[उ]रगेषु (for -गणेषु). —G3 om. l. 8-9. —(l. 8) D7-9 नागेषु (for सर्वेषु). D5.7-9 T2 M1.2 मृगेषु; D6 नरेषु (for [उ]रगेषु). —D9 repeats l. 7-8 after l. 8. —(l. 9) D7.9 G1 M3 सर्वतः (for °शः). D5.6 (marg.) M1.2 नागेंद्रेषु च सर्वेषु किंनरेषु पतत्रिषु. —G1.3 transp. l. 10 and 11. —(l. 10) G1.3 -लोकेषु (for -भूतेषु). D6-9 Ct transp. सर्वभूतेषु and सर्वत्र. T -लोकेषु; G1.3 -भूतेषु (for -कालेषु). D6 यो (for न). ❀ Cv: "सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः । यो रामं प्रति युध्येत विष्णुतुल्यपराक्रमम्" इति समीचीनः पाठः ।; Cr: नास्ति स इति पाठः साधुः . ❀ —(l. 11) D5 वध्येत (for यु°). D6 -पराक्रमः . —D6 om. l. 12-17. —(l. 12) T2 M1.3 [ए]वं; T3 [इ]व (for [इ]ह). D7-9 T2 G1.2 M1 ईदृशं (for उत्तमम्). —(l. 13) G3 नर- (for राज-). —(l. 14) D5.8 निशाचरेंद्रा; M1 निशाचराश्च. —(l. 21) D7.9 स्थातुं (for त्रातुं). D7.9 राघवस्य (for रामवध्यम्). ❀ Cv: तस्येत्यादिश्लोकः परसर्गादिः पुरस्तात्तु लेखकैः प्रमादान्नयस्तः । ; Cr: स सौष्ठवेति श्लोकात्पूर्वं वर्तमानस्तस्येति श्लोक उत्तरसर्गादिः । अत्र प्रमादाल्लिखितः । अतो न पुनरुक्तिः । ; so also Cg. ❀]

—Thereafter T2 cont.:

1049* तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम् ।
त्रातारं वानुपश्यामि न गन्धर्वं न चासुरम् ।

—Then T2 reads 5.50.1, while D6 G1.3 M1 read 5.50.1 after 1048*.

36 a) D8 -मायिनः ; G1 -भाषिगः ; M1 -गामिनः (for -वादिनः). —For 36ab, Ś1 Ñ V B D1-4.6.10.11 subst.:

1050* स तस्य तद्वाक्यमदीनभाषिणः
कपिप्रवीरस्य निशम्य विप्रियम् ।

[(l. 1) B4 om. up to क्य. V1 B2 (m. also as above).3 उदार- (for अदीन-). —(l. 2) B3.4 भाषितं; D11 विक्रमं (for विप्रियम्). D3 कपिर्निशम्य प्रियमप्रियं महत् .]

—c) Ñ2 V B1.2.4 D1.4.6.11 क्रोध- (for कोप-). B2 -विवृद्ध- (for °त्त-). —d) G3 समादिदेशास्य (for °शत्तस्य). D1.2.4.11 कपेर् (for वधं). B1 G1 -[आ]दमनः ; D1.2.4.11 -वधं (for -कपेः). Ś1 D10 समादिशत्तत्र महाकपेर्वधं.

Colophon. —*Sarga name*: Ś1 Ñ1 V1 B2 D1.2.4.10.11 हनुमद्वाक्यं; Ñ2 V2 B1.4 D6 दूतवाक्यं; B3 दूतवधप्रकारः; D3 हनुमत्प्रस्फुटजल्पनः . —*Sarga no.* (figures, words or both): Ñ1 B2 D1.2.4.10.11 om.; Ś1 D5 M2 50; Ñ2 V1 D6 49; V2 39; B1 47; B3 45; B4 D3 52; D7-9 T G M1.3 51. —After colophon, D2 concludes with रामः; G M1 with श्रीरामाय नमः .

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

५०

G. 5. 47. 36
B. 5. 52. 1
L. 5. 47. 36

तस्य तद्वचनं श्रुत्वा वानरस्य महात्मनः ।
आज्ञापयद्वधं तस्य रावणः क्रोधमूर्छितः ॥ १
वधे तस्य समाज्ञप्ते रावणेन दुरात्मना ।
निवेदितवतो दौत्यं नानुमेने विभीषणः ॥ २
तं रक्षोधिपतिं क्रुद्धं तच्च कार्यमुपस्थितम् ।
विदित्वा चिन्तयामास कार्यं कार्यविधौ स्थितः ॥ ३
निश्चितार्थस्ततः साम्नापूज्य शत्रुजिदग्रजम् ।
उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः ॥ ४
राजन्धर्मविरुद्धं च लोकवृत्तेश्च गर्हितम् ।
तव चासदृशं वीर कपेरस्य प्रमापणम् ॥ ५

50

M$_2$ begins with श्रीरामाय नमः.

1 Ś$_1$ Ñ$_1$ V$_2$ D$_{1\text{-}4.10.11}$ read 1 after 5.49.35. Ñ$_2$ V$_1$ B read 1 after 5.49.34. D$_6$ G$_{1.3}$ M$_1$ read 1 after 1048*. T$_2$ reads 1 after 1049*. —$^{a\text{-}b}$) D$_7$ T$_{1.3}$ Ct स तस्य; Cg.k as in text (for तस्य तद्). Ñ$_1$ महाबलः. Ñ$_2$ V B D$_6$ एवमुक्तस्तु कपि(B$_1$ बलि)ना पौलस्त्यो राक्षसाधिपः. —^{c}) Ñ$_1$ D$_2$ राजा (for तस्य). —^{d}) D$_9$ in marg. क्रोधमूर्छितः. ❀ Cg: तस्य तद्वचनं श्रुत्वेति श्लोकः सर्गस्य प्रथमः. ❀

2 ^{a}) V$_2$ B$_{1.4}$ तत्र (for तस्य). Ś$_1$ Ñ$_1$ D$_{1.2.4.10.11}$ आज्ञप्ते तु वधे तस्य; D$_3$ आज्ञापितं वधं तस्य. —^{b}) V$_2$ वानरेण (sic) (for रावणेन). Ñ$_2$ V B D$_{2.6}$ हनूमतः; D$_5$ *हात्मना (for दुरात्मना). —^{c}) Ñ$_2$ V B$_{1.2.4}$ D$_{1.4.6.11}$ वाक्यं; G$_{2.3}$ Cm.gp दूत्यं; Cv.g.k.t as in text (for दौत्यं). Ś$_1$ Ñ$_1$ B$_3$ D$_{2.3.5.10}$ M$_1$ निवेदितं(D$_2$ °ते) ततो (M$_1$ वधं) वाक्यं(Ś$_1$ D$_5$ M$_1$ दौत्यं); D$_8$ T$_3$ M$_{2.3}$ निवेदितमतो(T$_3$ °सौ) दौत्यं; T$_1$ निवेदितवधो दूत्ये; T$_2$ निवेदितमतिर्दूत्यं. ❀ Cr.m: निवेदितमतौ(Cm °तौ इति पाठः)।; Cg: निवेदितमतौ दूत्यमिति पाठान्तरम्।; Ck: "निवेदितवतो दौत्यम्" इति पाङ्क्तः. ❀ —^{d}) Ñ$_1$ नार्थं मेने; Ñ$_2$ मानुमेने; V$_2$ B अभाषत (for नानुमेने).

3 B$_1$ reads 3^{a} in marg. —^{a}) Ñ$_2$ V B$_4$ D$_{3.6}$ G$_{1.3}$ स (for तं). Ś$_1$ Ñ$_1$ B$_{1\text{-}3}$ D$_{1.2.4.10.11}$ राक्षसाधिपतिं; M$_1$ तं तु रक्षोधिपं. —^{b}) Ś$_1$ D$_{10}$ तद्वधार्थम्; B$_2$ कार्यं चेदम्; D$_2$ तस्य कार्यम् (for तच्च कार्यम्). D$_5$ तच्च कार्यकरणे स्थितं (hypm.). —^{d}) D$_4$ om. कार्य-. Ś$_1$ Ñ$_1$ B$_4$ D$_{1.3.4.10.11}$ -विदां वरः; Ñ$_2$ V B$_{1\text{-}3}$ D$_6$ -विधिं प्रति (for -विधौ स्थितः).

4 Ś$_1$ D$_{10}$ om. (hapl.?) 4. —^{a}) Ñ$_2$ V B (B$_2$ [m. also] as in D$_2$) D$_{1.4.6.11}$ निश्चितार्थः; D$_2$ निश्चित्यार्थं. G$_3$ तदा (for ततः). D$_1$ om.; D$_4$ सास्ता (sic) (for साम्ना). —^{b}) Ñ$_1$ D$_{1.5.7.9}$ पूज्यं; D$_3$ सर्व-; D$_4$ पूजा (sic) (for [आ]पूज्य). Ñ$_2$ V B D$_6$ पूजयित्वा स(B$_3$ च) रावणं. ❀ Cg: आपूज्येति छेदः. ❀ —^{d}) Ñ$_2$ D$_{1.4.6}$ G$_3$ -विदां वरः (for -विशारदः). —After 4, D$_{5.7\text{-}9}$ T$_2$ G M ins.:

1051* क्षमस्व रोषं त्यज राक्षसेन्द्र
प्रसीद मद्वाक्यमिदं शृणुष्व ।
वधं न कुर्वन्ति परावरज्ञा
दूतस्य सन्तो वसुधाधिपेन्द्राः ।

[(l. 2) D$_{5.7\text{-}9}$ M$_2$ मे (for मद्-). —(l. 3) D$_5$ परापरज्ञा (for °वरज्ञा).]

5 ^{a}) Ś$_1$ Ñ$_1$ D$_{1.3.4.10.11}$ राजवृत्त-(D$_1$ °त्ति-); D$_8$ S राजधर्म-. Ñ$_2$ V B D$_6$ इदं धर्मविरुद्धं हि; D$_2$ राजंल्लोकविरुद्धं हि. —^{b}) Ś$_1$ D$_{10}$ M$_2$ लोकवृत्ते; Ñ$_2$ B$_{1.4}$ D$_6$ इहामुत्र; Ck.t as in text (for लोकवृत्तेश्). V इह चामु(V$_2$ °न्य)त्र गर्हितं; B$_{2.3}$ इहान्यत्र वि(B$_3$ तु)गर्हितं; D$_{1.4}$ तव राजन्विगर्हितं; D$_{2.11}$ राज(D$_{11}$ लोक)वृत्तविगर्हितं. —^{c}) Ś$_1$ D$_{10}$ सर्वथा; Ñ$_1$ उवाच (for तव च). Ñ$_2$ V B D$_{1.2.4.6.11}$ त्वत्तो न सदृशं वीर. —^{d}) T$_2$ कपिवर्य- (for कपेरस्य). Ś$_1$ च मारणं; Ñ$_2$ V$_2$ D$_6$ प्रणाशनं (for प्रमापणम्). B$_4$ वीरस्यास्य प्रमाणकं. —After 5, D$_{5.7\text{-}9}$ G M ins., while T$_2$ ins. after 6:

1052* धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः ।
परावरज्ञो भूतानां त्वमेव परमार्थवित् ।
गृह्यन्ते यदि रोषेण त्वादृशोऽपि विपश्चितः ।
ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम् ।
तस्मात्प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद । [5]
युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम् ।
विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः ।
रोषेण महताविष्टो वाक्यमुत्तरमब्रवीत् ।
न पापानां वधे पापं विद्यते शत्रुसूदन ।
तस्मादेनं वधिष्यामि वानरं पापचारिणम् । [10]
अधर्ममूलं बहुदोषयुक्त-
मनार्यजुष्टं वचनं निशम्य ।
उवाच वाक्यं परमार्थतत्त्वं
विभीषणो बुद्धिमतां वरिष्ठः ।
प्रसीद लङ्केश्वर राक्षसेन्द्र [15]
धर्मार्थतत्त्वं वचनं शृणुष्व ।
दूतानवध्यान्समयेषु राजन्
सर्वेषु सर्वत्र वदन्ति सन्तः ।

[(l. 1) D$_5$ राजा धर्म-; T$_2$ धर्मशास्त्र-; G$_1$ सर्वशास्त्र- (for राजधर्म-). G$_2$ -विदां वरः (for -विशारदः). —(l. 2) D$_5$

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

असंशयं शत्रुरयं प्रवृद्धः
कृतं ह्यनेनाप्रियमप्रमेयम् ।
न दूतवध्यां प्रवदन्ति सन्तो
दूतस्य दृष्टा बहवो हि दण्डाः ॥ ६

वैरूप्यमङ्गेषु कशाभिघातो
मौण्ड्यं तथा लक्षणसंनिपातः ।
एतान्हि दूते प्रवदन्ति दण्डा-
न्वधस्तु दूतस्य न नः श्रुतोऽपि ॥ ७

कथं च धर्मार्थविनीतबुद्धिः
परावरप्रत्ययनिश्चितार्थः ।
भवद्विधः कोपवशे हि तिष्ठे-
त्कोपं नियच्छन्ति हि सत्त्ववन्तः ॥ ८

न धर्मवादे न च लोकवृत्ते
न शास्त्रबुद्धिग्रहणेषु वापि ।
विद्येत कश्चित्तव वीर तुल्य-
स्त्वं ह्युत्तमः सर्वसुरासुराणाम् ॥ ९

G. 5. 48. 8
B. 5. 52. 17
L. 5. 48. 8

परापरज्ञो; G1 परावराणां. —(l. 3) G1 दोषेण (for रोषेण). M1 त्वादृशाश्च (sic). D7.9 विचक्षणाः (for विपश्चितः). ❀ Ck.t : त्वादृश इति(Ct क्विन्नन्त) बहुवचनम्. ❀ —(l. 4) G1 कृतश्चास्त्र- (for ततः शास्त्र-). —(l. 6) G1 दूते (for दूत-). —(l. 7) G1.2 राक्षसाधिपः. —(l. 8) D7-9 कोपेन (for रोषेण). —(l. 9) G2 पापो (sic). —(l. 10) D7.9 इमं (for एनं). D7-9 G3 Ck.t पापकारिणं. —(l. 11) M3 -रोष- (for -दोष-). —(l. 12) D5 in marg. निशम्य. —(l. 15) D5 राक्षसेश्वर. —(l. 16) D8 G1.2 M3 धर्मार्थयुक्तं. —(l. 17) D5.7-9 T2 G1 दूता न वध्याः. D5 स्वयमेव; G2 समरेषु (for समयेषु). G1 राज्ञा (for राजन्). —(l. 18) G1 सर्वे (for सन्तः).]

6 Ś1 D10 om. 6^{ab}. —^{a}) B3 D11 प्रवृद्धं; D5 प्रबुद्धः (for प्रवृद्धः). —^{b}) B3 कृपेन (sic); D3 त्वनेन (for ह्यनेन). B4 अप्रियं (for अप्रमेयम्). —After 6^{ab}, T2 G1 ins. :

1053* वधार्हजं कर्म कृतं तथापि
दूतस्य हिंसां न वदन्ति सन्तः ।
[(l. 1) T2 वधार्हकं.]

—^{c}) Ś1 (before corr.) D1.2.4.7 न दूतवध्यं; D3 वध्यं न दूतं; G3 न दूतहत्यां. Ñ1 D2.10 हि (for प्र-). Ñ2 V D11 दूतो न वध्यो हि(D11 °ध्यः प्र) वदंति संतो; B D6 दूता न वध्या हि(B2 °ध्याः प्र) वदं(B4 भवं)ति संतो. ❀ Cr.g : दूतवध्यां दूतवधम्। स्त्रियां भावे क्यप्। हन्तेर्वधादेश आर्षः. ❀ —^{d}) D2 हतस्य (for दूतस्य). Ś1 Ñ2 V B D1–4.6.8.10.11 दंडा; D5 G3 दृष्ट्वा (sic) (for दृष्टा). Ś1 Ñ1 B4 D1.2.4.10.11 प्रदि(D4 °वि)ष्टाः; Ñ2 D3.6.8 हि दृष्टाः; V B1 विसृष्टाः; B2 हि सृष्टाः; B3 [s]पि सृष्टाः (for हि दण्डाः). —After 6, T2 ins. 1052*.

7 Ś1 D10 om. 7. —^{a}) Ñ V B1.2.4 D3.5.6.11 कशा (Ñ2 V2 D3.5 °षा)निपातो; B3 कशायपातो; T3 कशाव-घातो. —^{b}) D2.8.9.11 T2 G2 मौढ्यं; Ct as in text (for मौण्ड्यं). T3 तदा (for तथा). D8 -संनिपातं. —^{c}) M1 एतानि (sic) (for एतान्हि). B4 यतो हि दूतेषु वदंति दंडान्. —^{d}) D3 च (for तु). D5 न स; D9 मनः-; T2 न हि; Cr.m.g.k.t as in text (for न नः). D3.7.9 श्रुतोस्ति; D8 श्रुतो वै; T2 श्रुतो नः; Cm.k.t श्रुतोपि(as in text). Ñ1 *** दूतस्य वधो न दृष्टः; B4 D2.11 दूतस्य दंडो हि वधो न दृष्टः(D11 न वधो हि शस्तः); D1.4 न दूतदंडो हि वधः प्रशस्तः. —For 7^{cd}, Ñ2 V B1–3 D6 subst. :

1054* एवंविधानर्हति रूक्षवादी
दण्डेषु दूतस्य वधो न दृष्टः ।
[(l. 2) V2 दंडेन; B1 D6 दंडेषु. B3 om.; D6 वधो (for वधो). Ñ2 न मुक्तः (sic); V2 हि दृष्टः; D6 नियुक्तः (for न दृष्टः).]

8 ^{a}) Ś1 D2.10 हि (for च). G3 damaged from र्मा up to प्रत्यय in 8^b. Ñ1 धर्मानुविहीत- (sic); Ñ2 V B1–3 D6 धर्मादनपेत-; B4 D1.4.11 धर्मार्थविशुद्ध-; D3 बह्वर्थविनीत-; M2 धर्मात्मविनीत-. T2 -बुद्धिं. —^{b}) D5 Cv परापर-; M1 परावरः. —^{c}) D1.4 G3 क्रोध- (for कोप-). Ñ1 च; D1.4 नः; D3 [s]नु-; D8 [s]मि- (for हि). Ś1 D2.10 कोपमथा(D2 °वशो)धितिष्ठेत्; Ñ2 V B D6.11 G1 M1 क्रोध(G1 M1 कोप)वशं हि(B3 च) गच्छेत्(D11 न तिष्ठते). —^{d}) Ś1 Ñ1 D3.10.11 क्षोभं न(D3 °भंति [sic]) गच्छंति; Ñ2 V B D1.2.4.6 क्रोधं न गच्छंति; D5.7.9 G1 कोपं न गच्छंति. D3 नः; G1 om. (for हि). B4 D7 तत्त्ववंतः.

9 B3.4 om. 9. —^{a}) V1 -तत्त्वे नः; D8 -वादेषु; D11 -दाने न (for -वादे न). Ñ2 B1.2 D6 लोकतत्त्वे; V1 लोकवादे; V2 तत्त्वलोके; G1 लोकवृत्तौ. —^{b}) D5 T1.3 G1 M3 च (for वा). T2 -ग्रहणे तथापि. Ś1 Ñ V B1.2 D1–4.6.10.11 न(D11 स्व) शास्त्रबुद्धौ(Ñ2 V B1.2 D6 °द्धया; D1.2.4 °बुद्धौ) स्व(V2 B2 [m. also]सु)मते(D3 °बले)न चा(D11 वा)पि. —^{c}) Ñ1 वेदे तु (sic) (for विद्येत). Ś1 Ñ1 D1.4.10 तुल्य एकस् (for वीर तुल्यस्). Ñ2 V B1.2 D2.6 बले न(D2 विद्येत) तुल्यस्तव कश्चिदन्यस् (Ñ2 D6 °देवः; V2 °द्दंडे); D11 विद्युत्तमः स्वं न च तुल्य एव (sic). —^{d}) Ś1 Ñ1 B1.2 D10 उत्तमः (for ह्युत्तमः). D1 om. सर्व-. D9 om. (hapl.) सुरा. Ñ2 V B1.2 D6 -सुरासुरेभ्यः. ❀ Ck : सर्वसुरासुराणामित्यनन्तरम्, न चाप्यस्य

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 48. 9
B. 5. 52. 18
L. 5. 48. 9

न चाप्यस्य कपेर्घाते कंचित्पश्याम्यहं गुणम् ।
तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः ॥ १०

साधुर्वा यदि वासाधुः परैरेष समर्पितः ।
ब्रुवन्परार्थं परवान्न दूतो वधमर्हति ॥ ११

अपि चास्मिन्हते राजन्नान्यं पश्यामि खेचरम् ।
इह यः पुनरागच्छेत्परं पारं महोदधेः ॥ १२

तस्मान्नास्य वधे यत्नः कार्यः परपुरंजय ।
भवान्सेन्द्रेषु देवेषु यत्नमास्थातुमर्हति ॥ १३

अस्मिंन्विनष्टे न हि दूतमन्यं
पश्यामि यस्तौ नरराजपुत्रौ ।
युद्धाय युद्धप्रिय दुर्विनीता-
वुद्योजयेद्दीर्घपथावरुद्धौ ॥ १४

कपेरित्यादि। अत्र मध्ये श्लोकद्वयं प्रक्षिप्तम्। प्राचीनाश्च तथा-वदन्. ❀ —After 9, D7.9 T2 G1 M1 (l. 5-8 after 10) ins.:

1055* पराक्रमोत्साहमनस्विनां च
सुरासुराणामपि दुर्जयेन।
त्वया प्रभग्नाः सुरदैत्यसंघा
युद्धेषु युद्धेष्वसकृन्नरेन्द्राः।
इत्थंविधस्यामरदैत्यशत्रोः [5]
शूरस्य वीरस्य तवाजितस्य ।
कुर्वन्ति मूढा मनसो व्यलीकं
प्राणैर्वियुक्ता न तु ये पुरा ते।

[(l. 2) D9 om. (hapl.) सुरा. —(l. 3) D7.9 त्वया-प्रमेयेण सुरेंद्रसंघा. —(l. 4) D7.9 जिताश्च (for first युद्धेषु). —(l. 5) G1 अर्थं विहत्य; M1 इत्थं विधाय (for इत्थंविधस्य). —(l. 6) T2 M1 तथा हितस्य (for तवाजितस्य). —(l. 7) D7.9 कुर्वंतु(D7 °ति) वीरा मनसाप्यलीकं. —(l. 8) D7.9 विमुक्ता (for वियुक्ता). G1 M1 ननु (for न तु). D7.9 भोः (for ये).]

10 G1 transp. 10^{ab} and ^{cd}. —^{a}) Ñ2 V B2-4 D2.6 [ए]व (for [अ]पि). D6 कपेरंते; T1.3 कपेस्तात. —^{b}) B4 D3.4 T1.3 M1 किंचित् (for कंचित्). V2 गुणान् (sic). Ñ2 V1 B1-3 D6 कांश्चित्पश्यामहे गुणान्. —^{c}) V B D3.4.6 [ए]व (for [अ]यं). —^{d}) D4 अति-; D8 परं (for अयं). D6 om. तः कपिः. —After 10, M1 ins. l. 5-8 of 1055*.

11 ^{a}) M2 सापूर्वा (sic) (for साधुर्वा). Ñ2 V B D1-4.6.10.11 साधु वा यदि वासाधु. —^{b}) G2 समर्पितं. Ś1 D10 परैः संप्रेषितो ह्ययं; Ñ V B D1-4.6 परैर्वचनमर्पितं. —^{c}) D11 ध्रुवं (for ब्रुवन्). Ñ V2 B D2.3.6 परार्थे; D11 परार्थः; T2 वधार्थं (for परार्थं). Ñ2 V B1-3 D6 धर्मज्ञ; B4 धर्मज्ञो (for परवान्). —^{d}) M3 न स (hypm.) (for न). Ś1 Ñ V B D1.2.4.6.10.11 वधं प्राप्तुम् (for दूतो वधम्).

12 Ñ1 om. 12. —^{ab}) B1 D4 वा (for च). D7.9 transp. राजन् and नान्यं. Ś1 Ñ2 V B D1.2.4.6.10 वानरं; D11 वै वरं (for खेचरम्). —D7.9 om. 12^{cd}. —^{c}) D1.4.11 योन्यः पुन(D11 नान्यो हरि)रिहागच्छेत्. —^{d}) G1 पर-; Cv as in text (for परं).

13 ☞ Cv is missing from 13 to 5.51.10. —^{a}) Ñ2 V B D6 अस्य (for नास्य). —^{b}) D1.4.5.11 T3 -परंजयः. Ñ2 D6 न कार्यो राक्षसाधिप; V B न कार्यः शत्रुता-पन(V2 B2 °नः). —D4 om. 13^{c}-14^{b}. —^{cd}) Ś1 D10 सर्वेषु (for सेन्द्रेषु). G1 transp. सेन्द्रेषु and देवेषु. D11 आख्यातुम् (for आस्थातुम्). Ś1 Ñ2 V1 D6.10.11 T1 अर्हसि (for अर्हति). D3 भवान्देवानपि विजित्य विजयेत पुरंदरं (hypm.).

14 D4 om. 14^{ab} (cf. v.l. 13). —^{a}) B2 G3 Ck तस्मिन्; Cm.g.t अस्मिन् (as in text). G1 प्रणष्टे; M2 प्रनष्टे; Cm.g.k.t as in text (for विनष्टे). B4 च (for हि). Ñ1 D5.8 T1.3 G1.3 M1.2 भूतम्; B2 किंचिद् (for दूतम्). G3 अन्यः (sic) (for अन्यं). —^{b}) D5 यैस्; G1 यत् (for यस्). Ñ2 V1 B D1-3.6.11 T3 G2 -देव-; Cm.k.t as in text (for -राज-). —B3 om. 14^{cd}. —^{c}) Ś1 Ñ2 V B4 D6.10 योधर्षभ; B1 D2.4.11 युद्धर्षभ; B2 चाधर्षतः; D1 दुर्धर्षभ (sic); D3 राज्योत्तम; G3 युद्धे प्रिय; Cm.k.t as in text (for युद्धप्रिय). D3 दुर्निवार्याव् (for दुर्विनीता-व्). —^{d}) Ś1 D10 बुध्येत गत्वा भवतो(D10 °ता) विरुद्धौ; Ñ V B2 D1.2.4.7.9 उद्योजयेद्वै(Ñ2 V B2 °द्वा) भवता(B2 °तां) विरुद्धौ; B1.4 उद्योजयेद्धर्मपथाविरुद्धौ; D3 उद्योजयेत्सं-प्रति युद्धकामैः; D6 उत्तेजयेद्वा भवता विरुद्धौ; D11 उद्वेजये-द्वै भवतां विरुद्धौ; G3 उद्योजयेद्दीर्घवधाविरुद्धौ. ❀ Cr: दीर्घ-पथावरुद्धावित्यतः परं पराक्रमोत्साहमनस्विनां चेति श्लोकः। ततः परं हिताश्चेति श्लोकः। तदनन्तरं तदेकदेशेनेति श्लोकः। ततो निशाचराणामिति सर्गान्तश्लोकः। अयमेव समीचीनः पाठक्रमः।; so also Cg. And it further adds अन्येऽप्यत्र सर्गे श्लोकाः कल्पिता दृश्यन्ते. ❀ —After 14, G M1 ins.:

1056* अस्मिन्हते वानरयूथमुख्ये
सर्वापवादं प्रवदन्ति सर्वे।
न हि प्रपश्यामि गुणान्यशो वा
लोकापवादो भवति प्रसिद्धः।
मूढैः प्रगल्भैरपि दुर्विनीतै- [5]
र्यैर्वानरोऽयं पुरुषैर्विसृष्टः।
तेषां वधार्थं कुरु सुप्रयत्नं
शीघ्रं विनाशाय निशाचरेन्द्र।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

पराक्रमोत्साहमनस्विनां च
सुरासुराणामपि दुर्जयेन ।
त्वया मनोनन्दन नैर्ऋतानां
युद्धायतिर्नाशयितुं न युक्ता ॥ १५

हिताश्च शूराश्च समाहिताश्च
कुलेषु जाताश्च महागुणेषु ।
मनस्विनः शस्त्रभृतां वरिष्ठाः
कोट्यग्रशस्ते सुभृताश्च योधाः ॥ १६

तदेकदेशेन बलस्य तावत्
केचित्तवादेशकृतोऽपयान्तु ।
तौ राजपुत्रौ विनिगृह्य मूढौ
परेषु ते भावयितुं प्रभावम् ॥ १७

G. 5. 48. 16
B. 5. 52. 24
L. 5. 48. 16

इति श्रीरामायणे सुन्दरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

कुरुष्व तावत्परमं प्रयत्नं
धर्मे समुत्थाय सुरेन्द्रशत्रो । [10]
देवेषु सर्वेषु सपावकेषु
दैत्येषु सर्वेषु सदानवेषु ।
कृत्वा प्रयत्नं सुदृढं सुशीघ्रं
मद्वाक्यमेतन्मनसानुगृह्य ।
तौ राजपुत्रौ विनिगृह्य मूढौ [15]
जयं परं प्राप्स्यसि राक्षसेन्द्र ।

[(l. 1) G3 तस्मिन्. M1 गते (for हते). G1 -वीर-; M1 -राज- (for -यूथ-). —(l. 2) G1.3 संतः (for सर्वे). —(l. 5) G1.2 मूढ-. G1 अति- (for अपि). —(l. 7) G1 वीर यत्नं; G3 सुप्रयुक्तं (for सुप्रयत्नं). —(l. 9) G1 परम-. —(l. 10) G1 धर्मं समासाद्य सुरेशशत्रो. —(l. 11) M1 सेंद्रेषु (for सर्वेषु). G1 सवास्वेषु; M1 च पावकेषु. —(l. 13) G3 सुदीर्घं (for सुशीघ्रं). —(l. 14) G3 एवं (for एतत्).]

15 a) Ñ2 -मनस्विनश्च; V2 B2 -मनस्विना च; B4 D3 -समन्वितेन (for -मनस्विनां च). Ś1 Ñ1 D1.2.4.10.11 पराक्रमोत्साहवता (D11 °तां) दृढेन; B3 पराक्रमोत्साहवतात्मना च; M2 शूरेण वीरेण निशाचरेंद्र. —b) D4 om. (hapl.) सुरा. B2 दुर्जये च. —c) Ñ1 प्रणेता सह (for मनोनन्दन). D1.4.11 त्वया समं नंद (D4 **)न राक्षसानां; D8 त्वमात्मनो नंदन नैर्ऋतानां (sic). —d) Ś1 Ñ V B D1–4.6.10.11 न राघवः (Ś1 °वणः) शक्ष्य (Ñ V2 D2 °क्य)ति योद्धुं (Ś1 D10 कर्तुं)माजौ; D7–9 Ck युद्धाय निर्नाश (D8 °र्यास)यितुं न युक्तं (Ck °क्तः).

16 a) Ś1 D10 हिताय (for हिताश्च). Ś1 D1–4.10.11 सुमानिताश्च (D11 °ये) (for समाहिताश्च). —b) Ś1 Ñ1 D1.2.4.10 सु-; D11 तु (for च). B1.4 महागुणाश्च; M1 समाहितेषु (for महागुणेषु). —c) Ś1 D1–4.10.11 यशस्विनः शस्त्रभृतां वराश्च; Ñ1 यशस्विनः शस्त्रभृतोसुराश्च. —d) D3 कोट्योग्रशस्ते; T1 कार्या भृशं ते; T3 कोट्यो भृशंस्ते; G3 M3 कोट्यग्रतस्ते; M1 कोट्यग्रशस्त्र-; B (ed.) कोपप्रशस्ताः. D5 [s]नुभृताश्; G1 सुहृदाश्; Cm.t as in text (for सुभृताश्). D2 वीराः; D3 G1 भृत्याः (for योधाः). Ś1 Ñ1 D10 कार्योद्यतास्ते सुभृताः सदैव; Ñ2 V B D6 योधास्तवेमे (Ñ2 D6 °स्तवास्मिन्; B4 °स्तु ते मे) बहवो हि (V1 [illeg.]) संति (B4 विशंति); D1.4 कोट्योग्रतस्तेस्त्रभृतः सदैव; D11 ज्येष्ठाश्च संतः सुभृतः सदैव; T2 निशाचरा राक्षसराजभृत्याः.

17 a) T2 तवैक- (for तदेक-). D1.4.8 M1 बलेन; Cr.m.g.t as in text (for बलस्य). —b) Ś1 Ñ1 D1–5.10.11 कश्चित्. T2 (*sup. lin.* also) तदा (for तव). Ś1 Ñ1 D10 M3 -कृतोभियोगः (M3 °यांतु); D1.4 -कृतो नियोगी; D2.3 -कृताति (D3 °भि)योगः; D7.9 -कृतोद्य यांतु; D11 -कृताभियोगात्; T2 -भृतोपयांतु. —c) Ś1 Ñ1 D1–4.7.9–11 Ct उपगृह्य (for विनि°). D8 गूढौ; D11 मूर्ध्ना (for मूढौ). —d) D2 ये (sic) (for ते). D3 भावयतः; G1 प्रापयितुं; Cm.k.t as in text (for भाव°). Ś1 Ñ1 D10 परे प्रतिज्ञां (D10 परेष्वतत्त्वं) प्रतिगृह्य सर्वं; D11 परेषु तत्त्वं प्रगृहाण सर्वं. —For 17, Ñ2 V B D6 subst.:

1057* एतैः समेतैः सहितो हि राजं-
स्त्वं योत्स्यसे तौ खलु राजपुत्रौ ।
तस्मादयं गच्छतु तत्र मुक्तः
समाह्वयत्वाशु गतासुकल्पौ ।

[(l. 1) V1 समस्तैः (for समेतैः). —B3 om. (hapl.) तो हि in सहितो हि. —(l. 2) Ñ2 D6 संयोत्स्यसे (D6 °ते). D6 किल (for खलु).]

—After 17, D7–9 T G M1.3 ins.:

1058* निशाचराणामधिपोऽनुजस्य
विभीषणस्योत्तमवाक्यमिष्टम् ।
जग्राह बुद्ध्या सुरलोकशत्रु-
र्महाबलो राक्षसराजमुख्यः ।

[(l. 1) G3 तस्यानुजस्याधिकमर्थतत्त्वं. —(l. 2) T1.3 [उ]त्तर-; Ck.t as above (for [उ]त्तम-). D7 T1 Ck.t -वाक्यनिष्ठं; M1 -वाक्यसंस्थां. —(l. 3) G2 -राज- (for -लोक-). —(l. 4) T2 G2 दशाननो (for महाबलो).]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

५१

G. 5. 49. 1
B. 5. 53. 1
L. 5. 49. 1

तस्य तद्वचनं श्रुत्वा दशग्रीवो महाबलः ।
देशकालहितं वाक्यं भ्रातुरुत्तरमब्रवीत् ॥ १
सम्यगुक्तं हि भवता दूतवध्या विगर्हिता ।
अवश्यं तु वधादन्यः क्रियतामस्य निग्रहः ॥ २
कपीनां किल लाङ्गूलमिष्टं भवति भूषणम् ।
तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु ॥ ३
ततः पश्यन्त्विमं दीनमङ्गवैरूप्यकर्शितम् ।
समित्रा ज्ञातयः सर्वे बान्धवाः ससुहृज्जनाः ॥ ४
आज्ञापयद्राक्षसेन्द्रः पुरं सर्वं सचत्वरम् ।
लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम् ॥ ५

—Then G M1 cont.:

1059* दध्यौ पुनस्तं प्रति वानरेन्द्रं
स राक्षसेन्द्रो मतिमान्महात्मा ।
किं वाद्भुतं ब्रह्मण एव तेजः
सर्वस्य बीजं जगतोऽस्य विष्णोः ।
यद्देवदेवस्य परस्य तेज- [5]
स्तदेव तेजः कपिरेष वीरः ।
वधाय मे वैष्णवमेव तेजः
निःसंशयोऽयं कपिरूपधारी ।
इत्येवमेतद्बहुधा विचिन्त्य
रक्षोधिपः क्रोधवशं जगाम । [10]
क्रोधं च जातं हृदये निरुध्य
विभीषणोक्तं वचनं सुपूज्य ।
उवाच रक्षोऽधिपतिर्महात्मा
विभीषणं शस्त्रभृतां वरिष्ठम् ।

[G2 M1 om. l. 1–2. —(l. 3) G2 M1 किं वा परं ब्रह्म परं च सत्यं(M1 त्वसह्यं). —(l. 4) G3 धातुर् (for बीजं). G3 [ऽ]थ (for ऽस्य). G1 स सर्वधातुर्जगतोधिविष्णोः. —(l. 5) G2 M1 परं च (for परस्य). —(l. 6) G1.3 तदेव किं वा कपिवीर एषः (G3 °रेष धीरः). —(l. 7) G3 ते (for मे). G3 M1 वैष्णवतेज एतन्(M1 °वं). —(l. 8) G1.2 किमागतं वानररूपधारी. —(l. 11) M1 निगृह्य (for निरुध्य). ❀ Ck: अनन्तः। क्रोधं च जातमित्यादि श्लोकद्वयं (?) प्रक्षिप्तम्. ❀ —(l. 12) G1 सरत्नः (for सुपूज्य). —(l. 13) G1 मेने च रक्षोधिपतिमैहांतं. —(l. 14) G1 धर्मभृतां.]

Colophon. —*Sarga name*: Ś1 Ñ V B D1–4.6.10.11 **विभीषणवाक्यं** —*Sarga no.* (figures, words or both): Ñ1 D1.2.4.10.11 om.; Ś1 M2 51; Ñ2 V1 D6 50; V2 40; B1.2 48; B3 47; B4 D3 53; D5.7–9 T G M1.3 52. —After colophon, D2 concludes with राम जय; G M1 with श्रीरामाय नमः.

51

M2 begins with श्रीरामाय नमः.

1 Cv is missing from 1 – 10 (cf. v.l. 5.50.13). —[a]) B3 स तस्य; B4 ततस्तद् (for तस्य तद्). —[b]) B2.3 राक्षसेंद्रो. D2 महामतिः; D5.7.9 T M1.2 °त्मनः (for °बलः). Ś1 ह्यवरस्य मनीषिणः; D10 देशकालसमन्वितं. —D10 om. 1°. —[c]) Ś1 -[अ]न्वितं वाक्यं; Ñ1 D1–4.11 -हितं भ्रातुर्; Ñ2 -समं भ्रातुर्; V B1.4 D6 -क्षमं भ्रातुर्; B2.3 -क्षमं दृष्ट्वा (B3 श्रुत्वा) (for -हितं वाक्यं). —[d]) Ñ V B1.4 D1–4.6.11 वाक्यम् (for भ्रातुर्). Ñ1 उत्तमम्; D11 उत्तरतो (for उत्तरम्). B2.3 भ्रातुर्वाक्यमथाब्रवीत्; D10 भ्रातुर्वाक्यमिदमब्रवीत् (hypm.).

2 [a]) D10 यस्य युक्ते (sic) (for सम्यगुक्तं). Ñ2 V B D3.6 सम्यगाह भवांस्तावद्(B1 D3.6 °स्तात). —[b]) B4 [अ]तिगर्हिता; D6.8 हि ग° (for विग°). D2.3 दूतवधा (D2 °ध्यं) विगर्हिताः(D2 °तं); D11 वधो दूतो विगर्हितः (sic). ❀ Ck: दूतस्य वध्या दूतवध्या। वधेति प्रकृत्यन्तरात् स्त्रियां क्तिनपवादः क्यबार्षः।; so also Ct. ❀ —[c]) T1 G1 वधाय (for वधाद्). M1 अन्यत्. —[d]) V B D6 करणीयोस्य(V2 °द्य) (for क्रियतामस्य). D4 विग्रहः. D3 कर्तव्योस्य विनिग्रहः.

3 [a]) D1.4(both with hiatus) इष्टं हि (for लाङ्गूलम्). —[b]) D1.4 पुच्छं (for इष्टं). Ñ2 V B D6 इष्टं भूषणसंज्ञितं. —[c]) T1 स तस्य (for तद्°). D2.11 [आ]दीप्यतां. Ñ2 V1 B D6 आशु (for शीघ्रं). —[d]) D5.8 दंडेन; D11 तश्चेन (sic); G3 दीप्तेन; Cm.k.t as in text (for दग्धेन).

4 [a]) D5 पश्यंति. Ñ1 D5.7 T2 [अ]मुं (for [इ]मं). Ñ2 V B D6 पश्यंतु ज्ञातयश्चैनम्(B2.3 °वम्). —[b]) Ñ1 अंगं; B4 अंगे (for अङ्ग-). Ś1 Ñ2 V B1.3.4 D5–7.9.10 -वैरूप्यकर्षितं; D1.4.11 -वैरूप्यकारितं(D11 °रणं); D8 -वैकल्यकर्शितं. —[c]) Ś1 Ñ V D7.9.10 Ct सुमित्र-; B D1.2.4–8.11 T2 G3 M1.3 समित्र-; D3 T1 अ(T1 सु)मित्राः; D8 मित्राणि; Cg समित्रा (as in text). Ñ2 V B D6.11 -बांधवाः; D2 -जातयः (for ज्ञातयः). D3 सर्वा (sic) (for सर्वे). —[d]) D11 ज्ञातयः (for बान्धवाः). T1.3 च (for स-). D2 सकपीश्वराः; D5 marg. (for ससुहृज्जनाः). Ñ2 V B D6 ज्ञातयः(V B2 सुहृदः) स(B3.4 °यश्च)कपीश्वराः.

5 Ñ2 V B D6 om. 5. —[a]) D3 ततोब्रवीद् (for आज्ञापयद्). D4.11 आज्ञा(D4 °य)यद्राक्षसेंद्रस्य (sic). —[b]) Ś1 D1.2.4.5.8.10.11 T3 च(D5 स) सत्वरं; Cg as in text (for सचत्वरम्). D3 पुरीमेष सचत्वरां.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्कशाः ।
वेष्टन्ते तस्य लाङ्गूलं जीर्णैः कार्पासिकैः पटैः ॥ ६

संवेष्ट्यमाने लाङ्गूले व्यवर्धत महाकपिः ।
शुष्कमिन्धनमासाद्य वनेष्विव हुताशनः ॥ ७

तैलेन परिषिच्याथ तेऽग्निं तत्रावपातयन् ॥ ८

लाङ्गूलेन प्रदीप्तेन राक्षसांस्तानपातयत् ।
रोषामर्षपरीतात्मा बालसूर्यसमाननः ॥ ९

स भूयः संगतैः क्रूरै राक्षसैर्हरिसत्तमः ।
निबद्धः कृतवान्वीरस्तत्कालसदृशीं मतिम् ॥ १०

कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः ।
छित्त्वा पाशान्समुत्पत्य हन्यामहमिमान्पुनः ॥ ११

सर्वेषामेव पर्याप्तो राक्षसानामहं युधि ।
किं तु रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम् ॥ १२

G. 5. 49. 0
B. 5. 53. 13
L. 5. 49. 13

---

6 ^{b}) Ñ1 D1.4.10.11 रणकर्कशाः ; Ñ2 V क्रोध(V2 कोप)कर्षिताः ; B4 D2.6 T2 M1 क्रोध° ; D3 G1.2 M3 कोपकर्शिताः ; G3 क्रोधमूर्छिताः (for कोपकर्कशाः). —^{c}) Ś1 V2 D1–4.10.11 M2.3 वेष्टयंति स्म ; Ñ2 V1 B D6 अवेष्टयंत ; D8 M1 °यंतेस्य (for वेष्टन्ते तस्य). ❀ Cr : वेष्टयन्ति स्म लाङ्गूलमिति पाठः । ; Ct : वेष्टन्ते, अवेष्टयन्तेत्यर्थः . ❀ —^{d}) B3 D8 कार्पासकैः (for °सिकैः). Ś1 D10 जीर्णका(D10 °क)र्पासकर्पटैः ; D1.4.11 शीर्णैः कर्पासिकैः पटैः(D11 °कैस्तथा) ; M3 चीर्णैः कार्पासकैः पटैः .

7 ^{a}) Ñ V2 B1.2 D1–4.6.10.11 G3 M1 स(Ñ D6 आ) वेष्टयमाने ; V1 संवेष्टयमान- ; B4 वेष्टयमाने च (for संवेष्ट्यमाने). B3 G1 स वेष्टयमान(G1 °नो)लांगूलो(G1 °ले). —^{b}) B4 प्रावर्धत. Ñ1 महाबलः (for °कपिः). —^{c}) D3 शुष्कवद्धनम् (sic) (for शुष्कमिन्धनम्). —^{d}) D7 हुताशनं. —After 7, Ñ2 V B ins. :

1060* चिन्तयामास मतिमान्देशकालक्षमं बहु ।

[V2 B1.4 च ह (for बहु).]

8 D6 om. 8–11^{b}. Ñ2 V B om. 8–10. —^{b}) Ś1 D10 T1.3 [अ]प्यपात(Ś1 °द)यन् ; Ñ1 [अ]वपादयन् ; D1.3.4 G1.2 न्य(G1.2 व्य)पातयन् ; D7.9 G3 Cm.k.t [उ]पपाद° ; D8 व्यदीप° ; T2 [उ]पपा° ; M2 [अ]पपाद° (sic) ; M3 [अ]भ्यपा° (for [अ]वपातयन्). ❀ Cm : हुताशन इति पाठे वृद्धौ दृष्टान्तोऽयम् । उपपादयन्नित्यस्य समयोजयन्नित्यन्ये । ; Ck : उपपादयन्नुदपादयन्. ❀

9 Ñ2 V B D6 om. 9 (cf. v.l. 8). D10 om. 9^{ab}. G2 transp. ^{ab} (including 1062*) and ^{cd}. —^{b}) Ñ1 D1.4 न्यपात(Ñ1 °द)यत् ; D2 विलोकयन् ; D7–9 अताडयत् ; D11 M2 अपोथयत् ; Cg as in text (for अपातयत्). Ś1 राक्षसास्तं व्यलोकयन् ; D3 रराज स महाकपिः . —D3 transp. 9^{cd} and 10^{ab}. —^{c}) Ś1 D1.4.10 रोषहर्ष- ; Ñ1 हर्षरोष- ; D11 G3 रोमहर्ष- ; T1.3 G2 स तु रोष- . —^{d}) Ś1 D10 इवोदितः ; Ñ1 -इवाननः ; D3.11 G3 -निभाननः ; M1 -समप्रभः . —After 9, Ś1 Ñ1 D1.2.4.10.11 ins. ; D3 ins. after 9^{ab} :

1061* शुचिशुक्लव्यपगमे सविद्युत्तोयदो यथा ।

[Ñ1 -शुक्ले ; D2.3.11 -शुक्ल- (for -शुक्ल-). D1.4 शुचौ शुक्ले. Ñ1 D1.4.11 व्यतिक्रांते ; D2.3 -व्यतिक्रामे (for -व्यपगमे). D3 सतडित् (for सविद्युत्). D1.4.11 इव तोयदः .] ;

whereas D5 T M2.3 ins. after 9 ; D7–9 ins. l. 2 only after 10^{ab} ; G2 ins. after 9^{ab} :

1062* लाङ्गूलं संप्रदीप्तं तु दृष्ट्वा सर्वे हनूमतः ।
सहस्त्रीबालवृद्धाश्च जग्मुः प्रीतिं निशाचराः ।

[(l. 1) G2 लांगूलेन (for °लं सं-). D8 तं (for तु). D5 T2 तस्य द्रष्टुं ; M2.3 द्रष्टुं तस्य (for दृष्ट्वा सर्वे). D8 दृष्ट्वा तस्य महात्मनः (for the post. half). —(l. 2) D9 सहस्र- (for सहस्त्री-). D5 T2 M2.3 प्रीता ; T1.3 भीता (for प्रीतिं).]

10 Ñ2 V B D6 om. 10 (cf. v.l. 8). D3 transp. 9^{cd} and 10^{ab}. —^{a}) D11 संगतः (for °तैः). Ś1 D2.10 क्रुद्धैं (for क्रूरैं). D3 स भूयोप्यपरैर्घोरैं . —^{b}) Ś1 Ñ1 D1.2.4.7–11 T1 G3 हरिपुंगवः ; D3 भीमविक्रमैः ; M2 हरियूथपः . —After 10^{ab}, D7–9 ins. l. 2 only of 1062*.

11 D6 om. 11^{ab} (cf. v.l. 8). —^{a}) V1 कथं (for कामं). D2 ते (for मे). Ś1 D10 मे शक्तिर् ; Ñ2 V B शक्ता मे (by transp.). —^{b}) D1.4 सुबद्धस्य. D8 [अ]स्य (for [अ]पि). Ś1 D10 राक्षसैः (for °साः). Ñ2 V B D3 बद्धस्यापि निशाचराः(B3 च राक्षसाः). —After 11^{ab}, D1.3.4 ins. :

1063* क्रुद्धस्य पुरतः स्थातुं सिंहस्येवेतरे मृगाः ।

—^{c}) B3 D1.4 पाशं. D8 खमुत्पत्य. —^{d}) G3 हनिष्येहम्. Ñ B D3.6 गच्छतः प्रतिवार(Ñ1 °राव[meta.])णे ; V1 हनिष्यामि पुरीमिमां ; V2 D1.4 गच्छतः प्रति राव(V2 तोर)णं ; D2 बलिनां प्रतिवारणे ; D11 गच्छतः परिधारणे. —After 11, D5.7–9 S ins. :

1064* यदि भर्तुर्हितार्थाय चरन्तं भर्तृशासनात् ।
बध्नन्त्येते दुरात्मानो न तु मे निष्कृतिः कृता ।

[(l. 1) D5.7.9 T2 Cg भर्तुः ; Cv.r.m.t as above (for भर्तुर्). —D5 om. l. 2. —(l. 2) D7.9 Ct निबध्नंते ; T3 बध्यंते ते (sic) (for बध्नन्त्येते).]

12 Ñ2 V B D6 om. 12–13^{b}. —^{a}) G1 अपि (for एव). Ś1 D10 एषामपि सु- ; Ñ1 D2–4.11 एषां व(Ñ1 D11 चा)पि

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 49. 0
B. 5. 53. 14
L. 5. 49. 13

लङ्का चारयितव्या मे पुनरेव भवेदिति ।
रात्रौ न हि सुदृष्टा मे दुर्गकर्मविधानतः ।
अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये ॥ १३
कामं बन्धैश्च मे भूयः पुच्छस्योद्दीपनेन च ।
पीडां कुर्वन्तु रक्षांसि न मेऽस्ति मनसः श्रमः ॥ १४

ततस्ते संवृताकारं सत्त्ववन्तं महाकपिम् ।
परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुञ्जरम् ॥ १५
शङ्खभेरीनिनादैस्तैर्घोषयन्तः स्वकर्मभिः ।
राक्षसाः क्रूरकर्माणश्चारयन्ति स्म तां पुरीम् ॥ १६

सु-; D_1 तेषां वापि सु- (for सर्वेषामेव). —^{b}) D_2 महायुधि (for अहं युधि). —^{c}) G_3 transp. किं तु and रामस्य. $\tilde{N}_1$ G_2 प्रीत्यर्थं किं तु(G_2 नु) रामस्य; G_1 M_1 किं तु रामप्रियार्थं. हि. ❀ Cr.g.: रामस्य प्रीत्यर्थमित्यत्र छन्दोभङ्ग आर्षः. ❀ —^{d}) M_2 ईदृशः.

13 $\tilde{N}_2$ V B D_6 om. 13^{ab} (cf. v.l. 12). —^{a}) G_3 विचरितव्या. D_5 $G_{1.3}$ M वै (for मे). D_{11} लंका राजयितव्याशु. —^{b}) M_2 एवं (for एव). Śi $\tilde{N}_1$ $D_{1-4.10.11}$ भविष्यति. —After 13^{ab}, Śi $\tilde{N}_1$ $D_{1-4.10.11}$ ins.:

1065* इति क्षंस्येऽहमेतेषां राक्षसानामिमां क्रियाम् ।

[Śi D_{10} ज्ञात्वा; D_2 क्षमे (for क्षंस्ये). D_4 (after m. corr.) इत्येवं प्रसहिष्येहं (for the prior half).]

—Śi $\tilde{N}$ V B $D_{1-4.6.10.11}$ transp. ^{cd} and ^{ef}. —^{c}) $\tilde{N}_1$ $D_{1.2.4}$ transp. न and हि. D_{11} च न हि (for न हि सु-). M_2 वै (for मे). $D_{1.4}$ मया दृष्टा (for सुदृष्टा मे). D_3 रात्रौ तु न तु दृष्टा मे. —^{d}) D_2 दुष्टकर्म- ; G_3 दुर्गमार्ग- ; Cr.m.g.t as in text (for दुर्गकर्म-). $\tilde{N}_2$ V B $D_{3.6}$ दुर्गमार्गाः समंततः. —^{e}) V $B_{1.3.4}$ D_8 T G_1 M_2 चैव; D_4 एवं. V B मे लंका (for द्रष्टव्या). $\tilde{N}_2$ D_6 चापि लंकेयं; D_3 तु मया लंका (for एव द्रष्टव्या). —^{f}) Śi $\tilde{N}_1$ $D_{1.2.4.10.11}$ लंकेयं रजनीक्षये; $\tilde{N}_2$ V B $D_{3.6}$ द्रष्टव्या रजनीक्षये.

विवृत्तविध्वस्तविशाललोचना
महाजवा भूतगणाः सहस्रशः।
वसन्तपुष्पोत्करचारुदर्शनं
वसन्तमासादपि कान्तदर्शनम्। [30]
स पुष्पकं तत्र विमानमुत्तमं
ददर्श तद्वानरवीरसत्तमः।

Colophon.

यच्चत्पृथिव्यामभिरामरूपं
तत्तत्कृतं भूमितलेऽपि तस्य।
नारस्फाटिकं नामणिरत्नपूर्णं
नाराजतं किंचिदकाञ्चनं वा।
वनानि शैला नगराणि नद्यः [5]
सरांसि चित्राणि च काञ्चनानि।
तले बभूवुः स्फटिकान्तराणि
तस्मिन्विमाने तपसो निधाने।
भूस्तत्र रक्तोत्पलपत्रचित्रैः
कीर्णा सहेमोत्पलपत्ररेणुः। [10]
यथाविधा राजवरोत्तमांगे
चूडासु चूडामणयो विभान्ति।
तथाविधास्तत्र कृता विमाने
स्तम्भाश्च जालानि च वेदिकाश्च।
स्तम्भप्रमाणान्यविलम्बितानि [15]
स्तम्भानि चित्राण्यपि चोत्तमानि।
तत्रापि वैदूर्यकृतं विशालं
यथा सतारागणमन्तरिक्षम्।
दामानि पद्मोत्पलगन्धकानां
प्रसुप्तमुल्लेचकृतं सुरम्यम्। [20]

[(l. 1) D2 अपि नामरूपं (for अभिराम°). —(l. 2) D1.3.4 भूमितलेषु (for °तलेऽपि). —(l. 4) D3 न राजितं; D4 नाराज* (for नाराजतं). —(l. 5) D3 om. from नद्यः in l. 5 up to णि in l. 6. —(l. 7) Ś1 बभूव (for °बुः). Ś1 D10 स्फटिकोत्त(D10 °केत)राणि. —(l. 8) D4 विताने (for विमाने). —D1.3.4 om. l. 9–10. —(l. 10) Ś1 कृष्णा. D2 -रत्नचित्रैः (for -पत्ररेणुः). —After l. 10, D2 ins.:

सुवर्णपद्मोत्पलकेसरैश्च
तथैव पद्मोत्पलकेसरैश्च।
सुसंस्कृते वेदितले च तस्मि-
न्नावर्षता लोहितचन्दनेन। [5]
प्रबुद्धपद्मोत्पलपत्ररेणुः
खद्योतवर्णश्च सुवर्णरेणुः।

—(l. 11) Ś1 [उ]त्तमांके. —(l. 12) D1.3.4 चूडानु- (for °डासु). —(l. 13) Ś1 D10 विमान- (for विमाने). —(l. 14) Ś1(after corr. as above) वेदिकानि (for °काश्च). —D1.3.4 om. l. 15–20. —(l. 15) Ś1 [अ]वलंबितानि. —D2 transp. l. 17–18 and l. 19–20. —(l. 17) D2 तन्नील- (for तत्रापि). —(l. 18) Ś1 सुतारागणं (for सतारा°). —Ś1 D10 om. l. 19–20.]

—(l. 9) Ś1 D10 प्रयत्नं; D1.3.4 प्रयत्नो; D2 प्रयत्नान्; Cm.k.t as above (for प्रयत्नतो). —(l. 10) D7.9 महार्घ- (for महार्ह-). Ś1 D2.10 -रत्नं; Ct as above (for -रत्नवत्). —Ś1 D1–4.10 T1 G2 M2 transp. l. 11 and 12. —(l. 11) D1.3.4 नियतं; M2 न यथा; Cm.k.t as above (for नियताः). —(l. 12) Ś1 D10 -विशेषं;- D2 -विशेषणं; Ct as above (for -विशेषवत्). —D1.3.4 om. l. 13–16. —(l. 13) D2 G1 ततः (for तपः-). G2 ततः समाधाय (for तपःसमाधान-). D10 -[आ]जितं (for -[अ]र्जितं). Ś1 -परैः समार्जितं (for -पराक्रमार्जितं). —(l. 14) Ś1 पुनः (for मनः-). Ś1 D2.10 T2 -विचारचारितं. —(l. 15) D2 -संघात- (for -संस्थान-). —(l. 16) Ś1 D2.10 श्लक्ष्ण- (for तुल्य-). D7.9 G1 -निर्मितं (for -दर्शनम्). —(l. 17) T2 सु- (for तु). Ś1 D1–4.10 सुरासुराणामपि दुःप्रधर्षणं. —(l. 18) Ś1 D1.3.4.7.9.10 T2.3 Ct दुरासदं; D2 दुराधरं (sic); Cr.m.g as above (for दुरावरं). ❀ Ct: दुरासदम् पापिभिरिति शेषः। "दुरावरम्" इति पाठे शत्रुभिर्दुर्निवारमित्यर्थः. ❀ Ś1 D2.10 -वेगदर्शनं; D1.3.4 -चंडवेगं; Ct as above (for -तुल्यगामिनम्). —(l. 19) D8 महर्षिणां; G1.2 मनस्विनां (for महर्द्धिनां). Ś1 D2.10 उ(Ś1 अ)ग्रतपःकृतात्मनां; D1.3.4 उग्रतपांसि कुर्वतां (for पुण्यकृतां महर्द्धिनां). ❀ Cv: महर्द्धिनामिति। वृत्तानुकूल्यार्थं नामीति दीर्घो न कृतः। Cr.m: महर्द्धिनामत्र दीर्घाभावश्छान्दसः।; Cg: महर्द्धिनां महर्द्धीनाम्। "अपि मापं मपं कुर्याच्छन्दोभङ्गं न कारयेत्" इत्युक्तरीत्या वृत्तभङ्गभिया ह्रस्वोच्चारणम्।; Ct: महर्द्धिनाम्। दीर्घाभावश्छान्दसः। एवं तुल्यगामिनामित्यत्र पुंस्त्वम्। विमानशब्दोऽर्धर्चादिर्वा. ❀ —(l. 20). Ś1 D2.10 पुण्यकृतां यथा(D2 °तं तथा)लयं; D1.3.4 पुण्यकृतामिवालयं. D8 उदारमभ्यं मरुतामिवालयं; T2 यशः समभ्यं समुदारमालयं. ❀ Ct: अभ्यमुदां महासुखानां पुण्यकृतामेवालयमास्पदम्। इव शब्द एवार्थे. ❀ —(l. 21) D7

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

3

After 5.7.29, D₃ ins. :

पराक्रमानीतमनुत्तमं श्रिया
विमानवर्यं प्रसमीक्ष्य पुष्पकम् ।
अनेकरत्नोज्ज्वलभासितान्वितं
स मारुतिर्विस्मयमागतः परम् ।
[पुष्पकदर्शनो नाम एकादशः सर्गः ।]
ददर्श चाथ विमानाग्रे तिष्ठन्तं स्त्रीशताकुलम् । [5]
राक्षसेन्द्रं महेन्द्राभं रावणं हनुमान्कपिः ।
आसीनं बालसूर्याभं काञ्चने परमासने ।
कैलासशिखराग्रस्थं यथा वैश्रवणं तथा ।
नीलजीमूतसंकाशं रक्तचन्दनभूषितम् ।
मदोत्कटं गवां मध्ये नर्दन्तमिव गोपतिम् । [10]
यक्षदानवदैत्यानां कन्याभिः सर्वतो वृतम् ।
किंनरीभिर्मानुषीभि * * * * श्च सेवितम् ।
विद्याधराणां कन्याभी राक्षसीभिश्च राक्षसम् ।
सेव्यं गुह्यककन्याभिर्गान्धर्वीभिश्च राक्षसम् ।
आहृताभिर्बलाद्वोरं न करोति उपस्थितम् । [15]
धर्मेणापहृताभिश्च प्रमथ्य च महासुरान् ।
तत्र दिव्यानि माल्यानि वस्त्राण्याभरणानि च ।
गात्रेषु परमस्त्रीणां ददर्श स महाकपिः ।
स्नातानां चन्दनानां च धूपानां चैव उत्थितः ।
प्रववौ सुरभिर्गन्धो विमाने पुष्पके शुभे । [20]
सर्वकामैरुपेतां तां पानभूमिं महात्मनः ।
ददर्श हरिशार्दूलस्तस्य रक्षःपतेर्गृहे ।
पानभोजनविक्षेपैः फलैश्च विविधैरपि ।
कृतपुष्पोपहाराभूत्प्रपुष्पोपाधिकां श्रियम् ।
तैश्च कलधौतैश्च विन्यस्तैः शयनासनैः । [25]
पानभूमिं विभासद्भिः प्रदीप्तं चाभ्यदृश्यत ।
बहुप्रकारैर्विविधैर्वातसंस्कारसंस्कृतैः ।
मांसैः कुशलसंपक्वैः पानभूमिगतैः पृथक् ।
तथाम्ललवणोत्तंसैर्विविधैः रागषाडवैः ।
वासैश्चूर्णैश्च शालैश्च विविधैः स्म विराजते । [30]
गोकन्दकमनोत्तंसैरुपरक्तांतरेषु च ।
वैडूर्यमणिचित्रेषु भाजनेषु सुगन्धिषु ।
शर्करासवमाध्वीकमैक्षवं च शुभं मधु ।

4

After 5.14.28, Śi Ñi Di–3.4 (l. 67 – 70 after 5.14.30).10.11 ins. :

तद्विहीना न भात्येषा चन्द्रहीनेव शर्वरी ।
कदा तु खलु दुःखस्य पारं यास्यति मैथिली ।
एवं चिन्तयतस्तस्य मारुतेर्विक्लवात्मनः ।
प्रभाता शर्वरी पुण्या चन्द्रनक्षत्रमण्डिता ।
ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी । [5]

आलब्ध- (for आलम्ब्य). Śi D10 विशेषतश्चासनसंप्रतिष्ठितं; Di–4 विशालतायामशत (D2 °तं)प्रतिष्ठितं. —(l. 22) D10 -कूप-; T1.3 -रत्न-; Ck.t as above (for -कूट-). D1.3.4 चित्रं कूटं (D4 * *)तद्बहुचित्रमंडितं. —(l. 23) Śi Di–4.10 शरदीव (for °दिन्दु-). —(l. 24) Śi D2.10 महाभ्रकूटं (for विचित्र°). G3 यथा गिरेः (by transp.) (for गिरेर्यथा). Śi Di–4.10 विविधाभ्रमंडलं (D2 °डितं); M1 शिखरे गिरिर्यथा (for शिखरं गिरेर्यथा). ❀ Cv : कूटं क्षुद्रशृङ्गम् । शिखरं महाशृङ्गम् । एतच्च भगवतः प्रतिनियतविशेषणे प्रयोगेणैव निश्चीयते ।; Cr : विचित्रकूटं (विचित्र) शिखरम् । शिखरस्याप्यवान्तरशिखरसद्भावात् ।; Cm : विचित्रकूटं विचित्रशिखरम् ।; Cg : विचित्रकूटं शिखरं गिरेर्यथा । कूटमवान्तरशृङ्गम् । शिखरं महाशृङ्गमिति प्रयोगादवधार्यते ।; Ck : विचित्रकूटं विचित्रावान्तरशृङ्गवत् । एवं विचित्रकूटं विचित्रप्रासादवदित्यर्थः; Ct : गिरेर्विचित्रावान्तरशृङ्गवच्छिखरमिव. ❀ —(l. 25) Śi D2.10 यत्; D1.3.4 तत्; Cg.k.t as above (for यं). ❀ Cg : यं यत् । आर्षो व्यत्ययः. ❀ D8 -शोभितानना: ❀ Cr : भवन्ती (वदन्ती ?)त्वनेन श्लोकेन विमानस्य राक्षसवाह्यत्वं प्रतीयते । कामगस्य दिव्यस्य तन्नोपपद्यते । अन्तःपुरमध्यरक्षणार्थं राक्षसावस्थानायोगात् । अतोऽत्र समाधानं विद्वद्भिश्चिन्त्यम् । ; Cm : वहन्ति वहन्तीव । इवशब्दोऽत्राध्याहर्तव्यः. ❀ —Śi D2.10 om. (hapl.) l. 26–27. —(l. 26) D1.3.4 महानना. T2 व्योम्निचरा. —(l. 27) D1.3.4 निवृत्त (D3 °त्ति)निःकृष्ट- (for विवृत्तविध्वस्त-). D9 -विशील-. —(l. 28) Śi Di–4.10 मनोजवा (for महा°). G1 महाबला दूतगणाः. ❀ Cg : महाजवा महाजवा इव स्थिताः । भूतगणा गोपुरवाहका इव प्रतिमारूपेण स्थिताः । अन्यथा रावणान्तःपुरे पुरुषसंचारायोगात्कामगस्य विमानस्य वहनासंभवाच्च । यद्वा शिविकावाहका इव भूतगणा अधोभागे वहन्ति । तद्वारेणैव कामगत्वमपि । चेतनप्रेरणं विनाऽचेतनसंचारस्यात्यन्तमनुचितत्वाच्च. ❀ —(l. 29) M3 वसंति (for -वसन्त-). G1 -पुष्पोत्कट-. D10 -चित्रदर्शनं. Śi Di–4 -पुष्पोत्कटचित्र (D2 चैत्र)दर्शनं. D8 प्रतप्तचामीकरचारुदर्शनं. —(l. 30) D5.7.9 -चारुदर्शनं (for -कान्त°). —(l. 31) M1 सुपुष्पकं. Śi चैव; Di–4.10 नाम (for तत्र). —(l. 32) M1 (before corr.) -संमतः (for -सत्तमः). —After l. 32, D2 reads राम.

Colophon. —*Sarga name* : Śi Di–4.10 पुष्पकवर्णनं (D1.3.4 °नः). —*Sarga no.* (figures, words or both) : D1.2.4.10 om.; Śi 6; D3 10; D5.7–9 S 8. —After colophon, G concludes with श्रीरामाय नमः.

4

(l. 2) D1.3.4 कथं (for कदा). Śi D10.11 नु (for तु). Ñi अस्य दुःखस्य तु कथं (for the prior half). —(l. 3) D11 विप्लवात्मनः. Ñi कथं शोकाकुलात्मनः (for the post. half). —(l. 4) Śi D10 चंद्र-; D11 तत्र (for पुण्या). Śi D10.11 -ग्रह- (for चन्द्र-). —(l. 5) D3 -तनुः (for -वपुः). —(l. 6) D1.4 -परिक्षामः; D3 -परिक्षीण-; D11 -परीताक्ष- (for -परिक्षाम-). —(l. 7) Ñi illeg. for दृष्ट्वा प्लवग. D3 प्लवंग- (for प्लवग-). D10 प्लवगपुंगवः. —(l. 8) D2 मतिमांस् (for हनुमांस्). Ñi हनुमांश्चिंतयामास (by transp.). —(l. 9) Note hiatus

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्।
अथोद्यन्तं विवस्वन्तं दृष्ट्वा प्लवगसत्तमः।
चिन्तयामास हनुमांस्तदा बुद्धिमतां वरः।
अदृष्टपूर्वा मे सीता इमां च वरवर्णिनीम्।
इङ्गितैरभिजानामि सीतां शोकपरायणाम्। [10]
राक्षसीभिः सुघोराभिस्तर्ज्यमानां मुहुर्मुहुः।
ध्यायन्तीं बाष्परुद्धाक्षीं निःश्वसन्तीं पुनः पुनः।
अधोमुखीं निरानन्दामेकवस्त्रावगुण्ठिताम्।
एकामनेकरूपाभिर्मानुषीं राक्षसीवृताम्।
सुरूपां मलदिग्धाङ्गीमेवंविधमनर्हतीम्। [15]
रावणस्य पुरं श्रीमत्सर्वमन्तःपुरं तथा।
गृहाणि रक्षसां चैव तथोद्यानानि सर्वशः।
रात्रौ मृगयता सीता विश्रब्धं लक्षिता मया।
न चात्र दुःखिता नारी नामत्ता नाश्रुविक्लवा।
न च बन्धुवियुक्ता च मुक्त्वैतां राक्षसीवृताम्। [20]
अवज्ञातं मया सर्वं रावणान्तःपुरं महत्।
अत्र चित्तं समासक्तं ध्रुवं सीतेयमङ्गना।
संपातिवचनाच्चापि जानाम्येतामहं ध्रुवम्।
रामस्य महिषीं देवीं लक्ष्मीं नारायणस्य वा।
न शक्या प्रसभं द्रष्टुं राक्षसीसंनिधौ मया। [25]
शङ्केरन्मम राक्षस्यः कार्यनाशस्ततो भवेत्।
एता वा यद्यहं हन्मि ह्यदृष्ट्वा जनकात्मजाम्।
कार्यतत्त्वमविज्ञाय विक्रमो मे भवेद्वृथा।
तस्मात्स्वल्पेन रूपेण सांप्रतं लक्षयाम्यहम्।
एतां दृष्टिपथे कृत्वा हृदि योगीव देवताम्। [30]
इति बुध्या समीक्ष्याथ संक्षिप्य च वपुः स्वकम्।
तस्थावन्तरसंप्रेक्षी कालज्ञः पवनात्मजः।
ततो रश्मिसहस्रेण मुष्णंस्तेजांसि ज्योतिषाम्।
काञ्चनाभं जगत्कुर्वन्नुदितो विमलो रविः।
दिवाचराणां संह्लादः शुश्रुवे तुमुलो भुवि। [35]
रात्रिंचराश्च ये सत्त्वास्ते निद्रावशमागताः।
रक्षोद्वारे राक्षसानां शब्दोऽभून्मीनिःस्वनः।
धावतामाह्वयानानां घनानामिव गर्जताम्।
अग्निहोत्रोत्थितैर्धूमैराज्यगन्धैश्च सा पुरी।
मारुतेन समाधूतैर्यज्ञभूमिरिवाभवत्। [40]
शुश्राव राक्षसेन्द्रस्य नानावाचः समीरिताः।
जयशब्दांश्च विविधाँस्तुतिशब्दांश्च पुष्कलान्।
शङ्खतूर्यरवोन्मिश्रान्वेणुगीतस्वनांस्तथा।
अथ ते राक्षसा घोरा नीलाञ्जनचयप्रभाः।
रावणं जयशब्देन संपूज्याभिप्रतस्थिरे। [45]

---

between the two halves. D2 सीता मे (by transp.). D11 स (for च). D2 तामिमां जनकात्मजां (for the post. half).—(l. 10) D2 कारणैर् (for इङ्गितैर्). D11 अपि (for अभि-). D2 भर्तृ- (for शोक-). D1.4 मैथिलीं शोककर्षितां (for the post. half).—(l. 11) D2 विरूपाभिस् (for सुघोरा°). D11 तप्यमानां (for तर्ज्यमानां). Ñ1 प्रतिक्षणं (for मुहुर्मुहुः).—(l. 12) D2 -पूर्णाक्षीं (for -रुद्धाक्षीं). Ś1 D2 उच्छ्वसंतीं; D11 उच्छेदतीं (for निःश्वसन्तीं). Ñ1 मुहुर्मुहुः (for पुनः पुनः).—Ñ1 illeg. from l. 13 up to जय- in l. 45.—(l. 13) D3 -[अ]वगुंठिनीं (for °ताम्).—((l. 14) D11 एका (with hiatus) (for एकाम्). Ś1 राक्षसीभिः समावृतां (for the post. half).—(l. 15) Ś1 स्वरूपां (for सुरूपां). D2 एवम् (for -विधम्). D1.3.4 एवं शोक(D3 एवंविध)-परां सतीं (for the post. half).—(l. 16) D2 पुरीं (for पुरं). D2.11 श्रीमान् (for श्रीमत्). D3 श्रीमद्- (for सर्वम्). Ś1 महत् (for तथा).—(l. 17) D1.4 तद् (for तथा). D11 घोराणि (for [उ]द्यानानि).—(l. 18) D2 ललितं; D4.11 लक्षितं (for लक्षिता). Ś1 विश्रम्यालक्षिता मया; D10 मया विश्रम्य लक्षिता (for the post. half).—(l. 19) D11 न चारु दुःखिता दीना (for the prior half). D10 न शांता (for नामत्ता). Ś1 न चार्ता न च विक्लवा (for the post. half).—(l. 20) D11 -वियुक्तां (for °क्ता). D1.4 वा (for second च). D2 मुक्त्वेमां; -वियुक्तां (for °क्ता). D1.4 वा (for second च). D2 मुक्त्वेमां; D11 मुक्त्वा तां (for मुक्त्वैतां). Ś1 -गणात् ; D2.11 -गणान् ; D3 -गणे (for -वृताम्).—D1-4 om. l. 21.—(l. 21) D11 अत्र (for अव-). D11 चारेणांतःपुरं (for रावणान्तः°).—(l. 22) D2.3 समायुक्तं; D11 ममासक्तं (for समासक्तं). D1.4 अत्र चिंता-समायुक्ता (for the prior half).—(l. 23) Ś1 चैव (for चापि). D11 [ए]नाम् (for [ए]ताम्).—(l. 24) D2.11 च (for वा).—(l. 25) D11 तथा (for मया).—(l. 26) D11 यदि (for मम). Ś1 D10 शंकेयुः राक्षसीनां तु; D2 शंकेयुर्मां हि राक्षस्यः (for the prior half). Ś1 D10 भविष्यति (for ततो भवेत्).—(l. 27) D11 वै (for वा). D10 वा (for [अ]हं). D1.4 अपृष्ट्वा (with hiatus); D10 अदृष्ट्वा (with hiatus); D11 ह्यदृष्टां (for ह्यदृष्ट्वा).—(l. 28) Ś1 -तंत्रम् (for -तत्त्वम्). Ś1 D10 वृथा भवेत् (by transp.).—(l. 29) D1 जयाम्यहं (subm.); D3 कलयाम्यहं; D11 लब्धयाम्यहं (for लक्षयाम्यहम्).—(l. 31) Ś1 पुनस्तनुं (for वपुः स्वकम्).—(l. 34) Ś1 D10 कांचनं च (for काञ्चनाभं). D1.4 वियत् (for जगत्). D3 सर्वं (for कुर्वन्). D3 कुर्वन्सूर्यः समुद्यतः (for the post. half).—(l. 35) D3 संह्लादः (for संह्लादः).—(l. 36) D1.4 नक्तं- (for रात्रिं-). D11 निद्रावशमुपागताः (for the post. half).—(l. 37) D1 राजसानां (for राक्ष°). D2 भूरि- (for भीम-). D10 -निस्वनः ; D11 -दर्शनः (for -निःस्वनः).—Ś1 D10 om. l. 38.—(l. 38) D11 ह्रियमाणानां (for आह्वयानानां). D2.3 घर्मगे (for गर्जताम्).—(l. 39) D3 -स्थितैर् (for -[उ]त्थितैर्).—(l. 40) D2 समुद्भूतैर् (for समाधूतैर्).—(l. 41) D10 आश्राव (for शुश्राव).—(l. 42) D1.4 श्रुति- (for स्तुति-).—D11 om. l. 43-44.—(l. 43) D2 -रवैर्मिश्रान् ; D10 -रवैर्मिश्रा (for -रवोन्मिश्रान्). D1.3.4 -रवांस् ; D10 -स्वनास् (for -स्वनांस्).—(l. 44) Ś1 -चयोपमाः (for -चयप्रभाः).—(l. 45) D2 संप्रपूज्याभितस्थिरे; D3 संपूज्याभ्युपतस्थिरे (for the post. half).—(l. 47) Ñ1 D1.3.4 विविधाकाराः (for संवृता°). D11 गुहां च संवृताकारां (for the prior half). Ñ1 सानूनि विपुलानि च (for the post. half).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

उद्यानानि विहारांश्च पर्वतांश्च मनोरमान्।
गुहाश्च संवृताकाराः सानूंश्च विपुलानपि।
वेश्मानि चापि रम्याणि मनोदृष्टिहराणि च।
आक्रीडान्विविधांश्चित्रान्नदीनां पुलिनानि च।
वृक्षखण्डांस्तथा दिव्यान्गह्वरान्निर्झराणि च। [50]
स्वच्छन्दगतयस्ते हि रावणाश्रयनिर्भयाः।
संघशो रेमिरे तेषु विश्वस्ताश्च तथा पृथक्।
हनुमानपि संहृष्टः सीतासंभाषणोत्सुकः।
सूर्यास्तमनमाकाङ्क्षंस्तस्थौ वृक्षान्तरे स्थितः।
ततः संताप्य पृथिवीं जपापुष्पोत्करप्रभः। [55]
दिनक्षयान्मन्दरश्मिर्भानुरस्तमुपागतः।
अथ क्रीडां परित्यज्य राक्षसा विकृतेक्षणाः।
स्वं स्वं स्थानं समाश्रित्य तस्थू रात्र्यागमे तदा।
अशोकवनिकामेव विहंगानां प्रधावताम्।
संघशोऽभून्महाशब्दो गवामिव महाव्रजे। [60]
ततो रात्र्यां प्रवृत्तायां त्वरन्निव कपिस्तदा।
बहुप्रकारं निश्चित्य सीतां तामित्यमन्यत।
इयं हि सीता नान्यैषा भवित्री सुदृढात्मनः।
पत्नी रामस्य दयिता रोहिणी शशिनो यथा।
स तां छन्नवपुर्भूत्वा चक्षुषा व्यवलोकयत्। [65]
अवलोक्य च तेजस्वी जहर्ष च ननन्द च।
इयं हि सीता जनकात्मजा ध्रुवं
भवत्यवश्यं मम हर्षवर्धिनी।
यतोऽन्तरात्मा मम हृष्टरूपः
सिन्धुर्यथा चन्द्रमसोदयेन। [70]

5

After 608*, T1.3 G2.3 M2 ins.; T2 ins. l. 1–2 after 5.25.15; G1 M1 (l. 1–5 and 9 only) ins. after 17^{cd} (r); D8 ins. after l. 4 of 610*:

साण्डं त्रिभुवनं भीमं सर्वतः सचराचरम्।
सर्वं ग्रस्तं मया दृष्टं रामेणाक्लिष्टकर्मणा।
क्षीरोदधिजले मध्ये श्वेतः शैलः समुच्छ्रितः।
तस्य मूर्ध्नि ततः श्वेतश्चतुर्दन्तो महागजः।
तस्य पृष्ठे स्थितः श्रीमान्रामो राजीवलोचनः। [5]
लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया।
ततः सीता समुत्पत्य भर्तुरङ्काश्रिता स्थिता।
बाहुभ्यां संपरिष्वज्य संपूर्णं चन्द्रमण्डलम्।
ततोऽन्यत्र मया दृष्टो रामो रक्तान्तलोचनः।
आसीनः प्राङ्मुखः श्रीमानासने परमे शुभे। [10]
अभिषिक्तस्तु काकुत्स्थः सर्वदेवैर्नमस्कृतः।
सब्रह्मर्षिगणैः सिद्धैः सर्वतीर्थजलेन च।
शुक्लमाल्याम्बरधरा शुक्लगन्धानुलेपना।
सीता तत्र पृथुश्रोणी रराज जनकात्मजा।
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः। [15]

—(l. 48) Ś1 D10 चाति-; D3 यानि (for चापि).—D2 om. l. 49.—(l. 49) D11 आक्रीडांश्च (hypm.) (for °डान्). Ś1 D3.10 रम्यान् (for चित्रान्).—(l. 50) Ñ1 illeg. up to गह्वरान्. D3.10 निर्झरानपि (for °णि च).—(l. 51) D2 -रतयस्ते तु (for -गतयस्ते हि). D11 मच्छंवरंस्तपस्ते हि (corrupt) (for the prior half).—(l. 52) D2 विश्वस्ता नु (for °श्च). Ñ1 D1 पृथक्; D4 om. (for तथा).—(l. 53) Ñ1 अथ (for अपि).—(l. 54) Ś1 Ñ1 D10.11 सूर्यास्त (Ś1 °स्तं)मनसा(D10 °यमा)कांक्षस्(Ś1 D10 °क्षंस्) (for the prior half).—Ñ1 illeg. after वृक्षा up to जपा in l. 55. D3.11 वृक्षांतराश्रितः (for °रे स्थितः).—(l. 55) D2 जपाकुसुमोत्करप्रभः (hypm.) (for the post. half).—(l. 56) Ś1 Ñ1 D10 दिनक्षये; D3 दिवाक्षयान् (for दिनक्षयान्). Ñ1 D11 उपागमत् (for °गतः). D2 भास्करोस्तमुपागमत् (for the post. half).—(l. 57) D10.11 अथाक्रीडां (for अथ क्रीडां). Ñ1 अथ सीतां परिष्वज्य (for the prior half). D2 विवृतेक्षणाः (for विकृते°).—(l. 58) Ś1 D10 उपागम्य; D2 मयाश्रित्य; D3 समासृत्य; D11 उपाश्रित्य (for समाश्रित्य). D11 तथा (for तदा).—(l. 59) Ś1 D10 -वनिकायां च (for °कामेव). Ś1 D10 विहगानां.—Ñ1 illeg. from प्रधावताम् up to -शब्दो in l. 60.—(l. 60) D3.11 महान् (for महा-).—(l. 61) D2 व्यतीतायां (for प्रवृत्तायां). Ś1 कपिस्तथा; Ñ1 महाकपिः (for कपिस्तदा).—(l. 62) D11 विनिश्चित्य (hypm.). D2 कपिर् (for तामिति). Ś1 D10 सीतां तत्रैव नान्यतः; D11 सीतामित्यमन्यत (for the post. half).—(l. 63) Ñ1 सा (for हि). D2 भार्यैषा (for नान्यैषा). D1.4.10 तु (for सु-).—(l. 65) Ñ1 illeg. for the prior half. D1–4.11 स तु (for स तां). Ñ1 D3.10 व्यवलोकयन्; D2 च व्यलोकयत् (for व्यवलोकयत्).—After l. 65, Ñ1 ins.:

सीतां पश्य करीराभां हनूमान्पवनात्मजः।

—(l. 66) D1.4 स (for first च). Ś1 D10 ननाद (for ननन्द).—(l. 67) D11 च (for हि).—(l. 68) D1.3.4.11 हर्षवर्धनी.—(l. 69) Ś1 D10 तथा; D2 यथा; D4 ततो (for यतो). D2 दृष्ट- (for हृष्ट-).—(l. 70) D1.4.10 -[उ]दितेन (for -[उ]दयेन).

5

D8 reads l. 1–2 for the first time after 5.25.12 repeating them here after l. 22. T1 damaged for l. 1–2 (cf. v.l. 608*).—(l. 1) T2 सोडुं (for साण्डं). D8 (first time) सर्वं; G2 दीप्तं (for भीमं). D8 (second time) सांडं सर्वं त्रिभुवनं (for the prior half). D8 (first time) T2 M2 सर्वभूत(D8 °तं)चराचरं; G1 सभूतं सचराचरं (for the post. half).—M2 om. l. 3–8.—(l. 4) G2 स्थितः (for ततः).—(l. 5) G1 गज- (for तस्य).—T3 G3 om. l. 6–9. D8 om. l. 6. T1 damaged for l. 6–12.—(l. 8) G1 चारुकुंडलं (for चन्द्रमण्डलम्).—(l. 9) D8 राजीवलोचनः.—(l. 10) D8 परमाद्भुते; M2 परमार्चिते (for परमे शुभे).—(l. 11) G3 स (for तु).—(l. 12) G1 M2 ब्रह्मर्षीणां (for सब्रह्मर्षि-). D8 M2 G1 सर्वैः (for सिद्धैः).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ब्रह्माणमग्रतः कृत्वा रामं तत्र ववन्दिरे।
पुनरेव मया दृष्टो रामो रमयतां वरः।
विष्णुरेव स्वयं भूत्वा तस्मिन्नास्ते वरासने।
परं ब्रह्म परं सत्यं परं ज्ञानं परं तपः।
परं बीजं परं क्षेत्रं परं कारणकारणम्। [20]
शङ्खचक्रधरः श्रीमान्पुण्डरीकायतेक्षणः।
श्रीवत्सवक्षा नित्यश्रीरजेयः शाश्वतो ध्रुवः।
एवंभूतो महातेजा रामः कमललोचनः।
सर्वलोकेश्वरः श्रीमान्राजा रघुनन्दनः।
ततोऽमरेन्द्राः पितरो मुनीन्द्राः [25]
गन्धर्वविद्याधरपन्नगेन्द्राः।
कृताभिषेकं परिवार्य रामं
प्रतुष्टुवुः प्राञ्जलयः प्रहृष्टाः।
ततस्तु सर्वाप्सरसः प्रहृष्टाः
नृत्यन्ति गायन्ति समेत्य तत्र। [30]
वाद्यं प्रकुर्वन्ति नदन्ति शङ्खाः
वंशाश्च वीणा मुरजाश्च भेर्यः।

6

After 5.33.19^{ab}, D$_3$ ins.:

त्रिगम्भीरः सप्तरक्तः पञ्चसूक्ष्मः प्रतापवान्।
चित्तोन्नतो दशावर्तो रामः सर्वमनोरमः।
कक्षायां लिङ्गभेदे च मुखे गात्रे बिभर्ति यः।
पुष्पाणां मत्स्यमद्यानां तथा मृगमदस्य च।
प्रोच्यते स चतुर्गन्धः सर्वलक्षणपूजितः। [5]
भूतभवद्भविष्याणां धर्मकामार्थयोस्तथा।
संधिविग्रहयानानां कालज्ञः स्यात्त्रिकालवित्
अनसूया दया क्षान्तिस्त्रिकमेकं प्रकीर्तितम्।
मङ्गलाचारयुक्तं च शौचं चैव तथा स्पृहा।
अनायासस्त्वकार्पण्यं शौर्यं चेति त्रयस्त्रिकाः। [10]
त्रिकं धर्मादिसंयुक्तं त्रिकं स्थानादि चापरम्।
त्रिकं नीतित्रयं चान्यदज्ञैस्त्रित्रिकमुच्यते।
प्रलम्बं मेहनं यस्य प्रलम्बौ वृषणौ तथा।
प्रलम्बबाहुश्च तथा नरश्चैव प्रशस्यते।
उदारमास्यमोष्ठौ च तथोदारस्वनो हि यः। [15]
स चातिगुणसंयोगादुदारौष्ठस्वरो मतः।
नेत्रतारे भ्रुवौ श्मश्रु केशाश्चैवासिताः शुभाः।
तमिस्राञ्जनवत्कृष्णाश्चतुःकृष्णः स उच्यते।
उत्सेधेनानुभावेन विक्रमेण धिया तथा।
यश्चतुर्भिर्यशोलेखैश्चतुर्लेखः स उच्यते। [20]
धर्मार्थकाममोक्षाणां रेखां नातिक्रमेत यः।
प्राप्नोत्यनुत्तमाँल्लोकान्बाध्यबाधकवर्जितान्।
चतुर्णां लोकपालानां वपुर्धारयते नृपः।
शक्रवैश्रवणाग्नीनां तथा प्रेताधिपस्य च।
पाणिपादं चतुर्लेखं पुरुषस्य भवेद्यदि। [25]
चक्रवर्तिपदं तस्य दुर्लभं न कथंचन।
अमात्यैः पञ्चभिः सार्धं दैवज्ञेन पुरोधसा।
पश्यते यः स्वयं पश्चात्षोडशाब्दो नृपो भवेत्।
अङ्गुल्योऽङ्गुलिपर्वाणि हृदयं च नखास्तथा।
समाः सुविदिताश्चैव यस्य स्युस्स चतुःसमः। [30]
पुराणं न्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।
त्वग्लोमानि तथा केशा वाग्दृष्टिश्चापि पञ्चमी।
पञ्चैतानि च स्निग्धानि यस्य स्युः स नृपो नरः।
जानुवंशावुभौ यस्य भुजवंशावुभौ तथा। [35]
ऊरुवंशद्वयं चैव पृष्ठवंशश्च जानकि।
नाभिवंशसमो यस्य सोऽष्टवंशः प्रकीर्तितः।
स्वरः सत्त्वं च नाभिश्च त्रिगम्भीरः प्रकीर्तितः।
पाणिपादतलौ रक्तौ नेत्रान्तानि नखास्तथा।
तालुजिह्वाधरोष्ठौ च सप्त रक्तं प्रशस्यते। [40]
सूक्ष्माण्यङ्गुलिपर्वाणि केशास्त्वग्दशना नखाः।
पञ्च सूक्ष्माणि यस्य स्युः स च सन्मानमर्हति।

7

After 5.33, Ś$_1$ Ñ V B D$_{1-4.6.10.11}$ ins.:

स शोकार्तामशोकस्थो ददर्श हनुमान्कपिः।
विमुक्तां किंनरेणेव किंनरीं जनकात्मजाम्।
तां निशम्य विशालाक्षीं क्षितौ क्षितिरजोऽरुणाम्।

—(l. 13) D$_8$ -माल्यानुलेपना (for -गन्धा°). —(l. 14) D$_8$ साधु सा तत्र सुश्रोणी; G$_1$ सीता च तत्र सुश्रोणी (for the prior half). —T$_1$ damaged for l. 17–19. —(l. 17) M$_2$ परः (for वरः). —(l. 18) G$_1$ एव (for आस्ते). —(l. 19) D$_8$ तत्त्वं (for सत्यं). —(l. 21) D$_8$ -गदा- (for -धरः). —G$_1$ om. (hapl.) from the post. half of l. 21 up to the prior half of l. 24. —T$_1$ damaged from the post. half of l. 22 up to l. 32. —(l. 23) D$_8$ भूत्वा (for -भूतो). —(l. 24) D$_8$ स राजा; G$_2$ रावणो (for रराज). —(l. 25) T$_3$ T$_3$ G$_3$ महेंद्रः; G$_1$ नरेंद्राः (for ऽमरेन्द्राः). —(l. 26) T$_3$ -पन्नगेश्वराः (for °गेन्द्राः). —T$_3$ G$_3$ read l. 29 after l. 32. —(l. 29) T$_3$ G$_3$ नर्दंति शंखाः पणवाश्च सर्वे. —(l. 31) T$_3$ G$_3$ सुरेंद्रनार्यः (for नदन्ति शङ्खाः). —(l. 32) T$_3$ G$_{1.2}$ M$_2$ मुरवाश्च.

7

(l. 1) Ñ$_1$ तां सशोकाम्; B$_4$ शोकार्तां ताम् (for स शोकार्ताम्). Ś$_1$ Ñ$_1$ B$_1$ D$_{1-4.10.11}$ अशोकस्थां (Ś$_1$ D$_{10}$.°कार्हां) (for अशोकस्थो). Ñ$_1$ मारुतात्मजः (for हनुमान्कपिः). —(l. 2) B$_2$ (marg. also) D$_2$ वियुक्तां (for विमुक्तां). B$_4$ D$_{11}$ [ए]व (for [इ]व). D$_1$ विमुक्तां किंकरेणेव (for the prior half). D$_1$ ददर्श; D$_2$ वियुक्तां (for किंनरीं). —(l. 3) Ñ$_2$ V B D$_6$ निरीक्ष्य; D$_3$ निशाम्य (for निशम्य). Ś$_1$ D$_{10}$ -रजस्विनीं; Ñ$_1$ -रजस्यतां; B$_1$ -रजोगुणां; B$_2$ (marg. also as above) -रजोक्षितां; B$_4$ D$_2$ -रजोन्वि(D$_2$ °वृ)तां;

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

बाष्पसंदिग्धया वाचा पुनर्वचनमब्रवीत्।
दूतोऽहमनवद्याङ्गि लङ्कां प्राप्तो नृपाज्ञया। [5]
त्वदर्थं प्रेषितस्तेन राघवेण महात्मना।
सा तस्य वचनं श्रुत्वा मानुषस्येव भाषतः।
अकरोत्कपिमाश्रित्य न विषादं न विस्मयम्।
तथा ब्रुवाणं वैदेही वानरं रावणक्षये।
नाभ्यभाषत शोकेन हर्षेण च जडीकृता। [10]
स मुहूर्तात्कपिश्रेष्ठो हनुमाञ्शास्त्रकोविदः।
निपत्य पादयोर्मूर्ध्ना कीर्तयामास राघवम्।
यशसा तपसा चैव वीर्येण च समन्वितः।
युक्तो योगविदां श्रेष्ठः स त्वां कौशल्यमब्रवीत्।
यः समुद्र इवाक्षोभ्यो हिमवानिव निश्चलः। [15]
सत्यधर्म इवाकम्प्यः स त्वां कौशल्यमब्रवीत्।
प्रियो यस्य च सौमित्रिः सौमित्रेश्चापि यः प्रियः।
यो नाथो वानरेन्द्रस्य स त्वां कौशल्यमब्रवीत्।
भ्राता कनीयान्रामस्य सुमित्रा येन सुप्रजा।
प्रणम्य शिरसा पादौ स त्वां कौशल्यमब्रवीत्। [20]
पितृवद्वीक्षते रामं त्वां च पश्यति मातृवत्।
यो नित्यमरविन्दाक्षि स त्वां कौशल्यमब्रवीत्।
तस्य तद्वचनं श्रुत्वा वानरस्य महात्मनः।
मुमोच दुःखिता सीता शोकोष्णं वारि नेत्रजम्।
अशोभन्त पतन्तोऽस्या नेत्राभ्यामश्रुबिन्दवः। [25]
फुल्लाभ्यामिव पद्माभ्यां प्रसक्तास्तोयबिन्दवः।
सा प्रमृज्यायते नेत्रे कराभ्यां करुणावती।
उपपन्नैरभिज्ञानैर्दूतं तमवगच्छत।

8

After 5.36.11, Ñ V B D1–4.6.11 ins.; while Ś1 D10 ins. after 5.36.35:

ब्रूयास्त्वं नृपतिं सीता त्वत्प्रसादपरायणा।
अशोकमूले शोकार्ता भूमौ स्वपिति जानकी।
मलमण्डलदिग्धाङ्गी शोकाश्रुकलिलानना।
वसन्तादौ विमृदिता वापीव न विराजते।

D1.4 -रजश्रितां D11 -तरस्विनां (for -रजोऽरुणान्). D3 क्षितौ कपिवरः स्थितां (for the post. half).—(l. 4) D11 वाक्य- (for बाष्प-).—(l. 5) D2 हनुमान्नाम (for अनवद्याङ्गि). B1 (marg. also) प्राप्तोस्मि मैथिलि; B4 प्राप्तो नृपात्मजे (for प्राप्तो नृपाज्ञया).—(l. 6) V2 B2 तदहं(V2 °र्थं) (for त्वदर्थं). Ñ2 V1 प्रेषितं; D4 प्रेरितस् (for प्रेषितस्). D11 मे प्रेषितस्ते (for प्रेषितस्तेन). Ñ2 V B1–3 D6 बलीयसा (for महात्मना).—(l. 7) Ñ1 भाषितं; Ñ2 V B1.2.4 D6 जल्पतः; D11 भावतः (for भाषतः). B3 मनुष्यवरकामिनी (for the post. half).—(l. 8) Ñ2 V B D6 सत्त्वम् (for कपिम्). B4 आस्थाय; D1 आसृत्य (for आश्रित्य). B3 विषादं न तु; D3 सा सीता च न (for न विषादं न).—(l. 9) B3 D1.3 राक्षसा(B3 °वणा)लये; D4 राघवक्षये; D6 रावणक्षयं (for रावणक्षये). (l. 10) V B धैर्येण; D2 वैदेही (for शोकेन). V B शोकेन (for हर्षेण). Ñ2 D6 transp. शोकेन and हर्षेण. D4 तु (for च).—(l. 11) D2 सु- (for स). B1 हरि- (for कपि-). Ñ1 प्लवंगः (for हनुमान्). Ś1 B3 D10.11 मारुतात्मजः; B2.4 अर्थ° (for शास्त्रकोविदः).—(l. 12) Ś1 Ñ1 D2.4.10.11 चरणौ (for पादयोर्). D3 वानरः (for राघवम्).—Ñ1 D11 om. l. 13–28.—(l. 13) Ñ2 V B D6 तेजसा (for तपसा). Ñ2 D6 धर्मेण; V B1–3 D3 धैर्येण (for वीर्येण). Ś1 D10 सतां पतिः; D1–4 विशांपतिः(D2 °तेः) (for समन्वितः). B4 धैर्येण विक्रमेण च (for the post. half).—(l. 14) Ś1 D10 योगवतां(D10 °तो); V2 B4 वेदविदां; D1.3 रामः सतां (for योगविदां). D10 श्रेष्ठां (for श्रेष्ठः). Ś1 D6.10 त्वा (for त्वां). V2 D3 कौशलम्; D1 कुशलम्.—V2 om. (hapl.) l. 15–18. D2.6 om. (hapl.) l. 15–16.—(l. 15) B3 हिम- (for second इव). Ś1 D3.10 चाचलः (for निश्चलः).—(l. 16) Ś1 D10 सत्यो; B1.3.4 D2 सत्ये (for सत्य-). B1 धर्मे (for -धर्मे). D10 त्वा (for त्वां). D1.3 कु(D3 कौ)शलम् (for कौशल्यम्).—D1 om. (hapl.) l. 17–18.—(l. 17) B1 हि (for च). B3 transp. यस्य and च. Ñ2 V1 B4 D3.4.6 चैव; B3 यश्च (for चापि). B3 हि (for यः).—(l. 18) Ś1 वित्राता (for यो नाथो). D10 त्वा (for त्वां).—D10 om. (hapl.) l. 19–20. B1 D2 transp. l. 19–20 and 21–22 and B1 alone reads after l. 14.—(l. 19) B3 कनिष्ठो (for कनीयान्). V B1.2 रामस्य कनीयान्भ्रा(V1 °*सौ भ्रा; B1.2 °न्यसो भ्रा; B2 (also in marg.) °नीयो भ्रा)ता; B4 रामस्यावरजो भ्राता; D2 भ्रात्रा कनीयसा तस्य (for the prior half). D1 सुमित्रायाश्च (for °त्रा येन).—(l. 20) Ñ2 त्वा (for त्वां). V2 D1.3 कु(V2 कौ)शलम् (for कौशल्यम्).—D3 om. (hapl.) l. 21–22.—(l. 21) Ś1 D2.4.10 पश्यते; D6 ईक्षतो (for वीक्षते). V1 तां (for त्वां).—(l. 22) B2 D1 -[अ]क्षः (for -[अ]क्षि). B2 ते; D10 त्वा (for त्वां). V2 D1 कु(V2 कौ)शलम् (for कौशल्यम्).—(l. 23) V B1.2 ततस् (for तस्य).—(l. 24) B3 हर्षिता; D2 सहसा (for दुःखिता). Ś1 D10 शोकोत्थं; B3 [आ]नंदजं (for शोकोष्णं). Ś1 D1–4.10 नेत्रजं जलं (for वारि नेत्रजम्).—(l. 25) Ñ2 V अस्र- (for अश्रु-).—D10 om. (hapl.) l. 26.—(l. 26) Ś1 D1.3.4 प्रसन्नास् (for °क्तास्य). B4 सक्तास्ते जलबिंदवः; D2 यथावश्या *बिंदवः (for the post. half).—(l. 27) Ś1 D10 प्रमृज्य ततो; Ñ2 प्रसृज्यते (subm.) (for प्रमृज्यायते). D2 प्रममार्ज ततो नेत्रे (for the prior half). Ś1 V B4 D3 करुणायती(D3 °ते) (for °वती).—(l. 28) B3 भूतं (for दूतं). B2.4 सम्- (for तम्). Ś1 D10 तं चाध्यगच्छत; V2 तमभिगच्छत; B3 D3 तमधिगच्छति; D1.4 तस्यावगच्छति. D2 यथा योगी प्रियाप्रियौ (for the post. half).

8

(l. 1) B4 तं नृपं (for नृपतिं). V1 B1.2 सा ते; V2 वीर; D1–4.11 गत्वा (for सीता). Ś1 D10 नृपशार्दूलं (for नृपतिं सीता). ब्रूहि सौम्य त्वं तं गत्वा (for the prir half).—(l. 3)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

शोकोपहतसर्वाङ्गी तव दर्शनलालसा। [5]
सीता शोकार्णवे मग्ना तां समुद्धर्तुमर्हसि।
सशरः सायुधश्चापि वीर्यवांश्च महीपते।
म्रियते च वधार्होऽयं रावणः किं न बुध्यसे।
क्व ते तदायुधं चित्रं क्व शराः पावकप्रभाः।
क्व तेजः क्व च शस्त्राणि यन्मामेवमुपेक्षसे। [10]
किं नु ते पौरुषं नष्टं शङ्के मद्भाग्यसंक्षयात्।
यदयं रावणः पापो म्रियते जीवति त्वयि।
ये त्वां शूरमिति प्राहुस्तेषां तद्वितथं वचः।
न हि भार्यां परामृश्य कश्चिच्छूरस्य जीवति।
शूरो हि रक्षते भार्यां भार्या शूरमुपासते। [15]
न च मां रक्षसे वीर किमिदं शूरलक्षणम्।

पूर्वं हि रक्षति पिता कौमारे रघुनन्दन।
त्वया हीना हृता राजन्रावणेन दुरात्मना।
जनकानां कुले जाता राघवाणां कुले वधूः।
वसाम्यहमनाथेव दीना राक्षसवेश्मनि। [20]
उच्छोषणं समुद्रस्य पतनं चन्द्रसूर्ययोः।
चलनं शैलराजस्य शीतत्वं कृष्णवर्त्मनः।
अश्रद्धेयानि सर्वाणि यथैतानि नरोत्तम।
तथानार्यमिदं मन्ये रावणं यदुपेक्षसे।
एतच्चान्यच्च वक्तव्यं कृपां कुर्याद्यथा मयि। [25]
वायुना धूयमानो हि वनं दहति पावकः।
भर्तव्या रक्षणीया च पत्या पत्नी हि सर्वदा।
तन्नष्टमुभयं कस्माद्धर्मस्थस्य सतस्तव।

V1.2 -पंकिल-; B1 D3 -मंडन- (for -मण्डल-). Ś1 Ñ1 D1-4.10.11 दुःख- (for शोक-). Ś1 B1.3 D11 -क(D11 -कु)लिताननाः; V2 -सलिलाननाः; B4 D2 -मलिनानना (for -कलिलानना). —(l. 4) B2 मृतांभोजा; B3 D1 प्रमृदिता; D2 च मृदिता (for विमृदिता). D1 वापी न च (for वापीव न). Ś1 D10 भुवि (D10 तव) सीदति (for न विराजते).—(l. 5) B4 D4.10 -सर्वांगीं (for °गी) and -लालसां (for °सा).—(l. 6) Ś1 B4 D4.10 सीतां (for सीता) and मग्नां (for मग्ना). Ś1 D2.10 त्वं (for तां).—(l. 7) Ñ2 B3 D6 सासिर्; V2 B2 D3.4.11 चासि (for चापि). B3 स (for च). B3 D2.11 महीपतिः (for °ते).—(l. 8) Ñ2 D6 हि (for च). Ś1 स जीवति; Ñ1 D11 जीवते च; D2 आततायी; D10 जीवत्यपि (for म्रियते च). Ś1 V2 B3 वध्यते (for बुध्यसे).—(l. 9) D11 कृतं (for क्व ते). B4 वरायुधं (for तदा°). Ñ2 B3.4 D6.10 पावकोपमाः.—After l. 9, D1 repeats l. 8.—(l. 10) Ś1 Ñ1 D4.10 क्व ते तेजः क्व चा(Ñ1 श)स्त्राणि; D1.2.11 क्व च (D3 नु) तेजः क्व चास्त्राणि; D3 क्व तेजः क्वापि चास्त्राणि (for the prior half).—(l. 11) B3 तत् (for ते). Ś1 D10 मन्ये (for शङ्के). Ś1 तद्- (for मद्-).—(l. 12) D2 नीचः (for पापो). Ś1 D10 नियतं; D2 पश्यति (for म्रियते). Ś1 D10 म्रियते; B3.4 जीविते; D11 ध्रुवति (for जीवति). D2.6 transp. जीवति and त्वयि.—(l. 13) D6 om. ये (subm.). Ñ2 D1.3.6 शूर (for शूरम्). B2 तु (for तद्). Ś1 Ñ1 D1-4.10.11 वचनं वृथा; Ñ2 विहितं वचः (for वितथं वचः).—(l. 14) Ś1 Ñ1 D1-4.10.11 प्रियां; B2 न च (for न हि). Ś1 Ñ1 D10.11 परामृश्यात्; D1.3.4 परामर्शेत्; D2 दशग्रीवो (for परामृश्य). B3 शूरो हि; B4 D6 शूरश्च (for शूरस्य). Ś1 Ñ1 D1.3.4.10.11 को हि(Ñ1 कस्य) शूरस्य जीवतः; D2 हृत्वापि हृदि जीवति (for the post. half).—(l. 15) Ñ1 D2.11 शूरैर्हि रक्ष्यते भार्या; D1.3.4 शूरो रक्षति भार्यां हि(D4 वै) (for the prior half). Ñ1 शूरैर् (for शूरम्). D10 उपासिता (for उपासते).—(l. 16) D3 यत्र; D11 न हि (for न च). D4 मे (for मां). Ś1 Ñ1 D1-4.10.11 त्रायसे(D11 °ते) राजन्; B3 रक्षते शूरः (for रक्षसे वीर). Ś1 D2.4.10.11 किं(Ś1 क) नु ते; D1 किं कुतः (for किमिदं). D3 किं नु शूरस्य लक्षणं (for the post. half).—After l. 16, D2 ins.:

त्वया न राम दयिता समर्थेनापि रक्षिता।

—Ñ1 illeg. for l. 17.—(l. 17) Ś1 D2.10 कौमारे; D1.4.11 योषितं; D3 यामिह (for पूर्वं हि). Ñ2 D6 रक्ष्यते (for रक्षति) and पित्रा (for पिता). D1 भरतर्षभ; D3.4.11 पुरुषर्षभ (for रघुनन्दन). Ś1 D2.10 यौवने पुरुषः स्त्रियं (for the post. half).—After l. 17, D11 ins.:

किं न रक्षेत्पतिः साक्षाद्बुद्धान्पुत्रश्च त्रायते।

—(l. 18) Ś1 D1.3.4.10.11 रक्ष्या (for हीना). V1 B3 कृता (for हृता). Ś1 D1.4.10 साहं; D3.11 चाहं (for राजन्).—Ñ1 illeg. from रावणेन up to l. 20. D2 त्वयाहं यौवने वीर म्रियमाणा न रक्षिता.—(l. 19) B1 राघवस्य (for °वाणां).—(l. 20) Ś1 Ñ2 D1-4.6.10.11 रावण- (for राक्षस-).—After l. 20, D2 ins.:

सुराः शक्रादयः स्थातुं न शक्ताः पुरुषर्षभ।

—D2 om. l. 21.—(l. 21) Ñ1 V2 D10 तच्छोषणं (for उच्छोषणं).—(l. 22) Ś1 Ñ1 D1-4.10.11 transp. चलनं and शैलराजस्य. B2 D1 कृष्णवर्त्मनि; D2 ज्वलनस्य च (for कृष्णवर्त्मनः).—After l. 22, D2 ins.:

वायोः स्थैर्यं शठे ज्ञानमुष्णत्वं द्विजराजनि।

—D2 om. l. 23.—(l. 23) B1 कर्माणि (for सर्वाणि). Ś1 D10 यानि; B4 D6 तथा (for यथा). Ś1 नराधिप (for नरोत्तम).—After l. 23, D1 ins.:

तथा तवाप्यश्रद्धेयं यदवच्छिद्यते त्वया।

—(l. 24) Ś1 D10 तथाप्येवम्; D2 असंधार्यम् (for तथानार्यम्). D3 अहं (for इदं). Ś1 Ñ1 D1-4.10.11 यदहं(D11 °यं) रावणक्षये(D1 °गृहे) (for the post. half.).—After l. 24, Ś1 Ñ1 D1-4.10.11 ins.:

वसाम्यनाथवद्वीर त्वयि नाथे व्यवस्थिते।

[Ś1 D3.11 वीर; Ñ1 राम (for धीर). D2 (with hiatus) लिष्ठाम्यत्र अनाथेव; D4 वसाम्यहमनाथेव (for the prior half). D2 च जीवति (for व्यवस्थिते).]

—(l. 25) B4 अन्यच् (for चान्यच्). B1.3 D3.4 वक्तव्यः

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ततस्तद्वचनं श्रुत्वा वैदेह्याः शोककारणम्।
शोकेन महताविष्टो हनूमान्प्ररुरोद ह। [30]
एवमुक्त्वा वचस्तथ्यं सीता शशिनिभानना।
उदैक्षत ततो भूयः शिंशपां तां हिरण्मयीम्।
प्रादेशमात्रं शाखायामुपविष्टं प्लवंगमम्।
ददर्श सीता कल्याणी प्राञ्जलिं प्रियवादिनम्।
तं दृष्ट्वापि ततः सीता दुःखितापि तपस्विनी। [35]
निःश्वस्य दीर्घं तत्रस्थं पुनर्वचनमब्रवीत्।
द्रष्टुमिच्छामि रामस्य वदनं पुष्करेक्षणम्।
पौर्णमास्यां यथा पूर्णं विमलं चन्द्रमण्डलम्।
दृष्ट्वा हि वदनं तस्य प्रहृष्येयं प्लवंगम।
अर्धसंजातसस्येव तोयं प्राप्य वसुंधरा। [40]

9

After 945*, Ś1 D1.10 ins.; while Ñ2 V B D2.3.6 ins. after Sarga 40:

किंकरान्सुबहून्हत्वा हनुमान्मारुतात्मजः।
काञ्चनाभ्रवनच्छन्नं बभञ्ज प्रमदावनम्।
चम्पकान्नागवृक्षांश्च तिलकान्वञ्जुलानपि।
नारिकेलानशोकांश्च तथान्यान्विविधान्द्रुमान्।
बभञ्ज परमक्रुद्धो वृक्षपालाञ्जघान च। [5]
तं दृष्ट्वा भज्यमानं च वनपालाः समन्ततः।
विद्रुताः सहसा त्रस्ता गता यत्र दशाननः।
बद्धाञ्जलिपुटाश्चैव शिरोभिरवनीं गताः।
न्यवेदयन्रावणाय भयविप्लुतलोचनाः।
धर्षितः स महांश्चैत्यः प्रवरा राक्षसा हताः। [10]
भग्नं च तद्वनं सर्वं वानरेण गतायुषा।
तत्प्रसादं महाबाहो कर्तुमर्हसि पार्थिव।
यथा वध्येत दुष्टात्मा तथा यत्नो विधीयताम्।
श्रुत्वा तेषां तु तद्वाक्यं स क्रोधात्प्रज्वलन्निव।

(for °व्यं). D2 तथा त्वं करुणं ब्रूयाः (for the prior half). V2 तथा; B1 कपे (for मयि).—Ś1 om. l. 26-28.—(l. 26) D3 [ऽ]पि (for हि). B2 यथा (for वनं). D2 वायुपुत्र दशग्रीवं हत्वा नयति मां लघु.—(l. 27) D1.2.4.10.11 रक्षितव्या (for रक्षणीया). V1 सदैव हि (for हि सर्वदा). Ñ1 D1-4.11 पत्नी पत्या (D4 भर्त्रा पत्नी) सदैव हि; D10 पत्नी हि पतिना सदा (for the post. half.).—(l. 28) B1 प्रणष्टम् (for तन्नष्टम्). V1 B3.4 धर्मज्ञस्य (for °स्थस्य).—For l. 28, Ñ1 D1-4.10.11 subst.:

उभयं वितथं त्वत्तो ह्यथ सौम्य ममाभवत्।

[Ñ1 illeg.; D2 नाथ (for त्वत्तो). D10 यद्धि (for ह्यथ). D10 सौम्यमना अभूः (for सौम्य ममाभवत्). D2 तथा त्वं कर्तुमर्हसि (for the post. half).]

—(l. 29) Ś1 D10 तस्यास् (for ततस्). V B2-4 शोकदारुणं.—(l. 32) Ś1 Ñ2 B4 D6.10 तदैक्षत; D2 निश्वस्य च (for उदैक्षत). Ś1 D1.2.4.11 पुनर्दीना; Ñ2 D6 तदा भूयः; D3 पुनर्ह्रीमान्; D10 मुहुर्दीना (for ततो भूयः). D2 शिंशिपामूलमाश्रिता (for the post. half).—(l. 33) Ś1 लिष्टं च (for उपविष्टं).—Ś1 om. l. 34-35.—(l. 34) B2 D10 प्रियवादिनी.—After l. 34, Ñ1 (illeg.) D2 ins.:

महता शोकभारेण सन्नागजवधूरिव।

—(l. 35) Ñ1 transp. तं and दृष्ट्वा. Ñ1 B4 D1.2.4.11 विस्मिता; D3.10 दुःखिता (for [अ]पि ततः). D3.10 विस्मिता (for दुःखिता). B1 [अ]सौ; B3 हि; B4 [अ]ति; D1.3.11 च (for [अ]पि). V1 यशस्विनी. Ñ1 दुःखशोकपरिप्लुता (for the post. half).—(l. 36) Ś1 Ñ1 D2.4.11 तत्रस्था; Ñ2 V D6 उर्ष्णं च; D1 तत्तस्य; D10 संत्रस्ता (for तत्रस्थं).—After l. 36, Ñ1 ins.:

हनूमन्हरिशार्दूल पण्डितः कुशलो ह्यसि।
ब्रवीमि त्वां कृपाविष्टं करुणादूषितात्मना।

—(l. 37) B1 पुंडूलक्षणं (for पुष्करेक्षणम्).—(l. 38) D1-4.11 पूर्णमास्यां. Ś1 Ñ2 D6.10 चंद्रं(Ś1 D10 °द्र-) (for पूर्णं). Ñ2 D6 पूर्ण- (for चन्द्र-). Ś1 D10 -मंडलं निर्मलं च तत(D10 शुभं) (for the post. half).—For l. 39 and 40, cf. 5.38.2—(l. 39) Ś1 D10 तु; D4 [अ]हं (for हि). Ñ2 illeg. for ष्येयं प्लवंगम. V2 प्रहृष्यामि; B4 D1 प्रहृष्येहं (for °यं).—(l. 40) Ś1 अथवा तं यथा विष्णुं संप्राप्येव वसुंधरा.

9

(l. 1) D1 lacuna for किंकरान्सुबहून्. Ś1 D1.3.10 कपिकुंजरः; V B हरिपुंगवः (for मारुतात्मजः).—(l. 2) Ñ2 V B D6 उद्यानं द्रुम(B3 वन)संछन्नं; D1 कांचनप्रवणछन्नं (for the prior half). Ñ2 V1 B D6 सलताकुलं(V1 B1 °वृतं) (for प्रमदावनम्). V2 शलभाकुलपादपं (for the post. half).—(l. 3) Ś1 D10 चण्यकान् (for चम्पकान्). Ñ2 नाम पुष्पांश्च; V B1-3 D6 नागपुष्पांश्च; B4 नागपुष्पाणि; D2 नाम वृक्षांश्च. V2 D3 बकुलान् (for वञ्जु°).—(l. 4) D1-3 नालिकेरान् (for नारि°). Ñ2 V B D6 तथाशोकान् (for अशोकांश्च). Ñ2 V B D6 अन्यांश्च (for तथान्यान्). B2 विविध- (for °धान्).—(l. 5) D2 रक्ष- (for वृक्ष-). Ś1 D10 वृक्षशाखा बभंज च; B3 वृक्षान्पुष्पफलान्वितान्; D3 शालान्तालाञ्जघान च (for the post. half).—(l. 6) V1 B1(m. also as above) ते; D3 तद् (for तं). D6 भंजमानं. Ñ2 V B1-3 D6 तु (for च). Ś1 D10 भज्यमानं वनं दृष्ट्वा; B4 तान्दृष्ट्वा भज्यमानांस्तु (for the prior half).—D10 om. l. 7-9.—(l. 7) V1 B2 जग्मुर् (for गता). Ś1 दशग्रीवमुपागम्य वाक्यमूचुरिदं तदा.—Ś1 om. l. 8-9.—(l. 8) D1 lacuna for the prior half. B2 बद्धा (for बद्ध-). Ñ2 V1 B D6 [इ]दम्; V2 [ए]वम् (for [ए]व). D1.3 अवनिं. Ñ2 V B D6 ऊचुस्ते प्रणता भुवि (for the post. half).—(l. 9) Ñ2 V B D6 रावणं तत्र संक्रुद्धं (for the prior half). Ñ2 V B D6 शोक- (for भय-). D1 -विलुत- (for -विप्लुत-). B4 -लोचनं.—(l. 10) Ñ2 V B

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

आदिदेश गणं तत्र राक्षसानां महाबलः। [15]
ते घोराः प्रहिता राज्ञा राक्षसा बलदर्पिताः।
मुञ्चन्तः सिंहनादांश्च प्रययुर्यत्र वानरः।
समासाद्य च तं वीरं हनूमन्तं महाबलम्।
ते जघ्नुर्विमलैः शूलैः परिघैः सपरश्वधैः।
अन्यैश्च विविधैः शस्त्रैर्हनूमन्तं तथा शरैः। [20]
ततः क्रुद्धः स हनुमान्प्रगृह्य विपुलं द्रुमम्।
जघान राक्षसान्घोरांस्तान्समेतान्महाबलः।
ते पावकमिवासाद्य शलभा जीवितक्षये।
जग्मुर्विनाशं सर्वे वै किंकरास्ते च राक्षसाः।
निहतान्किंकराञ्श्रुत्वा रावणो लोकरावणः। [25]
प्रहस्तस्य सुतं वीरं जम्बुमालिनमादिशत्।
नाहत्वा वानरं वीर विनिवर्तितुमर्हसि।

10

After 1077*, T2 ins.:

तां तथा परमोद्विग्नां सीतां शोकाभिकर्शिताम्।
हनूमति गृहीते तु रक्षोभिर्भीमविक्रमैः।
उवाच सरमा वाक्यं तां विराजयितुं तथा।
मा शुचो देवि वैदेहि हनूमन्तं महाकपिम्।
निहत्यारक्षिणः सर्वान्राक्षसांस्तत एव च। [5]
पुरीं लङ्कां दहति नः साक्षादिव हुताशनः।
भवनाद्भवनं गच्छन्सौमनस्येन वीर्यवान्।
प्रासादवरसंस्थाश्च गवाक्षस्थाश्च योषितः।
वह्निप्रदीप्तनयना नादान्कुर्वन्ति दुःखिताः।
काश्चित्तदा विशालाक्ष्यो वह्निज्वालासमावृताः। [10]
अपश्यन्त्यः क्वचिन्नाथं सर्वतोऽग्निसमावृतम्।
वह्नावभिपतन्त्याशु कर्तव्यं नाभिजज्ञिरे।
अभिधावन्ति सहसा क्रोशन्त्यः सह बालकैः।
अवकु(गु)ण्ठा निकृत्ता स्म वासोभिर्विस्मितास्तदा।
स्तम्भै राजतसौवर्णैः प्रवालमणिचारुभिः। [15]
दृश्यन्तेऽग्निसमासक्ता वह्नावग्निरिवोत्थितः।
प्रासादमाला बहुधा ह्यग्निदग्धाः पतन्ति हि।
दीप्यमानेव सा भाति लङ्का कालविपर्यये।
क्वचिद्दग्धप्रदेशास्तु क्वचिदर्धविनाशिताः।
बहुधेमा विभान्ति स्म गृहाणां भूमयः शुभाः। [20]
कान्ताभिः सह वित्रस्ता दृश्यन्ते राक्षसास्तदा।
अहोत्युच्चैर्वदन्ति स्म त्रातारं नाभिजज्ञिरे।
संप्रदीप्तां पुरीं लङ्कां हनुमद्वीर्यधर्षिताम्।
अन्तःपुराणि सर्वाणि दृष्ट्वा विद्राविरे तदा।
क्वचित्कुङ्कुमवर्णाभाः क्वचित्किंशुकसंनिभाः। [25]
क्वचिच्छालमलिसंकाशाः शिखाश्चाग्नेश्चकाशिरे।
धूमेन संवृताः केचिद्गृहोद्देशाः समावृताः।
पर्वकालेषु संप्राप्ते ग्रहा इव नभस्थले।
देवी व्यपयतु त्रासाद्धनूमन्तं प्रति प्रिये।
दग्ध्वा लङ्कापुरीं भीमां व्योम्नि वीरः प्रकाशते। [30]
स्निग्धो घनौघसंरोधान्मुक्तश्चन्द्र इवामलः।
एतच्छ्रुत्वाभवत्प्रीता सीता शशिनिभानना।
निर्वृतिं परमां प्राप्ता बाला स्वस्थाभवत्तदा।

D6 नाशितः (for धर्षितः). Ś1 Ñ2 V B D1.6.10 सु-; D2 च (for स). V2 -महांश्चैव (for महांश्चैत्यः). Ñ2 V B D6 राक्षसाः (B2 °स) प्रवरा (by transp.).—(l. 11) Ñ2 V1 B D6 भग्नं तव (V1 B3.4 °तच्च; B1 बभंज च; B2 °तु तद्) वनं (Ñ2 बलं) राजन् (for the prior half). B4 हता- (for गता-).—(l. 12) D2 त्वं (for तत्). D3 न प्रमादं (for तत्प्रसादं). Ñ2 V B D6 मानद (for पार्थिव).—Ś1 D1.3.10 om. l. 13.—(l. 13) Ñ2 बाध्यत (sic) (for वध्येत). —(l. 14) Ñ2 V1 B D6 तु तेषां (by transp.). Ś1 तथा; V2 * तद् (for तु तद्). Ñ2 D6 वचनं (for तद्वाक्यं). Ñ2 D6 क्रोधेन; B4 क्रोधात्स (by transp.). B3 प्रस्खलन्निव.—(l. 15) Ñ2 D6 राक्षसानां (for आदिदेश). V2 B2 D6 गणांस्; D1 गतिं (for गणं). D1 lacuna after रा. Ñ2 D6 व्यादिदेश (for राक्षसानां). Ś1 B3 D10 महाबलं (B3 °हवे).—(l. 16) B4 सहिता (for प्र°).—(l. 17) Ś1 मुंचन्वै (for मुञ्चन्तः). Ś1 D1–3.10 वै (for च). D2 प्रजग्मुर् (for प्रययुर्).—(l. 18) B3 समा * द्य. Ñ2 V B D6 गतायुषः (for महाबलम्). —(l. 19) Ñ2 V1 B1.2 D6 आजघ्नुर्; V2 B3 आजग्मुर् (for ते जघ्नुर्). D3 विविधैः (for विमलैः). B1 घोरैः; D3 शस्त्रैः (for शूलैः). Ñ2 स्व-; V2 B3 D2 च (for स-).—(l. 20) Ś1 D1–3.10 जिगीषवः; B1 ततः शरैः (for तथा शरैः). —(l. 21) Ś1 D2.10 तु (for स). B4 ततः स हनुमान्क्रुद्धः (for the prior half). Ñ2 V B D6 आदाय (for प्रगृह्य). D1 विपुलद्रुमान्.—(l. 22) D1 lacuna for जघान राक्षसान्. Ñ2 V B समेतांस्तान् (by transp.); D6 समेतान्स (for तान्समेतान्). B3 D1 महाबलान् (for महाबलः).—B4 om. l. 23–26.—(l. 23) Ś1 D10 तं (for ते). V2 ततः पावकमासाद्य (for the prior half). D1 शलभो. D6 -क्षयं (for -क्षये).—(l. 24) Ś1 B3 ते सर्वे; D1.3 सर्वेपि (for सर्वे वै). Ś1 D10 नाम राक्षसाः; Ñ2 तेन राक्षसाः; B3 भीमराक्षसाः; D1.3 तस्य रक्षसः (for ते च राक्षसाः).—After l. 24, V2 B3 read an additional colophon.

[*Sarga name*: V2 B3 सैन्यवधः.—*Sarga no.* (figures, words or both): V2 30; B3 38.]

—(l. 25) D10 निहत्वा (sic) (for °तान्). D1–3 राक्षसान् (for किंकराञ्).—(l. 26) D1.6 आदिशेत् (for °शत्). —(l. 27) Ñ2 V2 रावणं (sic) (for वानरं). Ś1 D2 वीरं; Ñ2 V B1.3.4 D6 शूरं (for वीर).

—Thereafter Ñ2 V1 B1.4 D6 read 5.40.36 with an additional colophon. *Sarga name*: Ñ2 किंक * नाशां वधः (illeg.); V1 जंबुमालिसंप्रेषणं; B1 किंकरवधः; B4 जंबुमालिप्रस्थानं; D6 किंकराणां वधः.—*Sarga no.* (figures, words or both): B1 om.; Ñ2 V1 D6 40; B4 43.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

11

After 5.52. 7, D5.7-9 S ins. :

वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः।
शुकस्य च महातेजाः सारणस्य च धीमतः।
तथा चेन्द्रजितो वेश्म ददाह हरियूथपः।
जम्बुमालेः सुमालेश्च ददाह भवनं ततः।
रश्मीकेतोश्च भवनं सूर्यशत्रोस्तथैव च। [5]
ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः।
युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य रक्षसः।
विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च।
करालस्य विशालस्य शोणिताक्षस्य चैव हि।
कुम्भकर्णस्य भवनं मकराक्षस्य चैव हि। [10]
नरान्तकस्य कुम्भस्य निकुम्भस्य महात्मनः।
यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च।
वर्जयित्वा महातेजा विभीषणगृहं प्रति।
क्रममाणः क्रमेणैव ददाह हरिपुंगवः।
तेषु तेषु महार्हेषु भवनेषु महायशाः। [15]
गृहेष्वृद्धिमतामृद्धिं ददाह स महाकपिः।
सर्वेषां समतिक्रम्य राक्षसेन्द्रस्य वीर्यवान्।
आससादाथ लक्ष्मीवान्रावणस्य निवेशनम्।
ततस्तस्मिन्गृहे मुख्ये नानारत्नविभूषिते।
मेरुमन्दरसंकाशे सर्वमङ्गलशोभिते। [20]
प्रदीप्तमग्निमुत्सृज्य लाङ्गूलाग्रे प्रतिष्ठितम्।
ननाद हनुमान्वीरो युगान्तजलदो यथा।

12

After 1086*, Śi Ñi B4 D2.10 ins. ; Ñ2 V B1-3 D6 ins. l. 1-14 after 1086* and l. 15-25 after l. 5 (B3 after l. 4) of App. 1 (No. 14); D1.4.11 ins. after 1085* ; D3 ins. after 1082* ; while D8 T2 ins. after l. 12 of App. 1 (No. 13) :

सीतयाभ्यर्थितो वह्निर्लङ्कां राक्षससंकुलाम्।
ज्वालामालापरिक्षेपैरदहन्मारुतान्वितः।
तेन शब्देन वित्रस्ता धर्षितास्तेन चाग्निना।
अभिपेतुस्तदा घोरा हनुमन्तं निशाचराः।
संप्रदीप्तैश्च शूलाग्रैः पाशैः खड्गैः परश्वधैः। [5]
हनूमन्तं महावेगैराजघ्नुर्नैर्ऋतर्षभाः।
ते राक्षसा भीमबला नानाप्रहरणान्विताः।
आजघ्नुर्वानरश्रेष्ठं बाणैरादित्यसंनिभैः।
आवर्त इव गाङ्गस्य तोयस्य विपुलो महान्।

11

(l. 1) l. 1 = 5.5.18^{ef}. T3 G2 तदा (for तथा). —For l. 2-4, cf. 5.5.19-20^{b}. —(l. 2) G3 शुद्धस्य (for शुकस्य). M1 महावेगः (for °तेजाः). G3 damaged for सारणस्य च. T2 G3 वीर्यवान् (for धीमतः). —(l. 3) T2 अथ (for तथा). T1.3 ममर्द (for ददाह). G1 पुप्लुवे स महाकपिः (for the post. half). —(l. 4) T1 damaged after जम्बु up to l. 5. T3 तदा (for ततः). D5 T2 M2 तथा कुंभनिकुंभयोः (for the post. half). —After l. 4, G3 reads l. 7. —l. 5-6=5.5.20^{cd} and 22^{cd}. —(l. 6) D5 रोमणस्य. G1 om. च (subm.). —For l. 7-9, cf. 5.5.23-24^{b}. —(l. 7) D8 ह्रस्वग्रीवस्य (for ध्वज°). M1 नादिनः (for रक्षसः). —(l. 8) G3 damaged for घोरस्य त. —(l. 9) T2.3 G1.2 M1.3 पिशाचस्य (for विशालस्य). D5 M2 ह (for हि). ❀ Ck : करालस्य विशालस्येति पाठः. ❀ —(l. 10) D5 M2 चैव ह; M1 चालयं (for चैव हि). —T1 damaged for the post. half. —D5 G3 M2 om. l. 11. T3 M1 transp. l. 11 and 12. —(l. 11) T2 नरकांतस्य (for नरान्तकस्य). T1.3 M3 दुरात्मनः (for महा°). —T1 om. l. 12. —(l. 12) G2 सूर्य- (for ब्रह्म-). —(l. 13) G1 कपिः; Cv as above (for प्रति). —For l. 14, cf. 5.5.24^{cd}. —(l. 14) T G हरियूथपः (for (for °पुंगवः). M1 हनूमान्मारुतात्मजः (for the post. half). —l. 15 = 5.5.25^{ab}. —For l. 16-18, cf, 5.5.25^{c}-26. —(l. 16) G2 M1.2 तेषाम्; G3 ऋद्धेषु (for गृहेषु). D8 [अ]भिमताम् (for [ऋ]द्धिमताम्). D5 सहसा कपिः; D7.9 कपिकुंजरः; T2 G1.2 M1.2 हरियूथपः; Cm as above (for स महाकपिः). —T1 damaged for l. 17-18. —(l. 17) G3 स तेषां (for सर्वेषां). G1.2 M1 भवनानि समंततः (for the post. half). —(l. 18) M1 राक्षसेंद्र- (for रावणस्य). —(l. 20) D7-9 M1 नाना- (for सर्व-). D5 -भूषिते (for -शोभिते). —(l. 21) M1 पवनस् (for उत्सृज्य). M1 तेषु वेश्मस्वचारयत् (for the post. half). —(l. 22) D8 ददाह (for ननाद). D5 G1 युगांते (for युगान्त-). D8 -ज्वलनो (for -जलदो).

12

(l. 1) D2 [अ]भ्यर्चितो (for °र्थितो). Ñ2 V B1-3 D6 स तु संवर्धितो वह्निः (B2.3 °श्चाग्निर्) ; D3.8.11 स तामत्यर्थि (D3 °प्यर्पि)तो वह्निः; T2 स तामत्यर्दितं वह्निर् (for the prior half). —(l. 2) D1.4 -परिक्षिप्तैर् (for °क्षेपैर्). Ñ1 V1 B1-3 D11 मारुतात्मजः; D3 मारुतेरितः (for मारुतान्वितः). —(l. 3) V2 भेरी- (for तेन). Ñ2 D6 सर्वे च (for शब्देन). Śi D10 संरब्धा; V1 विध्वस्ता; B4 D2.3 संक्रुद्धा (for वित्रस्ता). Ñ2 B4 D6 वह्निना (for चाग्निना). —(l. 4) Śi D10 ततो (for तदा). Ñ2 V B D6 तं कपिं राक्षसोत्तमाः (for the post. half). —Ñ2 V B D6 om. l. 5-6. —(l. 5) Ñ1 D2.8.11 T2 तं (for सं-). D3 ते संप्रदीप्तैः (for संप्रदीप्तैश्च). D11 लांगूलैः (for शूलाग्रैः). D1.3.4.8 T2 प्राप्तैः (for पाशैः). D1.4.11 च तोमरैः (for परश्वधैः). —(l. 6) D1.3.4 अभ्यघ्नन्; D2 अक्षिण्वन्; D8.11 T2 अक्षिपन् (for आजघ्नुर्). —(l. 7) D1.3.4 -[आ]वृताः (for -[अ]न्विताः). —Ñ1 D8.11 T2 om. l. 8-14. —(l. 8) cf. 5.40.27^{cd}. V2 B2 आजग्मुर् (for °जघ्नुर्). D3 शरैश्च; D4 शरैर् (for बाणैर्). —(l. 9) cf. 5.41.12^{ab}. Śi D10 transp. गांगस्य and

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

परिक्षिप्य हनूमन्तं स बभौ रक्षसां गणः। [10]
ततो वातात्मजः क्रुद्धो हेमरूप्यसमावृतम्।
प्रासादस्य समुद्धृत्य स्तम्भं हेमविभूषितम्।
भ्रामयित्वा शतगुणं नाम विश्राव्य चात्मनः।
जघान राक्षसान्वीरान्वज्रेणेन्द्र इवासुरान्।
निहत्य च वरांस्तत्र दिवमेवोत्पपात ह। [15]
अतिविक्रम्य सहसा संक्रामन्त्स गृहाद्गृहम्।
लङ्कामादीपयामास वायुपुत्रः प्रतापवान्।

स लाङ्गूलावसक्ताग्निर्मुक्तो मृत्युमुखादिव।
लङ्कां पर्यपतत्कृत्स्नां खे ग्रहः संपतन्निव।
तोरणेषु गवाक्षेषु हर्म्येषु शिखरेषु च। [20]
तिष्ठमानास्तु पश्यन्ति राक्षसाः प्लवगोत्तमम्।
सर्वतो हनुमानेकः संपतन्स व्यराजत।
हुताशन इवाकाशे ज्वालामालापरिष्कृतः।
अन्तःपुरविमानेषु रावणस्य महाकपिः।
निपपाताग्निसहितो मूर्तिमानिव पावकः। [25]

तोयस्य.—(l. 10) cf. 5.41.12^{cd}. D_3 परिक्षिप्तो (for °क्षिप्य). $\tilde{N}_2$ V B D_3 हरिश्रेष्ठं; D_6 हरिश्रेष्ठे (for हनूमन्तं). $\acute{S}_1$ सबलो (for स बभौ).—After l. 10, $\tilde{N}_2$ V B D_6 ins.:

ते प्रदीप्तानि शूलानि प्रासान्बहुपरश्वधान्।
तदा प्रति हनूमन्तं क्षिपन्ति स्म निशाचराः।

[(l. 1) $B_{2.3}$ transp. प्रदीप्तानि and शूलानि. $\tilde{N}_2$ मुद्गर- (hypm.); B_1 D_6 खड्ग- (for बहु-). V_2 पाशान्खड्ग-; B_4 प्राशखड्ग- (for प्रासान्बहु-).]

—(l. 11) cf. 5.41.13. B_1 श्रीमान् (for क्रुद्धो). $\tilde{N}_2$ D_6 भीमं रूपं; V_1 B_2(marg. also हेमरूप्यं)$_{3.4}$ D_6 भीमरूपं (for हेमरूप्य-). $\tilde{N}_2$ V_1 B D_6 समास्थितः(B_1 °तं); V_2 -समाश्रितं; $D_{1.2.4}$ -समाचितं; D_3 -समाहितं (for -समावृतम्).—For l. 12–14, cf. 5.40.935*.—(l. 12) $\tilde{N}_2$ V B_{1-3} D_6 समुत्पाट्य; D_1 समुद्वह्य; D_4 समुत्क्षिप्य (for समुद्धृत्य). B_4 प्रासादात्समनुद्धृत्य (for the prior half). $\tilde{N}_2$ V $B_{2.3}$ $D_{3.6}$ रत्न- (for हेम-).—(l. 13) V_2 बहुगुणं; $D_{2.10}$ गुणशतं (for शतगुणं).—(l. 14) $D_{1.4}$ सर्वान्; D_3 इंद्रो (for घोरान्). D_3 वज्रेणेव शतक्रतुः (for the post. half).—After l. 14, D_3 ins.:

तान्राक्षसान्भीमबलान्नानाप्रहरणान्वितान्।

